नं. ५०१२ कै.

आश्वलायन श्रौत सूत्र
वृत्तिः पूर्वपरकं
श्री नारायणः

पत्र. १७६ — सं ×

सूत्र पद्धति परिशिष्टं

1

आश्वलायनश्रौतसूत्रवृत्तिः

पूर्वोत्तरषट्कम्

५०५२

५०२२-१

[illegible]

१२००८

नि

श्रीगणेशाय नमः॥ श्रीआश्वलायनाचार्याय नमः। प्रज्ञानानंदमूर्तिः सकलदिगतिगः
सर्वदा सन्ननन्यः सर्वस्मात्स्वप्रकाशास्थिरचरलयः प्रत्यगात्मा स देवः। श्रौतस्मार्तक्रिया
सौश्रुतिमनननिदिध्यासवैराग्यलभ्यः स ब्रह्मा विष्णुरीशः सकलमपि जगत्सर्वदाव्या
दसौ नः॥१॥ गुणदोषविनिर्मुक्तं स्वप्रकाशमनाकुलं। गंभीरबोधमानंदं नमामि ब्रह्मशा
श्वतं॥२॥ आश्वलायनसूत्रस्य भाष्यं भगवता कृतं॥ देवस्वामिसमाख्येन विस्तीर्णं सद
नाकुलं॥३॥ तस्मात्सारान्समादाय दानीं क्रियते वृत्तिरीदृशी। नारायणेन गार्ग्येण नरसिंहस्य सू
नुना॥४॥ अथैतस्य समाम्नायस्य वितानेयोगापत्तिं वक्ष्यामः॥ लोके यानि प्रत्याम्नायं
प्रयोगशास्त्राणि स्मर्यंते तान्यनुष्ठानोपयोगितया अध्ययनविध्याक्षिप्तत्वात्समाम्नायमं
गत्वं प्रतिपन्नानि। तत्राग्निं गांगिनोरनुष्ठानक्रमानंतर्यमथशब्दो द्योतयति। एतस्येति श

१

द्वो निविस्मेवा पुरोरुक्कुंतापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसंहितस्य शाकलस्य वा
ष्कलस्य चाम्नायद्वयस्य एतदाश्वलायनसूत्रं नाम प्रयोगशास्त्रमिंध्येत्वप्रसिद्धसंबंध त्य
विशेषं द्योतयति। समाम्नायस्येत्युच्यते। एतस्यैव सम्यगभ्यासयुक्तस्येदं शास्त्रं नाखि
लानां सम्यगभ्यासरहितानामिति। वितताऽग्नयो यस्मिन्निति श्रौतं कर्मजातमग्निहोत्रा
दि वितानशब्देनोच्यते। समाम्नायस्य वितान इति विशेषणाच्छ्रौतेष्वेव खिलरहितत्वं गार्ह्ये
षु सखिलत्वमेवेति ज्ञायते। योगापत्तिः प्रयोगापत्तिः प्रयोगपरिप्राप्तिः प्रयोगस्वरूपमित्य
र्थः। तां वक्ष्याम इति ब्रुवन्निदमेव शास्त्रप्रतिपाद्यमिति दर्शयति। तेन छंदोगप्रत्ययप्राप्तस्य
प्रयोज्यत्वचादेः स्तोत्रियत्वादिकार्यसंबंध एवात्र विहितत्वेन गृहीतव्यो न त्वचादेः स्वरू
पमपि तत्प्रत्ययमेवेति प्रयोग एव शास्त्रस्य व्यापारो न त्वचादेः प्रयोज्यस्वरूपे पातित एत

श्रौ० वृ०
२

उक्तं भवति। अध्ययनविधित एवोक्तलक्षणं समाम्नायमधिगम्यानंतरं श्रौते कर्मण्येतादृक्
समाम्नायविहितप्रयोगज्ञानाय इदमपि शास्त्रमधिगंतव्यमिति श्रौतेषु कर्मस्वेतादृक्समा
म्नायविहितां प्रयोगापत्तिं वक्ष्याम इत्युक्तं इदानीं तेष्वाहिताग्नेरधिकार [illegible] इत्याह॥
अग्न्याधेयप्रभृतीन्याह वैतानिकानि। अग्न्याधेयं प्रभृतिरादिरुपक्रमो येषां तान्यग्न्या
धेयप्रभृतीनि अग्निहोत्रादीनि कर्माण्याधानं कृत्वैव कर्तव्यानीत्यर्थः। तत्र हेतुमाह वैता
निकानीति वितानेषु भवानि वैतानिकानि वितानसाध्यानीत्यर्थः। वितानशब्दोऽस्मिंस्त
त्रे भावसाधनोऽग्नीनां विस्तारवाचि पूर्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्मवच
नः। एतदुक्तं भवति। गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि अग्नयस्त्वाधा
नसाध्यास्तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणां बहुवचनं सर्वश्रौतपरिग्रहा

२

कर्म ३

र्थे। सर्वाणि श्रौतान्याधानादूर्ध्वमेव कर्तव्यानि। न किंचिदपि श्रौतमाधानादर्वागिति॥
अनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात् साधितं भवति। तद्य
दि कर्मार्थं स्यात्तदातिक्रमं क्रियेत तत्र कस्यचित्पुरस्तादपि स्यात्कस्य परस्तादाधानं स्यात्त
ग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेना
धानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः श्रामवत्यादयो न भवंति। अव
कीर्णिना पश्वाद्यर्थं चाधानं न कर्तव्यमिति साधितं भवति न परस्तात्। आहेत्यनेन
सर्वमिदं शास्त्रं श्रुतिमूलमिति दर्शयति। तेन अस्मिं छास्त्रे यद्दृष्टमूलं तदाम्नायांतर
मूलमिति साधितं भवति। अस्मिंस्तु [illegible] शास्त्रे अनिबद्धस्य स्वाम्नाये दृश्यमानस्य श्रु
तित एव प्रयोगसिद्धिर्भवति। श्रुतेः स्वातंत्र्यसंकीर्तनात् इति आधानस्य प्रथमानुष्ठे

८

मं० टि० त यत्वात्प्रथमं देव वक्तव्यमित्यत आह। दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तंत्रस्य तत्राम्ना
२ द्व तत्वात्। दर्शपूर्णमासशब्दो यथासंख्येन सूर्याचंद्रमसोरत्यंतसंनिकृष्टविप्रकृष्टदेशस्थिति
लक्षणवचनौ तद्योगादहोरात्रवचनौ तद्योगादेव कर्मवचनौ। अत्र तु कर्मवचनौ। प
श्चात्प्रयोज्यवचनोऽपि दर्शशब्दो ल्याच्चतरत्वात्पूर्वं निपात्यते। तुशब्दो विशेषद्योत
कः। तंत्रं मं[illegible]गसंहतिर्विध्यंत इत्यर्थः। स चावघ्नानादिसंस्कारज[illegible]पांतः प्रधानस्य तंत्र
णात्तंत्रमित्युच्यते। तच्च दर्शपूर्णमासयोरेवाम्नातं नान्यास्विष्टिषु अतस्तत्सा[illegible]पे
क्षत्वादन्यासां तावेव पूर्वं व्याख्यातव्यौ स्यातां। एतदुक्तं भवति। आधानस्य प्रथमं प्रयो
ज्यत्वात्तस्मिन्नेव प्रथमं व्याख्यातव्ये सति तत्साध्यस्य गार्हपत्यादेः पवमानेष्टिसापेक्ष ३
त्वात्ता अपि तत्रैव वक्तव्याः स्युः। उक्ता अपि विध्यंतसापेक्षत्वात्तस्य च दर्शपूर्णमासयो

२ अप्रपन्नत्वात्तस्यानित्यत्वादिति परिभाषया ऽग्नावाप्रत्यक्षस्य ग्रहणं २

रेवाम्नातत्वात्तद्व्याख्यानमन्तरेण तत्त्वानामभावात्तयोरुक्तं नैव शक्यते। अतो नेन विशेष

स्या णानावेव पूर्वं व्याख्यातम्। नाधानमिति सूत्रस्यार्थः। इदानीं दर्शपूर्णमासयोर्व्याख्यानमा

रभते। दर्शपूर्णमासयोर्हविरासन्नेष्वहोतामंत्रितः प्राग्दक्षिणगार्हपत्याहवनीयाद्दक्षिणस्थाय प्रा

ङ्मुखोयज्ञोपवीत्याचम्य दक्षिणा वृत्त्या हारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीताः। दर्श

पूर्णमासयोरित्यधिकारार्थं आध्यायपरिसमाप्तेः वाक्ये नशेषविशेषासंयुक्तस्यो

भयार्थत्वाय हविरासादनमामंत्रणं चोभयं संहतमेवेष्टिकस्य प्रवेशस्य निमित्तं हो

त्रमित्यृग्वेदस्य समाख्यातत्वेदविहितानां पदार्थानां कर्ता होतेत्युच्यते। प्राङ्मुखत्वं

स्थानाचमनाभ्यां संबध्यते। मध्यगतस्य विशेषाग्रहणात् यज्ञोपवीतं तावदाचमनम

नार्थं तथा न विधेयं स्मृतिप्राप्तत्वात्। अन्यार्थं च न भवति संबंधाभावात्। एकवाक्यग

श्रौ० सू०

तत्वात्कर्त्रासंबध्यमानस्यच प्रयोजनाभावः स्मृतिप्राप्तत्वादेव। अतः स्मृतिप्राप्तमपि

हानूद्यते। स्मार्तानांस्नानाचमनयज्ञोपवीतादीनांश्रौतकर्माविरुद्धानामस्मिन्शास्त्रे

४

प्राप्तिप्रदर्शनार्थं। इदमाचमनं कर्मांगं विधीयते। शौचार्थस्यगृहप्रवेशनात्प्रागेव

कृतत्वात्। तदुक्तं। मनः प्रसादात्सत्योक्त्यातपसास्नानकर्मणा। आचांत्याचात्मनः

शुद्धिं कृत्वाकर्मसमारभेदिति। दक्षिणावृन्नामयोदक्षिणंपार्श्वंमध्येकृत्वावर्तते

सदक्षिणावृत्। विहियंतेऽग्नयोयस्मिंदेशेसविहारः। उत्करोनामउत्कीर्यंतेवेदि

पांसवोयस्मिंदेशेसउत्करः। प्रणीतानामआपोमंत्रसंस्कृताः आहवनीयस्योत्त

रतोनिहिताः। उत्करंप्रणीताश्चांतरेणायोदेशस्तेनविहारंप्रपद्यते एतदुक्तंभवति।

५

स्नात्वाचम्यय ज्ञोपवीतीभूत्वाहविःष्वासन्नेषुआमंत्रितश्चसन्होताप्रागुदगाह

वनीयाद्योद्देशस्तस्मिन्प्राङ्मुखो वरणाय निष्क्रम्य प्राङ्मुख एव भूत्वाचम्य दक्षिणा
वृत्त्वा पूर्वेणोत्करमपरेणाप्रणीतायोद्देशस्तेन विहारं प्रपद्यत इति। उत्करप्रणीता
ग्रहणादेव विहारप्रत्यये सिद्धे यद्विहारग्रहणं तत्सर्वः कर्ता सर्वकर्मणि विहारप्र
पदनं कुर्वन्दक्षिणावृत्त्वैतेन पथा प्रपद्येतेत्येवमर्थं। इध्ममपरेणाप्रणीते। यदनो
ऽधिहविष्कं कर्म तदप्रणीतमिहोच्यते। हविःश्रपणार्थत्वात्। प्रणीतानां तस्मिन्
निध्ममपरेण प्रपद्यते प्रणीताः। तत्र न संतीति। चात्वालं चात्वालवस्तु। चात्वालो
नामाहवे पशुसोमादिष्वाप्तियेषु उत्तरवेद्यर्थं मृत्खात्वा क्रियते तद्वत्स्केतेषु तम
परेणाप्रपद्यते। सर्वत्रोत्कारः पश्चिमावधिः। एतत्तीर्थमित्याचक्षते। एतमध्वानं ती
र्थमित्याचक्षते वेदविदः। आचक्षत इति ब्रुवन् वैदिकीयं संज्ञा न पारिभाषिकीति

श्री० सू० ५

दर्शयति। उत्कराद्यभावेपि सदेशस्तीर्थसंज्ञक एव देशलक्षणार्थत्वादुत्करादीनांग्रहणस्येति।
अतोग्निहोत्रादिष्वपि तेनैव पथा प्रपदनं सिद्धं भवति। तस्या नित्याः प्रांचश्चेष्टाः। षष्ठसूत्रा
णि सर्वार्थानि तदर्थं तस्येति विशेषणं कृतं। असत्यस्मिन्होतुः प्रकृतत्वात्तस्यैवेमे विधयः
स्युः। अस्मिंस्तु सति संनिकृष्टविषयत्वात्सर्वनाम्नस्तीर्थेन विहार प्रपदना र्हयिः कर्ता वि
हितः तस्यैवेमे विधयो भवंतीति तस्येति विशेषणं कृतवानाचार्यः। नित्या इत्यनेन प्राक्
चेष्टतायाः नित्यत्वं न विधातव्यं। विहितत्वादेव स्वरूपनित्यत्वयोरपि सिद्धत्वात्। अत
स्तस्यैषोर्थः। तस्य वाह्यानां चेष्टानां मुपरमेपि मनोवाक्काययंत्रणादयो नित्या एवेति॥
प्रांच इति शब्दः पूर्वदिग्वाचि पुंसि बहुवचनांतः चेष्टा इति क्रियावाची स्त्रियां बहुवचनां ५
तः। तत्र प्रांच इत्यत्र पुंसः प्राकेन संबंधात्कर्तुः प्राङ्मुखत्वं विधीयते। चेष्टाशब्दगत ब

5

ऽुवचनेनास्य बहुत्वस्य सामानाधिकरण्यादेव चेष्टानां प्राक्त्वं विधीयते। तासां अमूर्तत्वा
त्स्वतः प्राक्त्वासंभवात्त[illegible]त्साधनेषु प्रागग्रता तासां च प्राच्येवापवर्ग इति विधिवल्लाञ्ज एवं
वति। एतदुक्तं भवति। यो यस्तीर्थेन विहारं प्रपन्नस्तस्य तस्य प्राङ्गुःक्रमणान्मनोवाक्का
यचेष्टानां? यन्त्रणाद्यो नित्यास्युः कर्तुश्च प्राङ्मुखत्वं चेष्टानां च प्रागपवर्गता तत्साधनानां च प्रा
गग्रतेति विषमसूत्रप्रणयनेन [illegible]व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहाद्दक्षणमित्ये ल
षा परिभाषासंगृहीता भवति। अंकधारणा च। अंकम्रूपरुछः तस्य करणं दक्षिणोत्त
रिणोः परुछेनेति वक्ष्यमाणरूपं धारणेत्युच्यते। सा च नित्या भवेदुपवेशनकालादारभ्या
कर्मपरिसमाप्तेरविच्छेदेन कार्येत्यर्थः। अंकधारणस्योपवेशनांगत्वेन प्राप्तस्या दृष्टार्थ
तापरिहारार्थे [illegible]व नित्यत्वेऽपि प्राप्ते त[illegible]न्नित्यतावचनं न पत्नीसांयाजिके अनिरस्यत्व

श्रौ॰ सू॰
६
6

मित्येवमादिषूपवेशनेषु मंत्रानिषेधेपि वक्ष्यमाणस्योपवेशनप्रकारस्यानित्यत्वेन प्रापणार्थं
मंत्राविध्यसंबंधेष्वप्यग्निहोत्रादिषु वक्ष्यमाणलक्षणस्यैवोपवेशनस्य प्रापणार्थं च। य
ज्ञोपवीतशौचे च। पूर्वस्य यज्ञोपवीतग्रहणस्य स्मार्तानां प्रापणार्थत्वान्निवीतप्राचीनावी
तयोर्मानुषपैतृकयोः कर्मणोः स्मार्तत्वेन प्राप्तौ सत्यां नियमार्थमिदमुच्यते यत्र निवी
तिप्राचीनावीते विधीयेते तत्रैव ते भवतो न मानुषं पैतृकं वा कर्म दृष्टेति तयोर्विध्यभावे
यज्ञोपवीतमेवेति नियम्यते। देशस्यांगप्रधानार्थत्वाद्दिक्ष्वादिभक्षणादेश्चांगत्वादस्य
च विहारदेशे प्राप्तौ सत्यामेवं शौचग्रहणेन नियम्यते क्रत्वर्थमप्यशुचित्वसंपादिय
त्वाद्विहारान्निष्क्रम्य बाहिः कर्तव्यं। अंतर्विहारेषु शुचिरेव नित्यं स्यादिति। विहाराद्व्यावृत्ति
श्च तत्र चेत्कर्म। व्यावृत्तिः पृष्ठतः कृतिः। न विहारं पृष्ठतः कुर्यात्तत्र चेद्विहारे कर्म कुर्वन्भवे

६

संयोगमध्येपि कर्म कुर्वतामेवायं नियमो नोपरतकर्मणां इत्यर्थः। अतो विहारव्यावृत्ति
निषेधात्। पश्चाद्स्योपविश्य पश्चात्त्वस्याधिष्ण्यस्योपविशन्ति। पश्चादुत्तरवेदेरुपवि
श्याध्वर्युरित्येवमादौ मध्यरेखाया अपक्रम्य उत्तरत उपविशेत्। चशब्दस्त्रिसूत्रे श्रुति
प्राप्त्यानुकर्षणार्थः। तत्र चेत्कर्मेति वचनात् ब्रह्मणोप्ययं नियमो भवेत्। उत्तरसूत्रांगे चेदं
पदत्रयं तेन ब्रह्मणो दक्षिणांगव्यापारः सिद्धो भवति। एकांगवचने दक्षिणं प्रतीयात्। एक
शब्दः कैवल्यवचनः एकं च तदंगं चैकांगं सव्यदक्षिणभेदेन द्वित्वयोगि यदंगं हस्तादि तस्य ण
द्वित्वेन विना वचने दक्षिणमेवांगं साधनं विद्यात् द्वित्वयोगे द्वाभ्यां कुर्यात्। एकवचनब
हुवचने कर्त्रैकत्वबहुत्वापेक्षे। एकत्वादीनामन्यत्रोपयोगात्। केवलांगवचनमेव दक्षि
णप्रत्ययस्य निमित्तमित्यर्थः। हस्तेन वा पादेन वेत्युदाहरणं। अनादेशे। द्वित्वयोगिनोंग
=पाण्योरसमानि धाय प्रपदेन बहिराक्रम्य • पाणी श्च मसेष्विस्यापि १

४ सोमप्रवहणप्रातरनुवाकादीन्युदाहरणानि ४

श्रौ० सू० स्थानादेशोक्रियामात्रविधानइत्यर्थः। तत्रापिदक्षिणंविद्यात्प्रपद्यतोअभिक्रम्यअंगुलीरं२उं३यां

७गुली भिरित्युदाहरणानिचक्षुरादेरनंगत्वात्तेष्वयंनियमोनास्तिअवयवविशेषाश्रयाहिश्रा

क्रयश्चक्षुरादय२उच्यंते। नावयवाइति। कर्मचोदनायांहोतारं। कर्तृरहितेक्रियाविधौहो

तारंकर्तारंविद्यात्। कर्तृसहितेसएवकर्ताभवेत्। येनसहितंतत्कर्मस्यात्। कर्तृरहितो

पिगुणविधिःसर्वार्थएवकर्मचोदनायामितिविशेषणात्। नेदंहोतुःप्रापकंकिंतर्हि

प्राप्तस्यनियामकंतेनेष्टिपशुसोमेभ्योन्यत्रनहोतुरेवकर्तृत्वनियमइति। ददातीति

यजमानं। स्वत्वव्यावृत्तिपूर्वकेपरस्वत्वापादानपर्यंतेददातिविधौयजमानंकर्तारंवि

द्यात्। जुहोतिजपतीतिप्रायश्चित्तेब्रह्माणं। तृतीयाध्यायगोचरेप्रायश्चित्तप्रकरणे ७

जुहोतिजपतिकर्तारंब्रह्माणंविद्यात्जपशब्देनात्रसाहचर्याज्जपादिषकं२गृह्यतेतस्मि

२यदिपुरोळाशस्फुटेत्० अपोभ्यवहरेयुः। अभिन्नोघर्म २

२इत्युदाहरणानिजपतेः। तुभ्यंताअंगिरस्तमेतिवाज्याहुतिं २

२हुत्वैयेवमादीनिजुहोतेरुदाहरणानि २

३अत्रार्थतोग्रहणंनशब्दतः अन्यथाचतुःशरावमोदनमि ३

३त्सत्रनस्यात् ३

२ = पित्र्यायां प्राक् प्रयाजेभ्य इति एतत्प्रायश्चित्तं पतति तद्यामा तपश्चाहं यजमिति मंत्रद्वयस्य लोपो भवति सहस्त्रशृंग २

२ × इति होममंत्रस्य न लोपः एवं सर्वत्र योजनीयं । अयाश्चेत्यादि च सर्वप्रायश्चित्तहोमो न भवति संसृष्टजपाभावात् । २

यत्र संसृष्टजपस्तत्र प्रायश्चित्तानि संबंधकरणात् । यत्र प्रायश्चित्तहोमस्तत्र संसृष्टजप इत्यर्थः । भवति गृहमेधीये संसृष्टजपाभावात् । सर्वप्राय

२× ×२

न्नकरणे मुख्यजपस्याभावात् । एवं च सति कर्मकरणत्वेन होममंत्रस्यापि ग्रहणे सिध्येय

न जुहोति ग्रहणं तज्जपग्रहणे न होममंत्रार्थं इत्यं तदित्येवमर्थं । तेन पित्र्यायां जपादिलोपे

पि होममंत्रा न लुप्यंते । ऋचं पादग्रहणे पादशब्दोत्र मूलवाची । ऋचो मूलग्रहणे ऋचं वि

द्यात् । नांतमध्ययोर्ग्रहणे प्रवो वाजा अभिद्यवोग्निर्नेता त्वं सोमक्रतुभिरित्युदाहरणानि

। सूक्तं सूक्तादौ हीने पादे । अत्र पादशब्दो गायत्र्यादीनां भागवाची सूक्तादौ हीने पादे ग्र

ह्यमाणे सूक्तं विद्यात् । त्वमग्ने वसूंस्त्वं हि क्षैतवदित्याद्युदाहरणानि । अधिके तृचं सर्वत्र ।

अधिके पादे गृह्यमाणे तृचं विद्यात्सर्वत्र सूक्तादावसूक्तादौ चेत्यर्थः । अग्न आयाहि वी

तये गृणानः ईळेन्यो नमस्यस्तिर इत्याद्युदाहरणानि । जपानुमंत्रणाप्यायनोपस्थाना

न्युपांशु सर्वत्र शब्दोत्रापि संबध्यते मध्यगतस्य विशेषाग्रहणात्संयोजनवत्ताच्च । अस्मिं

२ × श्चित्तहोमो न भवति २ अंतर्मध्ये लुप्यतां पर्वतेनेक्षन्तरतोग्नेरित्यादौ ७

श्रौ० वृ०
८
एणा
8

छास्त्रेयानिजपादीनितान्युपांशुप्रयोक्तव्यानि।मंत्राश्चकर्मकरणाः।चशब्देनात्रसर्वत्रेत्येषां
श्चितिचानुकृष्यतेमंत्राःकर्मकरणाश्चसर्वत्रोपांशुप्रयोक्तव्याः।उपांशुत्वस्येदंलक्षणंकर
णवद्शब्दममनःप्रयोगउपांश्चितिजपादीनांमंत्राणांलक्षणमुच्यते।जपमुच्चारणंविद्यात्के
त्यर्थमपितद्भवेत्।अर्थतःकार्यलाभश्चेदर्थएवकृतोभवेत्।मंत्रमुच्चारयेन्नैवमंत्रार्थत्वे
नसंस्मरेत्।शोषिणंतन्मनाभूत्वास्वादेतदनुमंत्रणं।एतदेवाभिमंत्रस्यलक्षणंचेक्षणा
धिकं।अद्भिःसंस्पर्शनाधिक्यात्तदेवाप्यायनंस्मृतं।उपस्थानंतदेवस्यात्प्रणतिस्थानसं
युतं।वाच्यंकार्यंयदेतेषुमंत्रकालेक्रियेततत्।कर्मणाःकारणास्तेषुविहितार्थप्रकाशना
त्।मंत्रेणकृत्वामंत्रांतेक्रियतेकर्मयेषुतु।इदंकार्यमनेनेतिनकाचिद्दृश्यतेविधिः।लिं
गादेवेदमर्थत्वंयेषांतेमंत्रसंज्ञिताः।अनुमंत्रग्रहणेनाभिमंत्रणमपिगृह्यते।अनुमंत्र
णाप्यायनोपस्थानानांकर्मकरणत्वाविशेषेपियत्पृथक्ग्रहणंतन्मंत्रांतेकर्मारंभइति

२× षट्त्रिंश्चाध्वर्योर्नवतिः० देवबर्हिरित्येवमादयः×२

कर्मकरणाधर्मो यः स तेषु न भवतीत्येवमर्थः। तेन मंत्रोच्चारणासमकालमेव तेषु क्रिया भवति प्रसंगादपवादो बलीयान्। सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः। लोके वेदे प्रसिद्धस्य न्यायस्य वचनप्रयोजनं सर्वे ऽपवादाः प्रसंगस्यैव बाधका नापवादाः सावकाशत्वे परस्परं बाधका इत्येवमर्थः। अतः स्यादुक्थिलीयासु आह्वावो तरयोः प्रणवो यो ऽयं यो प्रतिगरो न बाधको भवतः। प्रपद्याभिहततरेण पादेन वेदिं श्रोण्या उत्तरया पार्श्वं समं निधाय प्रपदेन बर्हिराक्रम्य संहितौ पाणी धारयन्ना काशवत्यंगुली हृदयसंमितावंकं संमितौ वा द्यावापृथिव्योः संधिमीक्षमाणाः। तिष्ठेदिति शेषः। तीर्थेन विहारं प्रपद्यत इत्युक्तं। तच्चैकेन पदविक्षेपेण बहिर्विहारादंतर्विहारप्रपदनं कर्तुमशक्यं दक्षिणां गच्छतः प्रत्ययश्च सिद्ध एव इदानीं प्रपद्येत्युच्यते। आवेदिं श्रोण्या यत्प्रपदनं तस्य सर्वस्य विहि

श्रौ०सू०
९
9

तत्वसिध्यर्थं। अभिहततरेणोतितरसो वचनं अनेकपदविक्षेपसाध्यत्वादस्य प्रपदनस्य
सर्वेष्वपि पदविक्षेपेषु दक्षिणस्याग्रतोहरणसिध्यर्थं॥ वेदेरपरास्त्रयोः श्रोणिरिति संज्ञा॥ पूर्वा
स्त्रयोरंसइति॥ पादस्यापरो भागः पार्ष्णिः पूर्वः प्रपदः॥ उत्तरया श्रोण्या दक्षिणस्य पादस्य पा
र्ष्णिं समां निधाय तस्यैव प्रपदेन वेद्यास्त्वार्यां बाहिराक्रम्य बाहिर्वेदि सव्यं निधायासनः
सव्यदक्षिणौ हस्तौ पृथक् पृथक् विरलांगुलीयकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी
परस्परसंहितौ च कृत्वा तौ हृदयसंमितावंकसंमितौ वा धारयन् द्यावापृथिव्योः संधि
मीक्षमाणः नोर्ध्वमधस्तिर्यग्वेक्षमाणः ऊर्ध्वः प्राङ्मुखस्तिष्ठेत्। एतद्धोतुः स्थानं। अयं
स्थानशब्दो भावसाधनो नाधिकरणसाधनः॥ एतच्छब्देन श्रोणिदेशेन हस्तपादादियं ९
त्रयेन च विशिष्टं यत्पूर्वसूत्रोक्तं तदत्र स्थानशब्देनोच्यते इति प्रदर्श्यते। यत्र होतुः स्थानं

चोद्यते तत्रैतत्स्थानं भवतीत्यर्थः। होतृग्रहणमुत्तरसूत्रस्य सर्वार्थत्वाय। आसनं वा सर्व

त्रैवं भूतः॥ अयं वा शब्दश्च शब्दस्यार्थे वर्तते। स्थानं चासनं च सर्वत्र सर्वः कर्ता एवं भूतः कु

र्यात्सर्वे कि हस्तपादादियं त्र याविशिष्टोन श्रोणिदेशाविशिष्ट इत्यर्थः। श्रोण्यादिषु स

र्वेषु प्राप्तेषु श्रोणिदेशावर्जनेन कर्तृशरीरविशेषणानामेव प्रापणार्थमेवं भूतवच

नं। वचनादन्यत्। उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं तावन्मात्रस्यैव न तत्सं बंधि

नोन्यस्यापीति तेन होमार्थे क्रियमाणे दक्षिणस्य पाणेरपायेपि सव्यो हृदयान्नापैती

ति सिद्धं। प्रेषितो जपति॥१॥ अत्रान्यार्थस्य प्रेषस्याभावात्सामिधेन्यर्थं प्रेषितो होता॥

१॥ नमः प्रवक्त्रे नम उपद्रष्ट्रे नमो नुख्यात्रे कइदमनुवक्ष्यति स इदमनुवक्ष्यति षण्मो

र्वीरंहसस्पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च वाक्समस्थितयतः सा

धुक्षंदांसिप्रपद्येऽहमेवमाममुमितिस्वंनामादिशेत्।भूतेभविष्यतिजातेजनिष्यमाणाऽआ
भजाम्यपाव्यंवाचोऽअशांतिंवहेत्यंगुल्यग्राण्यपवकृष्यजातवेदोरमयापश्यन्मयीतिप्र
तिसंदध्याद्धर्ममेद्यावापृथिवीवर्माग्निर्वर्मसूर्योवर्ममेसंतुतिरश्चिकाः।तद्दघवाचः
प्रथमंमसीयेति॥नमःप्रवक्त्रइत्यादिहोत्रंजुषध्वमित्यंतंजपेत्।सामिधेन्यर्थंप्रैषोत्त
रकालवर्तित्वादयंजपःसामिधेन्यर्थोभवति।अत्रामुमितिशब्दस्यस्थानेद्वितीयया
विभक्त्यास्वमात्मनामानिर्दिशेत्।स्वग्रहणात्सतिनिधित्वेनप्रवृत्तस्यापिजपकर्तु
रेवनामानिर्देष्टव्यंनहोतुरितिलभ्यते।आ।शांतिंवहेतिजपैकदेशमुच्चारयन्नंगुल्य
ग्राण्यवकर्षेत्।मयीतिचोच्चारयन्प्रतिसंदध्यात्।तेनावकर्षसंदधानेजपांगतत्कु
र्वतोविधानात्।समाप्यसामिधेनीरन्वाह।समाप्येत्यनेननमःप्रवक्त्रइत्यादेर्होत्रं

जुषध्वमित्यंतस्यैकजपत्वंदर्शयतितेनांतरायत्कार्यद्वयमवकर्षणंसंधानंचतज्ज
पकर्तुःसंस्कारएवभवतिनकार्यांतरं।अतःपित्र्यायांजपलोपेनकर्तव्यंभवति।अग्नेः
समिंधानार्थाऋचःसामिधेन्यः।ताअन्वाहअनुब्रूयादित्यर्थः।हिंमइतिहिंकृत्य
भूर्भुवःस्वरोमितिजपति।हिंकारस्यनानारूपत्वादिष्टपरिग्रहार्थःपाठः।एषोभि
हिंकारः।जपसहितस्यहिंकारस्याभिहिंकारइतिसंज्ञाविधीयते।भूर्भुवः।स्वरित्येव
जपित्वाकौत्सोहिंकरोति।एवेत्यवधारणान्नकेवलंत्वृऋममात्रंप्रणवरहितत्वंचे
तिदर्शयति।आचार्यग्रहणंविकल्पार्थंनचपूर्वंजपति।कौत्सइतिशेषः।पूर्वमिति
नमःप्रवक्त्रइत्यादिजुषध्वमित्यंतमित्यर्थः।अथसामिधेन्यः।प्रवोवाजाअभिद्यवो
ग्नआयाहिवीतयेगृणानईळेन्योनमस्यस्तिरोग्निंदूतंवृणीमहेसमिध्यमानोअध्वरे

समिद्धोअग्नआहुतेतिद्वौ।अथशाब्दंऋचामेवसामिधेनीत्वंदर्शयति।पूर्वंसामिधेनीग्रह
णंसामिधेन्याद्यंगानांमध्येभिहिंकारःसामिधेन्यादीनामासन्नतरमंगमितिदर्शयतिते
नवैश्वदेवशस्त्रेदिग्ध्यानोत्तरकालमभिहिंकारःकर्तव्यइतिगम्यते।ताएकश्रुतिसंतत
मनुब्रूयात्।याएताऋचाउक्तास्ताएवमनुब्रूयादित्यर्थः।उदात्तानुदात्तस्वरितानांपरः
संनिकर्षऐकश्रुत्यं।ऐकश्रुत्यलक्षयामुच्यते।उदात्तानुदात्तस्वरितानामभिव्यंजकाये
प्रयत्नाआयामविस्रंभाक्षेपास्तेषामन्यतमस्यैकस्यैवासंतसंनिकर्षेयासजातीयप्र
यत्नाव्यवधानेनयउच्चारणंतदैकश्रुत्यमित्यर्थः।स्वरादिमृगंतमोकारंत्रिमात्रंमका
रांतंकृत्वोत्तरस्याअर्धर्चेविवस्येत्तत्संततां।इदंसंततलक्षणं।स्वराद्यृगंतमोकारंपदयो
र्द्विपदेषूणेपलक्षणार्थत्वादृगंतोयःस्वरादिःस्वरएववाकेवलस्तमोंकारंत्रिमात्रंकृत्वा

तेन प्रणवेनोत्तरामृचं संधाय तस्या अर्धर्चे वस्येत्। मकारान्तं त्रिमात्रमिति सुक्रमेणायोज
नासमुदायस्य त्रिमात्रताया इष्टत्वात्। अत एवं भवति। ओंकारोऽर्धतृतीयमात्रः मकारोऽर्ध
मात्र इति त्रिमात्रत्वं प्रणवस्य। उत्तरवचनमावृत्तिनो नावृत्तिनश्चोभयथा गृह्यते। यत्प्रण
वेनोत्तरसंधानमात्रं विधीयते तत्संततमित्युच्यते। एतदवसानं सामिधेनीष्वनूच्याना
मृचामर्धर्चे वसानस्य पूर्वसूत्रेऽपोवासिष्ठत्वादिदमवसानविधनमाद्यायामृचि प्रापणा
र्थं। अन्यत्र च जपादिष्वपीति। उत्तरादानमविप्रमोहे। आदानमारंभः विप्रमोहो विश्लेषः
पूर्वस्योच्छ्वासस्याविप्रमोह एवोत्तरस्योच्छ्वासमारभेतेत्यर्थः। विप्रमोहे पूर्वमेव सम्यग्गृ
ह्यादित्यर्थः। अस्मिन्नश्लेष इदमेव प्रायश्चित्तं नान्यदिति सूत्रस्य प्रयोजनं। समाप्तौ प्रण
वेनावसानं। अर्धप्राप्तस्य विधानं विहित एवायमर्थो नार्थप्राप्त इत्येवमर्थं। चतुर्मात्रो व

श्रौ० वृ०
१२

सानो यदवसानं विहितमेव नार्थप्राप्तं तस्मिन्नवसाने चतुर्मात्रः प्रणवो न त्रिमात्रः। तस्यांता
पत्तिः। तस्य प्रणवस्य योंतो मकारस्तस्य वर्णांतरापत्तिर्वक्ष्यत इत्यर्थः। स्पर्शेषु स्ववर्ग्यमुत्तमं॥
स्पर्शेषु परेषु यः स्पर्शो मकारात्परः। तस्य स्ववर्ग्य उत्तममापद्यते मकारः। समिध्य सोंतमर्जयं
तेत्यादि निदर्शनं। अंतस्थास्वंतास्वनुनासिकां। रेफस्यानुनासिकत्वासंभवाद्यवला एवा
त्रांतस्थाग्रहणं तो तासु यायापरांतः स्थासु तामनुनासिकां मकार आपद्यते तत्रसानुनासि
काष्वबाउत्तेष्वुषा एव मत्र संयोगः। विद्थानि प्रचोदयों वाजीवाजेष्विति निदर्शनं। रेफोष्म
स्वनुस्वारं। एतेषु मकारोनुस्वारमापद्यते। अनुस्वारो नाम नासिकास्थानोस्पृष्टकरणाश्च।
अस्य यत्तस्य स्वक्के तां समिध्यमानो अध्वर इत्यादि। त्रिः प्रथमोत्तमे अन्वाहाध्यर्धकारं॥ १२
अध्यर्धकारमध्यर्धाक्षिकत्वेत्यर्थः। प्रथमोत्तमेक्ऋचौ त्रिरध्यर्धकारं ब्रूयात्। अध्यर्धामुक्त्वा वस्य

स्तो
रा

12

दथद्वे। प्रथमायामेवमध्यर्धकारं भवति पूर्वामध्यर्धामुक्त्वावसाय ततो द्वे ऋचौ ब्रूयात् द्वे इ
तिवचनमर्धर्चं चतुष्काभिमायं पूर्वस्मिं उच्छ्वासे प्रथमायामावृत्तौ द्वावर्धर्चौ द्वितीयामेकश्चे या
तित्रयोर्धर्चा उक्ता अस्मिंस्तूच्छ्वासे द्वितीयतृतीययोरावृत्त्योस्त्रयोर्धर्चा उत्तरस्याः ऋच एको
र्धर्च इत्येवं चत्वारोर्धर्चा वक्तव्या भवेयुः अध्यर्धकारविधेः उत्तरयासंधानाविरोधादिति।
अथशब्दोस्य सूत्रस्यान्यार्थत्व प्रातिभासनिवृत्त्यर्थः। द्वे प्रथममुत्तमस्यामथाध्यर्धां। पूर्वे
णासंधानाविरोधाउत्तमायामेवभवति। अथशब्दश्च पूर्ववत्। ताः पंचदशाभ्यस्ताभिः। एका
दृशानामृचां द्वयोस्त्रिरभ्यासे कृते ता अभ्यस्ताभिः सह पंचदशैव भवंतीत्यर्थः। प्राप्तएवा
यमर्थः। अस्य वचनस्येदं प्रयोजनं सर्वत्राभ्यस्ताभिः सह विहितसंख्यापूरणं कर्तव्यमिति।
ज्या एतेन शास्त्रयोनिगदानुवचनाभिष्टवनसंस्तवनानि। शंसत्यादिशब्दचोदितानि शस्त्रादि

श्रौ० सू०
१३
13

निभवंति। एते नेति सामिधेन्यनुवचनमुच्यते। शस्त्रादीनि च तत्र तत्र विहितानि तेषां धर्मापेक्षा
स्ति तत्रैते न तानीत्युक्ते एतद्धर्मकाणि तानीति गम्यते अनेन प्रकारेण तेषां सामिधेनीधर्मा
तिदेश उक्तो भवति। सर्वधर्मप्राप्तौ कतिपयधर्मनिषेधार्थमाह। नत्वन्यत्राध्यर्धकारं नज
पः प्रागभिहिंकारात् नाभिहिंकाराभ्यासावबकुभुप्रकृत्या। अन्यत्रेत्येतावदनुवर्तते
त(स्य) सामिधेनीभ्योऽन्यत्रेत्ययमर्थः। अतः पित्र्यायामभिहिंकारः सिद्धो भवति। अभ्यास
निवृत्त्यर्थं तत्रैव तद्ग्रहणं करिष्यति। तेनाभ्यासो न भवति। प्रकृत्येति शब्दोभ्यासेन ब
कुभ्यपि पुराभ्यासो अग्न यइत्येवमादिषु तयोरभावं दर्शयति। नावच्छेदादो। अवच्छेदो
नामयत्र शस्त्रादिषु मध्ये समाप्यावस्येदिति एवमादिभिः शब्दैरवसानं विहितं समाप्य
प्रणवेनेत्येवमादिषु सोवच्छेदस्तत्रापि तेनास्तः। शस्त्रेष्वेवं होत्रकाणामभिहिंकारः। ॥

१३

अस्मिंछास्त्रेमुख्यवर्जिताश्चादशर्त्विजोहोत्रकाइत्युच्यंतेनसप्तवात्रयोवातेनग्रावस्त
तोभिर्हिंकारनिषेधःसिद्धोभवति।सामिधेनीनामुत्तमेनप्रणवेनाग्नेमहाँ३असिब्राह्मण
भारतेतितिनिगदंवसाय॥२॥यजमानस्यार्षेयान्प्रवृणीतेयावंतस्युः॥प्रणवेननिगदंसं
धायनिगदेवस्येदित्यर्थः।तत्रावसायार्षेयान्प्रवृणीतेयावंतोयजमानस्यतेभवंतिते
चप्रवराम्नायेव्याख्याताः।परंपरंप्रथमं।अस्येमआर्षेयाइत्यंतःअयंपरअयमपरइ
त्येवमादिस्तत्रानुसारेणाप्रवराम्नायएववरणप्रकारःपठितःसएवइदानीमियंतोव
रीतव्याइत्थंवरीतव्याइतिविधानमन्यक्षेत्रजातद्व्यामुष्यायणार्थं।पौरोहित्यात्राजवि
शां।पुरोहितस्ययेआर्षेयास्तानेवराजन्यवैश्ययोःप्रवृणीते।बहुवचनंत्रैवर्णिकस्त्री
जातानामनुलोमानांसंग्रहार्थं।राजर्ष्यन्वारातां।मानवैलपौरूरवसेत्येवंवापौरोहि

त्वान्वा। सर्वेषांमानवेति संशये। अत्रानेसंशये च त्रयाणांवर्णानांमानवेत्ययंशब्दः प्रवरो
भवेत्। देवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितः कविशस्तोब्रह्मसंशितोघृताहवनः प्रणी
र्य[illegible]नांरथीरध्वराणामतूर्तोहोतातूर्णिर्हव्यवाळित्यवसायास्पात्रंजुहूर्देवानांच
मसोदेवपानोरांइवाग्नेनेमिर्देवांस्त्वंपरिभूरस्यावहदेवान्यजमानायेतिप्रैषपद्यंदेवता ति
द्वितीययाविभक्त्यादेशमादेशमावहेत्यावाहयत्यादिं कृत्वा वचनम्। निगदेवसायेतिनिग
दइतिसप्तमानिर्देशात्पूर्वापरीभूतोनिगदोनपरिसमाप्तइतिगम्यते। इतः प्रवरोपि
तस्येवविशेषणः। क्वचिन्मंत्राम्नायेभारतशब्दानंतरमसावसावितिप्रवरप्रकृतेः पठित
त्वाच्चसंबुद्धिसामानाधिकरण्याच्च। देवेद्धइतिनिवित्सदनिगदश्चतुर्दशानिवित्पदानि

परिभूरसिइत्येवमंतानि। आवहदेवान्यजमानायेत्यादिस्तुयजायजेत्यंतआवाहननिग

दः॥ सामिधेन्यादय एते मंत्राः आहवनीयाभिधायिनः। तत्र भारतेत्यवस्येत्। प्रवरांते चाग्नि
विस्रदानामेकादशे च। चतुर्दशे नावाहननिगदं संधाय यजमानायेत्यवस्येत्। प्रतिपद्या
वसायेत्यध्याहारात्। प्रतिपद्येति वचनमस्य वाक्यस्य प्रतिपत्तिसंज्ञाकरणार्थं। तेनाग्नि
ष्वात्तां प्रतिपद्यनंतरविधान एतन्न भवति। तत्र षष्ठित्वाद्देवतावक्ष्यमाणाद्द्वितीयया विभक्त्या
द्विशया द्विशयानंतरमावहेत्यावाहयति। आवहशब्दस्यादिं प्लावयन् द्वितीयाविधानं सर्वा
र्थं अत्र पाठाद्देवद्द्वितीयासिद्धेरिति। तेन देवतामाद्विधय प्रणुयाद्यजे चेत्यत्र द्वितीयैव भव
ति। विभक्त्यंतरविधाने तु तदेव भवति। आवह देवान् होत्रायावहावह जातवेद इत्येतेषु
त्रिषु प्लुतावसानेन स्तः। अग्न आवहेति तु प्रथमदेवतां। प्रथमदेवतायामयं विशेषः॥
तुशब्देन यष्टव्यदेवतावहशब्दयोर्मध्ये [illegible] गेनशब्दं ब्रूयात्। अग्निं सोममित्याज्यभा

श्रौ० सू० गो। याग योरिय माख्या तत्संबंधाद्देवतयोरपीति। अग्निमग्नीषोमाविति पौर्णमास्यां। विशे

१५ षाभावात्सोमयाजिनोसोमयाजिनश्च प्रधानदेवते एते। अग्नीषोमयोस्थान इंद्राग्नी अमावा

स्यायामसन्नयतः। पौर्णमास्याः प्रथमाम्नानात्सैव प्रथमं प्रयोज्या। स्थानशब्दः पौर्णमा

व स्या धर्माणां प्रथमसंबंधं दर्शयति। प्राप्तौ विशेषापि प्रयोगावस्थायां विशेषग्रहणादिति।

तेनेदं बोधितं भवति। असमाम्नातानामसति चोदनालिंगविशेषे पौर्णमासमेव तंत्र

मिति। दधिपयोभ्यां यागं कुर्वत्सन्नयन्नित्युच्यते। यो न संनयति। तस्येंद्राग्नी द्वितीया॥

इंद्र इंद्रं महेंद्रं वा संनयतः। संनयतो मावास्यायामिंद्रं महेंद्रं वा अग्नीषोमस्थाने आवाहयेत्।

अंतरेया हविषी विष्णुमुपांश्वैतरेयिणः। ऐतरेयिणः शाखाविशेषास्त एवमुपांशुयागं ध्यायिनः १५

उभयोरपि पर्वणो ॱ कंचनोपांशुयाजमेके नेच्छंति। अन्येषामप्युपांशूनामावहस्वाहाया

१४ रंतरेण हविषी इच्छंति। अग्नीषोमीयं पौर्णमास्यां वेस्सवममावास्यायामेके नैके कं चन। उभयोरपि पर्वणोः ४१

ह्प्रियाधामानीदं हविर्महोज्यायइत्यन्त्यैः। अन्येषामपीतिपित्र्यादीनामंगोपांशूनां संग्र
हार्थं। आवाहनादिषु चतुर्षु निगदेषु यान्युपांशुयाजसंबंधीनि षट्पदान्यावहादीनिते
षामुच्चैरिति संज्ञामात्रं विधीयते। तत्र स्वराण्युपांशोरुच्चानीत्यनेन सर्वेषामुच्चसंज्ञानां
तत्र स्वरो विधीयते। येन्ये तद्वचनाः परोक्षास्तानुपांशूच्चैर्वा। येन्य इति सर्वनाम्नः सन्निहि
तविषयत्वात्तेष्वेव निगदेष्विति गम्यते। तद्वचनाउपांशुयाजवचनाः परोक्षास्ते येषां
पदांतरसंनिधानादेव विशेषानिष्ठता वसीयते। न स्वतः। अजुषतादयः क्रियावचना
इत्यर्थः। तेषामुपांशुत्वं प्राप्तमनूद्यते उच्चैः संज्ञाविकल्पेन विधीयते। प्रत्यक्षमुपांशु।
यागं प्रति चोदितं देवतानामधेयं प्रत्यक्षमित्युच्यते तस्य प्राप्तमुपांशुत्वं नियमार्थं विधी
यते तस्यैवोपांशुत्वं भवेत्। उपांशुदेवतायाः प्राथम्येपि प्रथमदेवतायाः संबंधियोग्निश

त्वआवाहनस्विष्टकृल्लिंगदर्शयोर्नतस्यापीति। अत्राकिंचिदुच्यते। उपांशुयष्टव्यमितिवचनादु
पांशुत्वंयागधर्मतयावगम्यमानंतत्रासंभवादानर्थक्यात्तदंगन्यायेनतत्संबंधिनःश्रा
व्यान्परिगृह्यतिष्ठति। तत्रावहादीनामागुरादीनांचहोतायस्तादित्यस्यचोपांशुत्वंनिवर्त्य
तंत्रस्वरोनुज्ञातः परोक्षाणाममजुषतादीनांविकल्पेनतंत्रस्वरउक्तः प्रत्यक्षस्यविज्ञादेराद
द्यादीनांचोपांशुत्वनियमादन्यस्यसर्वस्यतंत्रस्वरेप्राप्तेयाज्यानुवाक्ययोरागुरादिभिःप्रा
णसंतानविधानादुपांशुत्वमेवेतिस्थितं। प्रतिचोदनमावाहनं। चोदनांचोदनांप्रतिप्र
तिचोदनं। चोदनादेवताचोदनायावत्योदेवताः चोदितास्तावत्यआवाहनानिभिन्नानी
त्यर्थः। प्रत्यावाहनमुपधृष्टासनिःश्वाससिध्यर्थंभेदसाधानं। सर्वाआदित्यस्यसकृदेकप्रदा
नाः। यत्रबहुभिर्हविर्भिरेकयायाज्ययाबह्वीभ्योदेवताभ्योयुगपद्यागाःक्रियंतेतएकप्र

दानायागाः। तत्संबंधाद्देवताअप्येकप्रदानाइत्युच्यंते सर्वाइति वचनं सर्वासां पृथगादेशा
र्थंआदिश्यवचनंसर्वाआदिश्यांते आवह शब्दप्रयोगार्थंसकृद्वचनमंतेऽपिसकृद्देववक्त
व्योनयावद्देवतमित्येवमर्थं। तथोत्तरेषुनिगमेष्वेकामिवसंस्कृतायात्। एकामिवेतिवच
नंयथैकस्यादेवतायाःपुरस्तात्स्वाहायाःशब्दोऽनुषक्तोऽयश्चैकवचनेनतथैतास्वपी
ति। समानांदेवतानांसमानार्थानांनिगमेष्वेकामिवसंस्कृतायादित्यत्रापिसंबध्यतेविशे
षाग्रहणात्। प्रयोजनवलात्संप्रदायाच्चसमानानामित्येकशब्दानामित्यर्थः। समानार्थामि
त्येकप्रयोजनार्थामित्यर्थः। अव्यवहितांसकृन्निगमेषु। अव्यवहितांअन्ययादेवत
यानिगमेषुसकृद्ब्रूयात्। एकवचनेनेव। ओंह्वास्वावापिकास्कदेवौआज्यपौआव
हाग्निंहोत्रायावहस्वंमहिमानमावहावहजातवेदःसुयजायजेत्स्वावात्ययथास्थितम्

श्रौ० सू० ध्वजानुरुपविश्योदग्वेदेस्तु त्यत्वानि भूमौ प्रादेशं कुर्यात्। अदितिर्माता स्यां तरिक्षान्माछे
२७ त्सीरिदमहमग्निनादेवेन देवतयात्रिष्टुता स्तोमेन रथं तरेण साम्ना गायत्रेण छंदसाग्नि ष्टो
मेन यज्ञेन वषट्कारेण वज्रेण यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति। आवापिका आवा
पोद्धारयोग्याः प्रधानदेवता इत्यर्थः। तास्कृतावाहनासु देवानामाज्यपानावाहयेत्॥
स्विष्टकृतं चापाठो नुनासिकत्वलाभाय नकारलोपाय च। होत्राया वह शब्दयोः स्विष्ट
य कृदावाहनप्रयोगो च। किंच। पठितावाहनानां पाठादेवोत्तरेष्वपि निगमेषु निगमनसि
द्धिर्लक्ष्यत इत्येनमर्थं आज्यपाः प्रयाजानुयाजदेवताः अग्नेर्होत्राया वह स्वं महिमानमा
वहेत्येता वत्स्विष्टकृदावाहनार्थं आवह जातवेदः सुयजा यज इत्यंतो निगदशेषः। आ २७
वात्य वचनं स्फ यजा यज इत्यंतस्य आवाहन निगदत्वाय सामिधेन्यर्थं यथाख्रितस्तथो

र्ध्वजानुरुपविश्यउदङ्मुखस्त्ववेद्यांस्तीर्णानितृणानिवेद्यांभस्मोपादेशंकुर्याददितिमंते
तिमंत्रेण।आश्रावयिष्यंतमनुमंत्रयेताश्रावयत्वंदेवेभ्यआश्रावयमांमनुष्येषुकीर्त्यैयश
सेब्रह्मवर्चसायेति।मद्वृणानंदेवसवितरेतंत्वावृणतेग्निंहोत्रायसहपित्रावैश्वानरे
णद्यावापृथिवीमांपातामग्निर्होताहंमानुषइतिमानुषइत्यध्वर्योःश्रुत्वोद्दायुषास्त्वा
शुषोद्दोषधीभनांरसेनोत्सर्जन्यस्यधामभिरुद्दरुणाममर्तांअन्विरक्षन्तिष्ठेत्।अध्वर्यु
ग्रहणामुत्तरार्थं।षष्टिश्चाध्वर्योनवतिश्चपाशा।अग्निंहोतारमंतराविच्छत्ताः।सिनंति
पाकमतिधीरः एतीलक्षशाय।ब्रूयादितिशेषः।नायमुत्थानमंत्रः।पूर्वेणैवनिरपेक्ष
त्वात्।अतईदृशोमंत्रोमंत्रसंतकः।कृतस्यपंथामन्वेमिहोतेत्यभिक्रम्यांसेध्वर्यु
मन्वारभेतपार्श्वस्थेनपाणिना [illegible]।अध्वर्युग्रहणेनप्रयोजनमभिक्रमणान्वा

श्रौ० वृ० प्र रंभयोर्ध्वर्योरिवाध्वर्युमेव कुर्यात्। न प्रतिरिष्ठातारमित्येतत्। जत्रुबाह्वोः संधिरंसस्तस्मिं देशेऽध्वर्यु

१८ मन्वारभेत पार्श्वस्थेन पाणिना पार्श्वे नितिष्ठतीति पार्श्वस्थः कनिष्ठिका प्रदेशेन स्थितः। नन्य

नो क्तो नानश्त्यर्थः। तेनान्वारभेताध्वर्युं आग्नीध्रमंकदेशेन सव्येन वा। सव्येन पाणिना

महे पार्श्वस्थेनांस एवांकेन ऊरुणा वा। इदमन्वारभेहोत्त्वूर्यधुरोहितं। येनायंनुत्तमंस्व देवा

अंगिरसोऽदिवमिति। उभयोः साधारणो मंत्रः। अतो नावर्तते नोत्यते च। संमार्गत्स्यो

स्त्रिरभ्यात्मं मुखं संमृजीत संमार्गोऽसि संमांमजया पशुभिर्म्रक्षीति इध्मसन्नहनानि

संमार्गशब्देनोच्यंते। अग्निसंमार्जनसाधनत्वात्तेषां। तैस्त्रिणेरभ्यात्मं मुखं संमृजीत

त्स्योरिति वचनात्तृयाभूतैरेव तैः संमृजीत नग्रंथिभूतैः पाशभूतैर्वेति गम्यते। अभ्या १८

त्ममात्माभिमुखं पाणितलमवाग पवर्गं च संमार्जनमिति। सकृन्मंत्रेणाद्विस्तूष्णीं सर्वं

त्रैवं कर्मावृत्तौ। सकृन्मंत्रेणाद्धिस्तूष्णीं इत्येतत्सर्वत्र भवत्येवं प्रकारस्य कर्मण आवृत्तौ स
त्यामिति। एवं प्रकारशब्देन संस्कारकर्मत्वमुच्यते। एतदुक्तं भवति। यत्र संस्कारकर्मण्यावृ
त्तिर्विधीयते। तत्र सकृन्मंत्रेणाद्धिस्तूष्णीमिति। प्रधानकर्मणि। स्पृष्टोदकं होतृषद
नमभिमंत्रयेत। अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीदयोस्मत्पा[illegible] कतर इति। होतृष
दनं अपरेणाक्तिष्ठत्वा प्राङ्मुखोभिमंत्रयेत। इदमुदकोपस्पर्शनं पूर्वांगं अग्निसंमार्जनत्
णैरासनो मुखसंमार्जनात्। आसनो यद्दो [illegible]तच्छान्यर्थत्वेनास्य दृष्टार्थत्वं भवति। अंगु
ष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरस्येन्निरस्तः परावसुरितीदमहम
र्वावसोः सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणा परस्थेन। दक्षिणं चरणं तदुत्तरं च दक्षिणो
त्तरं। तद्यानुपस्थो दक्षिणोत्तरीतेनोपविशेत्। एतेन निरसनोपवेशने सर्वासने सर्वेषा

श्रौ०सू०

१८

19

महरहःप्रथमोपवेशनेपिसमाने। एते इति प्रकार मंत्रविशिष्टयोर्ग्रहणार्थं। तेच सर्वेषां सर्वा
सनेषु प्रथमोपवेशने भवतः। नाद्वितीयादि प्रयोग इत्येकोर्थः। समानेप्यासने अहर्गणेष्वह
रहः प्रथमोपवेशने भवतः। समानेपिस्थाने प्रयोगान्तरे नो पुनः पुनरावर्त्येति प्रवर्ग्यादि
ष्वयं चापरोपि शब्दाल्लभ्यते। अस्य विधेर्दर्शपूर्णमास प्रकरणे पठितत्वात्तदतिदिष्टेष्वे
वेष्टिपशुसोमेषु भवतो नाग्निहोत्रादिष्विति। अंक धारयां भवत्येव। द्विरिति गौतमः। अस्या
चार्यस्य द्विः द्वितीयेपि प्रयोगे भवतीत्यभिप्रायः॥३॥ ब्रह्मौदने प्राशिष्यमाणो ऽग्न्याधेये ब्र
ह्मा द्विरित्यनुवर्तते क्रियमाणस्य कर्मणः दक्षिणत उपविष्टः सन् पुनः प्राशन काले द्वि
तीये निरसनोपवेशने कुर्यात्। अग्न्याधेये ब्रह्मौदने द्वितीय विधान सामर्थ्यादेव इष्टिपशु
सोमेभ्योन्यत्रापि ब्रह्मणो निरसनोपवेशन प्राप्तिरिति गम्यते। अग्न्याधेयग्रहणमस्य

अयमपरो
अर्थः ३

१८

पत्

मेथैं ब्रह्मौदनं तत्र नैव कर्तव्यमिति। बहिष्पवमानात् प्रत्येत्य सोमे। आहवनीयस्य दक्षिणा
त उपविष्टः सन् बहिष्पवमानं गत्वा ततः प्रत्येत्य पूर्वासने पुनः कुर्यात्। सोमग्रहणं सर्वेषु
सोमेषु प्रापणार्थं इतरथा धानाधिकारात् तत्संबंध एव सोमे स्यान्न सर्वसोमेष्विति। प्र
सृप्य होता। पश्चार्थमुपविष्ट एवासने सदः प्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्। होतृग्रह

गा

णं ब्रह्माधिकारनिवृत्त्यर्थं। स्रुक्प्रदापने पशौ। स्वाहाकृत्यर्थे स्रुगादापने पुनः कुर्यात्। न प
त्नीसंयाजिके। पत्नीसंयाजार्थ उपवेशने नैव कुर्यात्। नान्यत्र होतुरिति कौत्सः। होतुरन्ये
षामेतेन भवत इति कौत्सो मन्यते। उपविश्य देव बर्हिः स्वासस्थं त्वाध्यासदेयमिति। उप
विश्यानंतरं ब्रूयादित्यर्थः। अभिहिष होतः प्रतरां बर्हिषञ्ज्वेति जानुशिरसा बर्हिरुपस्पृ
श्यातऊर्ध्वं जपेत्। जानुशिरः जान्वग्रं अत ऊर्ध्वं ग्रहणमुपस्पृश्यातो न जपः स्यादिति॥

श्रौ॰ सू॰ तेनान्यत्रैवंरूपेशाब्दे सतिकुर्वन्नेवकुर्यात् इति गम्यते। अरणीसंस्पृश्य मंथयेदित्यर्थः॥ भूपत दि
२० येनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनमः प्राणंप्रपद्येपानंप्रपद्ये व्यानंप्रप
२० द्येवाचंप्रपद्येचक्षुःप्रपद्येश्रोत्रंप्रपद्येमनःप्रपद्यआत्मानंप्रपद्येगायत्रीप्रपद्येजगतीं त्रिष्टुभंप्रपद्ये
प्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्येसूर्योनोदिवस्पातुनमोमहद्भ्योनमोअर्भकेभ्योवि
श्वेदेवाःशास्तनमायथेहाराधिहोतानिषद्यायजीयोस्लद्द्येवाचःप्रथमंमसीयेतिस
माप्यप्रदीप्तइध्मेस्रुचावादापयेन्निगदेनासमाप्यप्रदीप्तेइल्कभयस्यस्रुगादापना
वसरप्रदर्शनार्थलाज्जपसमाप्तेरपिप्रदीप्तएवेतिगम्यते। अनेननिगदेनआदापये
दध्वर्युः। अग्निर्होतावेत्वग्नेर्होत्रंवेत्तुप्रावित्रंसाधुतेयजमानदेवतायोअग्निरित्यवसा। २०
यहोतारमवृणीथाइतिजपेत्। अवसायेतिवचनंनिगदमध्येउच्छ्वासलाभार्थंजपेदिति

निगदमध्येउपांशुत्वलाभार्थं। अथसमापयेद्धृतवतीमध्वर्युः स्रुचमास्यस्वदेवयुवंवि
श्ववारेईळामहेदेवाँईळेन्यान्नमस्यामनमस्यान्यजामयज्ञियानिति। अथेतिवचनम
न्त्रांशुष्ट्वासलाभार्थं। समाप्तिवचनमग्निर्होतेत्यादेर्यज्ञियानित्यंतस्यएकनिगदत्वसू
चनार्थं। समाप्तेस्मिन्निगदेध्वर्युराश्रावयति। अध्वर्युकर्मविधानंप्रत्याश्रावणस्येदं
निमित्तमिति ज्ञापनार्थंसमाप्तिवचनमाश्रावणेकृतेपिसमाप्तएवनिगदेप्रत्याश्रावणं
कुर्यात्। इत्येवमर्थं। प्रत्याश्रावयेदाग्नीध्रउत्करदेशेतिष्ठन्स्फ्यमिध्मसन्नहनानीत्या
दायदक्षिणामुखइतिधाणाध्यांयनकमस्त्तश्रौषट्वितोकारंप्लावयन्। शाद्यायनग्रहणं
विकल्पार्थं। अतःप्राप्लुतत्वमपिलभ्यतेप्लावयन्प्लुतंकुर्वन्नित्यर्थः॥८॥प्रयाजेश्चरं
ति। वक्ष्यमाणप्राब्लक्षणायागाःप्रयाजाइत्युच्यंते। तैश्चरंतियजंतीत्यर्थः। पंचैतेभ

ब्राह्मणं
रव

श्रौ० सू०
२१

वंति। पंचवचनं नराशंसः तनूनपाद्वा द्यामुष्यायणस्यापि पंचैव भवंति नषाड्वि त्येवमर्थं॥
एत इति वचनं अतः पठिता एवैते तनूनपान्नराशंसयोरन्यतरेण सह पंच भवंति। नापाठ
तेन सहेत्येवमर्थं। एकैकं प्रेषितो यजति। न सकृत्प्रेषितः सर्वान्यजति। आग्नेयाज्यादिर
नुयाजवर्जं। सर्वत्र सर्वासामनुयाजवर्जितानां याज्यानामाद्यावागूर्भवति। कोयमागूरि
त्याह। ये यजामह इत्यागूः। वषट्कारोंत्यः सर्वत्र। अनुयाजानामपीति सर्वत्र वचनं। उच्चै
स्तरां बलीयान्याज्यायाः। अत्रोच्चैस्तरत्वमेकयमातिशयमात्रं बलीयस्त्वं व्यक्ततरोच्चा
रणमेतदुभयं याज्याया एव। तयोरादीप्लावयेत्। तयोरागूर्वषट्कारयोराद्योः प्लुतिः का
र्या। याज्यांतं च। प्लावयेदिति शेषः। विविच्य संध्यक्षराणामकारं नचेद्द्वैवचनो व्यंजनांतो
वा। न चेत्प्रगृह्य इति पठितव्येन चेद्द्वैवचन इति प्रमादपाठः। ऋगंते यानि अप्रगृह्याणि

२१

संध्यक्षराणि। तानि विविच्याकारमेव प्लावयेदिति एकारैकारयोः आइति। ओकारौकारयोः आउ। इत्येवं विविच्य प्लुतिः कार्या। ज्येष्ठश्च मंत्रो विश्वचर्षणा ३ इवौषडित्यादि दृष्टांतः। इं ३ ऊँ समत्यन्नीतये समस्मा ३ इवौ इति निदर्शनं। एकारस्य प्रगृह्यस्य स्वरूपेणैव प्लुतिः कार्या। अधि श्रियं शुक्रपिशं दधाने ३ औ ३ इत्यादि दृष्टांतः। ओकारस्य प्रगृह्यसंज्ञाया अनित्यत्वान्नित्यानित्यसंयोगविरोधात्तस्य सर्वदापि विविच्यैव प्लावनं कर्तव्यं। कविः कविमियक्षसि प्रयज्या ३ उ वौ इत्यादि निदर्शनं। तथैव औकारस्यापि सहस्त्रवल्शं यो विभृथः सहस्त्रा ३ उ वौ इति। व्यंजनांतानां संध्यक्षराणां सर्वदा स्वरूपेणैव प्लुतिः कार्या। न विवेकः कर्तव्यः। त्री पि पदा ३ धारयान्वौ ३ षडित्यादि दृष्टांतः। विसर्जनीयोऽनन्त्यक्षरोपधो रिफ्यते॥ अनन्त्यक्षरोपधः। अनवर्णोपध इत्यर्थः। स वषट्कारेण संधीयमानो रिफ्यते। पिबासो

श्रौ॰ सू॰
२२

ममभियमुग्रतर्दः। शंवोभीर्वौ ३ इत्यादिनिदर्शनं। इतरश्चरेफी। इतरः अवर्णोपधः सचरेफी
संज्ञाचेतरिष्यते। महोपेवर्ज इतरोयथोक्तमित्यत्ररेफीसंज्ञाधिगंतव्या। उतत्यंचमसंनवं
पुनावौ ३ इत्यादिनिदर्शनं। लुप्यतेरेफी। अवर्णोपधोयोविसर्जनीयः रेफिसंज्ञश्चनभ
वतिसलुप्यतएववषट्कारसंधौ। अर्वाङेहिसोमकाम॰ हूयमानावौ ३ इत्यादिनिदर्श
नं। प्रथमः स्वंतृतीयं वर्गाणां योयः प्रथमः सस्वंतृतीयमापद्यते। चिदर्वाग्वौ॰ उदा
हृतिः। नित्यंमकारे। अंतस्थास्फुतांतामित्यनेनोक्तमित्यर्थः। ये ३ यजामहेसमिधः समि
धोअग्नआज्यस्यव्यंतु ३ वौ ३ षडिति वषट्कारः। वौषट्शब्दोवषट्कार इत्यर्थः। इति
प्रथमः। अयंप्रथमः प्रयाज इत्यर्थः। वागोजः सहओजोमयिप्राणापानावितिवषट्का
रमुक्त्वोत्क्वानुमंत्रयते। सर्वस्यायंविधिः स्यादित्येवमर्थावीप्सा। द्विवाकीर्त्येविषट्कारः। २२

द्वथारात्रौ न प्रयोक्तव्य इत्यर्थः। किंच वषट्कारसंबंधि यत्कर्म तद्धि ध्यंतराविरोधेस
ति दिवैव कर्तव्यमिति। तथानुमंत्रणं। दिवाकीर्त्यमित्यर्थः। तच्चोक्तार्थमेव। एतद्या
ज्यानिदर्शनं। यदिदं याज्यायाः पुरस्तादागूः तस्याश्चादौ याज्यांते च प्लुतिः स्यात्। उ
परिष्टाच्च वषट्कारस्तस्य चादौ प्लुतिस्ततोनुमंत्रयामित्येतद्याज्यास्वरूपनिदर्शन
मनुमंत्रणस्य याज्यांतर्भाववचनं तदंतं वाग्यमनार्थं। तनूनपादग्न आज्यस्य वेत्वि
ति द्वितीयोन्यत्र वसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः। वसिष्ठादिभ्योन्येषामयंद्वि
तीयः। नराशंसो अग्न आज्यस्य वेत्विति तेषां। वसिष्ठादीनामयं द्वितीयः। इडो अग्न
आज्यस्य व्यंत्विति तृतीयः। सर्वेषामिति शेषः। बर्हिरग्न आज्यस्य वेत्विति चतुर्थः॥
आगूर्य पंचमे स्वाहामुं चास्वाहामुमिति यथावाहितमनुद्रुत्य देवता यथा चोदितमना
सांहितिकतया पठितानामाद्यंतत्राय नार्थंन द्वितीयादिग्रहणं। देवादयोनुयाजावीतवत्पदांता इतिवत्। २

वाहिता स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यंत्विति। पंचमे एवं कृत्वा तेनैव यजेदिति
शेषः। आग्नेरो विधानं क्रमार्थं प्रति देवतां स्वाहाशब्दाभ्यासार्थं वीप्सावचनं॥ यथावाहित
ग्रहणं प्रमादाद्वा वाहिताया अस्थानिन्या अपि ग्रहणार्थं अनावाहिताइत्येतत् याः स्थानि
न्योपि देवताः प्रमादादनावाहिताः स्युस्तासामप्यत्र यथा चोदिते क्रमे निगमनार्थं॥ प्रया
जाद्यनुयाजांतेत्यादिषु यथाचोदितं तदीयानां देवतानां निगमार्थं च इदमेव प्रकारद्व
यमनावाहितग्रहणात् गृह्यते॥ नान्यथा॥ यथावाहितग्रहणेन पठितावाहिनानगृह्यंते॥
तासां पाठादेव निगमनं नान्यथेत्यर्थः। स्वाहादेवा इति यथा सूत्रमंत्रशेषः। आतो मंद्रे
णा। इतः पूर्वं यत्तन्मंद्रेण प्रयोक्तव्यं। अत्र पूर्वविधेरभावादन्यत्रैतत्सर्वमाग्निमंथनादि
यद्भवति तदपि मंद्रेणा प्रयोक्तव्यमिति गम्यते। त्रीणि वाच स्थानानि मंद्रमध्यमोत्तमसं

त्तकानि। तेषु सप्तसु सप्त यमा भवंति। यमानामावरूढाः तत्र सप्तमयमेन वषट्कारः प्रयो

न्यूनता क्तव्यः। ततएकावरोहेण याज्या। एवं सर्वत्र एकैकयमावरोहेण वषट्कारः प्रयोक्तव्यः। ऊर्ध्वं आधिक्यं

वशंयुवाकात् मंद्रेण प्रयोक्तव्यं। मध्यमेन हवींष्यास्विष्टकृतः। सर्वत्रा[illegible]कारोभिविधा

वेवात्र त्वभिविधौ मर्यादायां वा भवत्यध्वर्युवशात्। अत्रास्विष्टकृत् मध्यमेनोत्तमेन वा

ध्वर्युवशात् प्रयोक्तव्यं। प्रयाजेभ्य ऊर्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः। हविर्ग्रहणं स्थानां

तरेपि प्रधानहविषां मध्यमस्वर एवेति। उत्तमेन शेषः। इडादिः स्विष्टकृदादिर्वा शंयुवा

कांतः शेष इत्युच्यते स उत्तमेन प्रयोज्यः। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्या

नुवाक्या। त्वं सोमासि सत्पतिरित्युत्तरस्य जुषाणोग्निराज्यस्य वेत्विति पूर्वस्य याज्या जु

षाणः सोम आज्यस्य हविषो वेत्वित्युत्तरस्य। तावागर्यादेशं यजति। तावित्याज्यभाग

संप्रत्ययार्थं। आग्नेयीति देवतादेशस्य क्रमविधानार्थं यजतीति देवतादेशस्य याज्यासंधा
नार्थं। तावाज्यभागसंज्ञकौ याग। वाग्न्यानंतरं द्वितीयया विभक्त्या देवतामादिश्यादिश्य या
ज्यया संधाय यजतीत्यर्थः। सर्वाश्चानुवाक्यावत्यो प्रैषा अन्याअन्वायात्याभ्यः। याअन्वा
यातशब्देनानुनिर्वापशब्देन वा चोदिताः ताअन्वायात्याः। ताभ्योन्या देवताअनुवाक्या
वत्यो प्रैषाश्च ताः सर्वा आदिश्य यष्टव्याः। अन्वायात्यानामनुवाक्यारहितानां च प्रैषाणां
चादेशो न कर्तव्य इत्यर्थः। सर्वाग्रहणमाज्यभागयोरपि सप्रैषयोरादेशनिवृत्त्यर्थं। सौमि
कीभ्यश्च याअंतरेण वैश्वानरीयं पत्नीसंयाजांनांत छब्द चोदितानामेव ग्रहणं युक्तं। अत
एतस्मिन्नेवासने वैश्वानरीयस्य यजतीत्येतदेव गत्यते पत्नीसंयाजेष्वरित्वा वभृथ्यंत्र
जंतीति एतदेव चा। अन्या इत्यनुवर्तते। अंगप्रधानरूपे सोमकर्मणि यो नौ वैश्वानरीयप
२ ×श्चा सौमिकीभ्यः सोमे उत्सन्नाः न सोमे प्रयोज्या अपि तत्रोत्सन्नानामेव तत्र भवत्वसंभवात्। वैश्वानरीयपत्नीसं ×२
याजा ×२

त्तीसंयाजशब्दचोदितौपदार्थैतियोर्मध्येयास्तत्रैवोत्संनादेवतास्ताभ्योप्यन्यादेवताआ
दिश्ययष्टव्याः।नताआदिश्ययष्टव्याइत्यर्थः।एतौवात्रैग्नौपौर्णमौज्यभागौतौवात्रैग्न
संज्ञौभवतइत्यर्थः।सनिमित्तेयंसंज्ञेत्याह।अनुवाक्यालिंगाविशेषान्नामधेयान्यत्वात
तोविचारः।अनुवाक्यातएववविचारोवगमोन्यत्वमित्यर्थः।नित्येयाज्ये।उक्तेएवैतेसर्व
त्रयाज्येनानुवाक्यावदेतयोरन्यत्वमित्यर्थः।वृधन्वंतावमावास्यायां।अग्निःप्रत्नेनम
न्मनासोमगीर्भिष्ट्वावयामिति।आतोवाग्यमनं।आदितआरभ्याज्यभागपर्यंतंवाग्यम
नंभवति।अंतराचयाज्यानुवाक्ये।निगदानुवचनाभिष्टवनशास्त्रजपानांचारभ्यासमा
प्तेः।अत्राभिष्टवनंसंस्तवनशास्त्रेतिसंस्तवनशाब्दःपठितव्यः।आरभ्येतिवचनमन्यद
पियत्याज्यादिभ्यस्तदारभ्यासमाप्तेर्वाग्यमनसिध्यर्थं।हेतुरधिकारात्कर्त्रैतरस्यापिप्रा

पणार्थं चेति। अन्यत्र तस्य साधनात्। यत् तस्य साधनवचसोन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनवचो नाम यज्ञसंपादनार्थं तद्द्रेषपरिहारार्थं च। आपद्यातो देवा अवंतु न इति जपेत्। आपद्येति नियममतिक्रम्येत्यर्थः। अपि वान्यां वैष्णवीं। अन्यामपीति वचनं पूर्वोक्ताया अपि वैष्णवीत्वप्रतिपत्त्यर्थं॥ ५॥ उक्ता देवतास्तासां याज्यानुवाक्या अग्निर्मूर्धा भुवो यज्ञस्याथ मग्निः सहस्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतामग्नीषोमा सवेदसा सुवमेतानि दिवि रोचनानीन्द्राग्नी अवसागतं गीर्भिर्विप्रः प्रमतिमिच्छमान एंद्र सानसिं रयिं प्रससाहिषे पुरुहूत शत्रून्महाँ इंद्रो य ओजसा भुवस्त्वमिंद्र ब्रह्मणा महानिति य धग्नीषोमा य उपांशुयाजोग्नीषोमावायो अद्य वामान्यं दिवो मातरिश्वाजभारेति। उक्तसंकीर्तनं देवताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्यमाणाल्लिंगक्रमाभ्यां योजनीया इति॥

इदमपिउक्तसंकीर्तनस्यप्रयोजनं।यत्रदेवताविधानानंतरमृचोविधीयंतेतत्रनासांदेव
तानांनाएवयाज्यानुवाक्याइतिसार्वत्रिकोयंविधिरित्येतत्ज्ञापयितुं।अयमग्निरितिगा
यत्र्यपियाज्यानंतरमुक्तत्वाद्याज्यैवभवति।सातुगायत्रीसामान्याद्दधानएवभवति।य
द्यग्नीषोमीयइतिसूक्तस्यांतेपठनं।असंशयार्थमुक्तचानाचार्यैः।अथस्विष्टकृतः।पिप्रीहि
देवाँउशतोयविष्ठेत्यनुवाक्या।अथशब्दः।प्रधानानंतरंस्विष्टकृतोयागःस्यान्नावाहन
क्रमेणेति।अनुवाक्यावचनंसर्वत्रपूर्वमनुवाक्यापश्चाद्याज्येतिप्रदर्शनार्थं।येउयजा
महेग्निंस्विष्टकृतमयाळग्निरित्यक्त्वाषष्ठ्याविभक्त्यादेवतामादिश्यप्रियाधामान्या
ब्धित्यपसंतनुयात्।आगूर्विधानंनिगदादावेवस्यान्नऋगादाविति।अग्निंस्विष्टकृत
मितिवचनंअग्निहोत्रायशब्देनादेशोनस्यादिति।षष्ठीविधानंद्वितीयायानिवृत्त्यर्थं।देव

श्रौ॰ सू॰
२६

तामादिश्य प्रियाधामानि शब्दमुपसंतनुयात्। अयाड्शब्दः पूर्वं पठित एवोत्तरेण सूत्रेण तस्यास्तस्या देवतायाः पुरस्तादतिदेशरूपेण विधीयते। देवताया उपरिष्टाद्विधीयमानेन प्रियाधामानि शब्देन संधानार्थं प्रियाधामान्ययाळिति संततं पठितं। अतोऽत्र प्रतिदैवतमेक एवायाड्शब्दः प्रयोक्तव्यो नाद्वितीय इति स्थितं। एवमुत्तरा अयाळयाळिति त्वेवतासां पुरस्तात्। उत्तरासामयं विशेषः अयाड्शब्द एव तासां पुरस्तात्प्रयोज्यो नाग्निशब्दोऽपीति। एतदुक्तं भवति। प्रथमदेवतायाः पुरस्तादयाळग्निशब्दः उत्तरासामयाड्शब्द एवैः सर्वासामुपरिष्टात्प्रियाधामानिशब्दः। सर्वैश्च संततावक्तव्या इति। आज्यपांतमनुक्रम्य देवानामाज्यपानां प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सोऽअध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशोऽअध्वरस्य होतरित्यनवानं यजति। आ

२६

ज्यपांतमितिप्रसिद्धक्रमसंग्रहाद्दावाहनक्रमोत्रापिपरिगृह्यतेतेनाऽऽस्थानिन्यानिगमन
मिहापिस्यात्।आज्यपांतमेवमुक्त्वातदनंतरेणाग्नियाधामानिशब्देनयद्यदितिसंधाय
यथासूत्रमुक्त्वाजुषतांहविरग्नेयद्येत्यनानुद्रवसन्यजेत्।सर्वत्रानुद्रावः कर्तव्यो
स्यांयाज्यायांप्रकृत्यावा।अर्धर्चेवोद्रवसेत्।६।।प्रदेशिन्याः पर्वणीउत्तमेअंजयित्वोष्ठ
योरभ्यासंनिमार्ष्टि।प्रदेशिनीनामांगुलिविशेषः।पर्वणीपर्वसंधी।उत्तमेइत्यग्रतोद्वे
पर्वणीइत्यर्थः।अध्वर्युपात्रेपर्वणीअंजयित्वाअभ्यासंपाणितलंकृत्वऊष्ठयोरवाग
पवर्गंनिमार्ष्टि।वाचस्पतिनातेहुतस्येषेप्राणायप्राश्नामीत्युत्तरमुत्तरेमनसस्पतिना
तेहुतस्योर्जेपानायप्राश्नामीत्यधरमधरे।अनेनैकस्मिंनित्यनयोरित्यर्थः।स्रुक्छोदकमं
जलिनेत्वांप्रतिगृह्यसव्येपाणौकृत्वापश्चादस्याउदगंगुलिंपाणिमुपधायावांतरेळा

श्रौ० सू० २७ 27

मवदापयीत॥ द्विहस्तयोरंजलिः तं कृत्वा तेन इडां गृहीत्वा सव्ये पाणौ कृत्वा निधायेत्यर्थः॥
अस्या इती इडाया इत्यर्थः। या हस्ते वदीयते सा वांतरेडा। अवदापयीताध्वर्युः। अंतरेणांगुष्ठ
मंगुलीश्च स्वयं द्वितीयमाददीत। अंगुल्यंगुष्ठयोर्मध्येन प्रदेशेन स्वयमिडाया अवांतरे
डार्थमाददीत। प्रत्यालब्धामंगुष्ठेनाभिसंगृह्य प्रत्याहृत्य॥ प्रत्यालब्धां स्पृष्टामध्वर्युणा
चेत्यर्थः। अंगुलीरमुष्टिं कृत्वा दक्षिणत इडां परिगृह्यास्यसंमितामुपह्वयते प्राणासं
मितां वा। अमुष्टिं कृत्वा। अंगुलीभ्यो बहिरंगुष्ठमकृत्वेत्यर्थः। सव्ये हस्ते निहितामिडां
हस्तेन दक्षिणेन गृहीत्वा वांतरेडां तां दक्षिणतः परिगृह्य आस्यसंमितां प्राणसंमितां वेडां कृ
त्वा तामुह्वयते। प्राणसंमितां नासिकासंमितामित्यर्थः। इडोपहूता सह दिवा बृहता दि २७
त्येनोपास्मां ऽ इडा ह्वयतां सह दिवा बृहता दित्येनेडोपहूता सह अंतरिक्षेण वामदेव्येन वायु

नोपास्माँऽइडाह्वयतांसहांतरिक्षेणवामदेव्येनवायुनेडोपहूतासहपृथिव्यारथंतरेणा
ग्निनोपास्माँऽइडाह्वयतांसहपृथिव्यारथंतरेणाग्निनोपहूतागावःसहाशिरउपमांगा
वःसहाशिराह्वयंतामुपहूताधेनुःसहऋषभोपमांधेनुःसहऋषभाह्वयतामुपहूता
गोर्घृतपद्युपमांगोर्घृतपदीह्वयतामुपहूतादिव्याःसप्तहोतारउपमांदिव्याःसप्तहोता
रोह्वयंतामुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहूतेडाइहिरुपमामिडा
हृष्टिर्ह्वयतामित्यपांश्वथोच्चैः॥ इडोपहूतोपहूतेडोपास्माँऽइडाह्वयतामिडोपहू
तामानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याअध्वर्यवउपहूताउपहू
तामनुष्याः॥ यइमंयज्ञमवान्येचयज्ञपतिंवर्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरी
देवीदेवपुत्रे॥ उपहूतोयंयजमानउत्तरस्यांदेवयज्यायामुपहूतोभूयसिहविष्करणइदं

न निगदानां तंत्रस्वरत्वाद्यास्मानुपांशुत्वं विधीयते। तेनैकश्रुसमनुपरतमेवेति स्थितं। अथो श्रेरित्युने २

मे देवा हविर्जुषंतामिति तस्मिन्नुपहूत इति। इडोपहूता सह दिवेत्यादिना तस्मिन्नुपहूत इत्यं
तेनोपकृष्यते इति उपांश्वित्यनेनोत्तरस्य निगदभागस्य तंत्रस्वरानपगमः कथ्यते। प्राप्तत्वा
न्नाशुर्वो विधीयते। अतः तस्मिन्ननुच्यमाने संशयः स्यान्निगदमध्ये उपांशुत्वमुच्यमा
नं किं सर्वस्य निगदस्य। आहोस्वित्पूर्वस्य भागस्यापरस्य वेति। अस्मिंस्तूच्यमाने पूर्वस्यै
व भागस्योपांशुत्वं विहितं भवति नोत्तरस्य भवतीति नात्र संशयः। इडोपहूता। मनुष्याः।
देवी देवपुत्रे। इति त्रीण्यवसानानि। उपहूयावांतरेडां प्राश्नीयादिडे भागं जुषस्व नः पि
न्व गा जिन्वार्वतो रायस्पोषस्योशिषे तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि। स
र्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषा इति वा। उपहूयेत्यनूच्यमाने
हविर्जुषंतामिति निगदांतः स्यात्। तस्मिन्नुपहूत इत्यवांतरेडाभक्षणमंत्रः स्यादिडे भा

गमितिवाजयोर्विकल्पार्थो वाशब्दः। सर्वपूरुषाः सर्वपुरुषा इति पदद्वयविशिष्टश्चमंत्र
इत्येते द्वे षाः स्युः। एतस्मिंस्तूच्यमाने तस्मिन्नुपहूत इत्येवमंतो निगदः स्यात्। पूर्व इति शब्दो
निगदैकदेशः स्यात्। वाशब्दश्चमंत्रावयवविकल्पार्थ एव स्यात्। सर्वपुरुषा इत्यंत इति श
ब्दान्नैतावानेव च मंत्रः स्यात्। इत्येवं सर्वसमंजसं भवति। होतावांतरेळां भक्षयित्वा इळा
मपि भक्षयेत्। सर्वे च सयजमाना इळां भक्षयेयुः। इळा सर्वेषां इति पशुविभागे दर्शनात्।
शास्त्रांतरे च यजमानं पंचमा इळां भक्षयेयुरिति दर्शनाच्च॥७॥ मार्जयित्वानुयाजैश्चरं
ति। मार्जनमिळाभक्षणांगं पित्र्यायामिळाभक्षणाभावे मार्जनस्याप्यभावदर्शनात्। भ
क्षयित्वा मार्जने दृष्टश्चोपकारोस्ति शुद्धिर्नामा॥ अत इळांतकर्मस्वपि मार्जनमस्त्येवाने
तदनुयाजांगं चतुर्धाकरणादक्षिणादानाभ्यां व्यवहितत्वात्। पित्र्यायामनुयाजसत्ता

याममपि तदभावदर्शनाच्चेति। अतो मार्जयित्वानुयाजेश्चरंतीति वचनं चतुर्धाकरणदक्षिणानं दा
योरनित्यत्वसूचनार्थं। तथान्यनाग्नेयेषु चतुर्धाकरणं नास्ति। अंगभूतेषु च दक्षिणादानं ना
स्ति। परिस्तरणेषु रंजलिमंतर्धायाप आसेचयते तन्मार्जनं। आहवनीयपरिस्तरणैः भक्ष
णार्थं निष्क्रम्य पुनः प्रविष्टानां प्रथमप्राप्तत्वात्तेषामासेचयते। अपः सहकारिण्या देवाद
योनुयाजाः। देवादयो देवशब्दा इत्यर्थः। पुनरनुयाजग्रहणं उत्तरस्य सूत्रस्य प्रयाजानुयाजा
र्थत्वाय। वीतवत्या दांताः। वीतवत्यदांतत्वं प्रयाजानुयाजयोर्गुणः स्यात्। त्रयः। तेनुयाजास्त्र
यो भवंति। एकैकं प्रेषितो यजति। देवान्यजेति प्रथमसंप्रैषस्य सर्वार्थत्वे सत्यपि पुनः प्रैषि
त एव यजेत्। इमेनुयाजाः। देवं बर्हिर्वसुवने वसुधेयस्य वेतु। देवो नराशंसो वसुवने व

सुधेयस्य वेतु। देवो अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः सत्यमन्मायजी होता होतुर्होतु

श्रौ० द० ३० 30

निसर्वाणिनिगदे। अत्रतुप्रथमाविधानंद्वितीयानिदृत्यर्थोआदिवीत्यत्रावसायप्रथमयावि
भक्त्यादिश्यदेवतामिदंहविरित्युपसंतनुयात्। एवमुत्तराः। उत्तराअपिदेवताआदिश्यइदंह
विरित्येवमुपसंतनुयात्। अक्रातामक्रतेतियथार्थं। द्विदेवतबहुदेवतयोरेवमूहः कर्तव्यः
यथार्थवचनं अर्थवशेनाभिधानं इत्येवमर्थं॥ उक्तमुपांशोः। आहवहस्वाहेत्युक्तमित्यर्थः।
उक्तस्यवचनमस्यनिगदस्यपशाववपीष्टिवदेवप्रयोगार्थं। नसूक्तवाकप्रैषवदजुषतादी
नांउपांशुत्वंविधीयते। आवापिकांतमनुद्रुत्यदेवाआज्यपाआज्यमजुषंतावीवृधंतम
होज्यायोक्रतागिर्होत्रेदंहविरजुषतावीवृधतमहोज्यायोकृत। अस्यामृधेहोत्रायांदेवं
गमायामाशास्तेयंयजमानोसावसावृत्यस्याद्विश्यनामनीउपांशुसंनिधोगुरोरायुराशा
स्तेसुप्रजास्त्वमाशास्तेरायस्पोषमाशास्तेसजातवनस्यामाशास्तउत्तरांदेवयज्यामाशास्ते

नं ३०

भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्या
त्तदृध्यात्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः इष्टं च वित्तं चोभे च नो
द्यावापृथिवी अंहसस्पातामेह गतिर्वामस्येदं नमो देवेभ्य इति ॥ आवापिकांतमित्येतदा वा
पिके देवताक्रमप्राप्त्यर्थं । तेनाख्यानानि न्यत्रापि निगद्यते । देवा आज्यपा इति यथा सूत्रं ॥
असावसावित्यत्र यजमाननामनी प्रथमया विभक्त्या निर्दिशेत् । सांव्यवहारिकं नाक्षत्रं च ।
होतुर्गुरुश्चेद्यजमानः स्यात्तत्संनिधौ उपांशु नामनी ब्रूयात् ॥ २ ॥ यंस्तु वा काय संप्रेषितस्त
ंयोरावृणीमह इत्याहानुवाक्यावदप्रणवां । अनुवाक्यावद्वचनमेकश्रुत्यप्रापणार्थं ।
अप्रणवामिति प्रणवो निषिध्यते । वेदमस्मै प्रयच्छत्यध्वर्युः । वेदग्रहणकालज्ञापनार्थ
मेतत्सूत्रं । अतोऽध्वर्युणा दत्ते गृह्णीयात् । अदत्तेपि स्वयमेव गृह्णीयात् । तं गृह्णीयाद्दे

सिवेसोविदेयेति। तमिति विस्पष्टार्थं। यदा दोषेर्वेदीं दद्यात्तदा तं तं गृह्णीयादित्यर्थः। यदि दो
षु गपद्दद्यात्तदोहेन मंत्रं ब्रूयात्। वरुणप्रघासादिषु। उदायुषेत्येतेनोपोत्थाय पश्चाज्जार्ह
पत्यस्योपविश्य सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमित्याज्येन यजंति। एतेनेति वचनं
प्रकृतिविकारभावेपि कृत्स्नस्य मंत्रस्य प्रापणार्थं। आज्यवचनं यत्राज्येन सोमइ[?]ज्यते म
तत्रैते याज्यानुवाक्ये भवतः। नान्यहविष्के सोम इति। यजंतीति वचनं याग एव तासां दे
वतानां। न निगमेष्वनुवृत्तिरिति। आप्यायस्व सम्मेतु ते सं ते पयांसि समु यंतु वाजा इह
त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु देवानां पत्नीरुशतीरवंतु न इति। अग्निर्होता
गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः। इदं संख्याविधानार्थं॥

अथ प्रजाकामो राकां सिनीवालीं कुहूमिति प्राग्गृहपतेर्यजेत। अथशब्दः पक्षांतरपरि

ग्रहार्थः। अथ चेद्यजमानः प्रजाकामः स्यात्तद्देवतायजेतेति। प्राग्गृहपतेरिति देशविधा
नेन पूर्वाभिः समुच्चयं दर्शयति। राकामहं सिनीवालि कुहूमहमिति द्वे याज्यानुवाक्ये। या
ज्यानुवाक्यावचनं प्रजाकामो यजेतेत्यनेन यजमाने संनिहितेपि होतैव कर्ता स्यादिति। या
ज्यानुवाक्ययोर्होतृकर्तृत्वं अन्यतः प्रसिद्धमिति॥ कुहूमहमिति गृहीतेपि स्वयमेव प्रतीके
ठति। कुहूमहं सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पि
तृणां तस्यै ते देवि हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः शृणो
तु। संदाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधात्विति। आज्यं पाणितलेनैव दाप
यीत स्रुवमुपहत्य सर्वं प्राश्नीयात्। पूर्वं जिना द्युपक्वानां तं कार्यं नात्र अवान्तरेडा पाणित
लस्थमाज्यमिडेत्युच्यते। शंस्रुवाको भवेन्नवा। आज्येडायाऊर्ध्वं शंस्रुवाको भवति॥

श्रौ० सू० वृ०
३२

नभर्वेति र्त्विग्ध्वर्यूणां संख्या प्रकाराः संतीति तत्सूचनार्थमेतत्सूत्रं। यदि स्यात्होतापि तथा कु
र्यादित्येवमर्थं ॥१०॥ वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा वेदोसि वित्तिरसि विदेय कर्मासि
करणमसि क्रियासि सनिरसि सनिता सि सने यं घृतवंतं कुलायिनं रायस्पोषं सहस्त्रिणं वे
दो ददातु वाजिनं॥ यं व हकउ पजीवंति यो जनानामसद्वशी। तं विदेय प्रजां विदेय कामाय त्वे
ति। पत्न्यै वेदं प्रदाय तां वाचयति होताध्वर्युर्वा। वेदोसीत्यादि कामाय त्वेत्येवमंतं यथा
सूत्रं। वाचनमंत्रस्योच्चैः प्रयोगोर्थात्सिध्यति। कार्यं तु लिंगजनितमेव। वेदशिरसा नाभि
देशमालभेत प्रजाकामा चेत्। यदि पत्नी प्रजाकामा स्यादिति कामयेत तदा वेदस्य जानु
सदृशेन प्रदेशेन पत्नी स्वनाभिमालभेत। कामाभावेपि वाचनं भवत्येव। अथास्या योक्त्रं
विचृते प्र त्वा मुंचामि वरुणस्य पाशादिति। अथेति संबंधार्थः। यद्यनंतरं योक्त्रविमोकः

३२

स्यात्। तदैववाचनमपीति (कामाभावेवाचनानंतरयोक्त्रविमोकः स्यान्नत्वालंभनमिति)
॥ अस्यांइतियोक्त्रविमोचनंहोतृकर्तृकमितिदर्शयति। तसत्यग्गार्हपत्याद्द्विगुणंप्रा
क्पाशंनिधायोपरिष्टादस्योदगग्राणिवेदतृणानिकरोति। तद्योक्त्रंद्विगुणंकृत्वागार्ह
तत्त्यक् पत्यात्प्राक्पाशंप्राग्भ्रेग्रप्रदेशमित्यर्थः। तंनिदध्यात्। योक्त्रस्यमूलप्रदेशःपाशशब्दोत्र ला ४
मूलाग्रयोःप्रदर्शनार्थः। अस्ययोक्त्रस्योपरिष्टाद्वेदतृणानिउदगग्राणिनिदध्यात्। पुर
स्तात्पूर्णपात्रंसंश्लिष्टंवेदतृणैः। तृणेभ्यःपुरस्तात्तृणैःसंश्लिष्टंपूर्णपात्रंनिदध्यात्।
अभिमृश्यवाचयेत्। पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसिसुपूर्णंमेभूयाःसदसिसन्मे
भूयाःसर्वमसिसर्वंमेभूयाअक्षितिरसिमामेक्षेष्ठाइति। अभिमृश्यअभिमृश्यंनित्यर्थः।
तांचाभिमृशंतींवाचयेत्। प्रत्यगाशीष्ट्वान्मंत्रस्य। अथैनांपूर्णपात्रात्प्रतिदिशमुदकमु

श्रो०सू० ३२ 33

उक्षंतु उक्षंतीं वाचयति प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो
मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतामुदीच्यां दिश्याप ओषधयो वनस्पतयो मा
र्जयंतामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां मार्जयंतामिति वा। पूर्णपात्रा
दुदकं गृहीत्वा तदुदुक्षंतीं चैवं कुर्वतीं वाचयति। अत्रोदुक्षणं अकुर्वत्या वाचने मंत्रलिं
गस्य विरोधाभावादुदुक्षणमपि विधीयते। पूर्वत्र तन्मंत्रलिंगादेवाभिमर्शनं अकुर्वत्या
मंत्रोच्चारणं न संभवतीति न तस्या अभिमर्शनं विहितं। मार्जयंतामिति वेति पदद्वयमा
त्र विकल्पः॥ अथास्या उत्तानमंजलिमधस्ताद्योक्त्रस्य निधायात्मनश्च सव्यं पूर्णपात्रं नि
नयन्वाचयेन्माहं प्रजां परासिचं यावः सयावरी स्थन। समुद्रं वो निनयानि स्वं पाथो अपी ३२
थेति। योक्त्रस्याधस्तात्सव्यं अंजलिमुत्तानं आत्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपात्रं

तां

निनयन्माहं प्रजामितिं वाचयेत्। यथा तं निनीयमानमुदकं हस्तेष्ववपतेत् तथा निनये
त्। मा ब्रुस्खलमन्त्रेणानाद्रियते। अधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात्। अत्र पत्नी
द्वित्वबहुत्वे सर्वासां वाचनं कर्तव्यं। प्रतिपत्नियोक्त्रविमोचनमावर्तते। सर्वेषां योक्त्राणां
द्विगुणीकृत्य निधानं भवति। निनयनेन सर्वासां स्वयोक्त्रसंस्पृष्टोदकलाभायोदुष्योऽपि
सर्वासामन्वयः। वाचने वाच्यमंत्रलिंगजनितकार्याभावेऽपि वाच्यस्य पुरुषस्यैवायं सं
स्कार इत्यवगंतव्यं। य एते पत्नीसंबंधाः पदार्थास्ते परस्परसंबद्धाः। अथ शब्देन तच्छब्दे

सर्वे

न वान्येन वा। अतस्ते सर्वे सहैव कर्तव्याः। नैकैकशः। वेदस्तृणान्यग्रे गृहीत्वा विधून्वंस्तं
ततं स्तृणन्त्सव्येन गार्हपत्यादाहवनीयमेति तंतुं तन्वन्रजसो भानुमन्विहीति। वेदबं
धस्य विमुक्तत्वात्तृणानीत्युच्यते तानि दक्षिणेन हस्तेनाग्रप्रदेशे गृहीत्वा अविधून्वि

ष्वल्केनाकंपयन् गार्हपत्यादारभ्य सव्येन हस्तेन संततं स्तृणन् आहवनीयं गच्छति। तंतुं तन्वं
निति आस्तरणमंत्रो न गमनमंत्रः। ततो मंत्रांते स्तरणारंभः। शेषं निधाय प्रत्यगुदगाहव
नीयादवस्थाय स्थाल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात्। स्वाहाकारांतैर्मंत्रै
र्न चेन्मंत्रे पठितः। शेषं निधायेति वचनात् तानि न सर्वाणि स्तरितव्यानि नियमेन शेषित
व्यानीति गम्यते। आज्यस्थाल्याः स्रुवेणाज्यमादायाहवनीये स्रुवेणैव जुहुयात्। आहव
नीयात्प्रत्यगुदगवस्थाय। सर्वप्रायश्चित्तानीति संज्ञैषां होमानां स्वाहाकारांतैर्मंत्रैर्मंत्रां
ते स्वाहाकारं कृत्वेत्यर्थः। न चेन्मंत्रे यत्र क्वापि न स्वाहाकारः पठितस्तदंते स्वाहाकारः क
र्तव्यः। यत्र क्वापि पठितश्चेत्स एव संप्रदानार्थो भवति। यत्किंचाप्रेषितो यजेदन्यत्रापि॥

यः कश्चनास्मिंछास्त्रे देवतोद्देशेन द्रव्यत्यागात्मको व्यापारो यागो होमोऽभ्याधानं बलिहर

णादयो वा मंत्रेण साध्यंते तत्र सर्वत्र स्वाहाकारः कर्तव्य इति सूत्रार्थः। अन्यत्रेति वचनं गा
र्ह्येष्वपि प्रापणार्थं। अप्रेषित इति वषट्कारसमुच्चयनिवृत्त्यर्थः। एवंभूतो अव्यक्त हो
माभ्याधानोपस्थानानि च। एवंभूतो नामैवं प्रकार आहवनीयात्प्रत्यगुदग्देशे स्थित आज्यं
स्रुवेणादायाहवनीय इति। एवंप्रकारविशिष्टः कृतः एवंभूत इत्युच्यते। विशेषणपरोयं
निर्देशः अव्यक्तशब्देनाविहितविशेष उच्यते। यत्र होमाभ्याधानोपस्थानान्यविहितवि
शेषाणि विधीयंते तत्रानेन प्रकारेण कर्तव्यानीत्यर्थः। एकदेशाविशेषे चाप्यपेक्षितमात्र
मस्मात्कल्प्यते। अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्त्वमयाअसि। अयासावयसाकृतो
यासन्हव्यमूहिषे यानो धेहि भेषजं स्वाहा। अतो देवा अवंतु न इति द्वाभ्यां व्याहृतिभिश्च भूः
स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति। एकमंत्राणि कर्माणीति न्यायेन द्वाभ्यां

श्री० प्र०
३५

आहुतीर्होतव्ये व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठिते न ज्ञायते व्याहृत्युपदेशो अनेन न क्रमे
णैव एते चत्वार इति। कृत्वा संस्राजपेनोपस्थाय तीर्थेन निष्क्रम्या नियमः। स्यादिति शेषः। कृ
त्वेति वचनं संस्राजपेन होमस्य संबंधार्थं। यत्र संस्राजपोऽस्ति तत्र प्रायश्चित्तहोमोपि भव
ति इति। अतः खंडेष्टिष्वपि संस्राजपस्य प्रयोज्यत्वात् प्रायश्चित्तहोमोपि प्रयोज्य एव। उप
स्थायांते तीर्थेनैव निष्क्रामेत्। अनिष्क्रम्या नियम इत्यर्थस्तु नानियमा इत्यर्थः। अर्थस्तु तत्वे
सत्यपि अनियमविधानं कर्ममध्येपि तीर्थेन निष्क्रांतस्याव्याहृत्यादयो नियमा न भवंतीति।
तेन प्रयोगमध्ये मार्गांतरेण निष्क्रांतस्यापि नियमा भवंत्येवेति ज्ञायते। ॐ नमः स्वरश्च मेय
ज्ञोपचते न मश्च यत्ते न्यूनं तस्मै त उपयते तिरिक्तं तस्मै ते नम इति संस्राजपः। अन्वर्थसंज्ञेयं। ३५
तेनायं सोमेष्टिषु न भवति। इति होतुः। इति प्रावरेणात्रैतावत्वमुच्यते। एतावदेव होतुर्नान्यदि

गृहमेधीयेष्टौ पि

ति। होतृग्रहणं होतुरेवैतावत्। आग्नीध्रस्यान्यदपीति। अथ ब्रह्मणः। अथ शब्दोधिकारार्थः।
इदानीं ब्रह्मणोपि विधयो वक्ष्यंत इत्यर्थः। होत्राचमनयज्ञोपवीतशौचानि। व्याख्यातानीत्य
ना र्थः। स्नानाचमनादिभिः शुचिर्भूत्वा ब्रह्मत्वं करिष्यामीत्यागुरितो विहारं प्रविशन् प्राङ्मुख आ
चमनं कुर्यात्। कर्मांगत्वाद्यज्ञोपवीतग्रहणं पैतृकमानुषयोरपि कर्मणोर्वचनादेतेयज्ञोप
वीतीत्येव स्यादिति। शौचग्रहणं तु क्रत्वर्थमपि अशुचित्वसंपादयित्तद्विहाराद्बहिः कर्तव्य रा
मिति। एतच्चाप्रामत्वं विधीयते। अयमपि तीर्थेन विहारं प्रपन्न इति। प्राक्चेष्टतास्य प्रा
प्तानेष्यते यत्तमना इति कर्माभिमुख्य एव यत्तमनस्त्वोपपत्तेः। अंगधारणमुपवेशांगत
याव याप्राप्तमदृष्टार्थतापरिहारायैवं दासनमनुवर्तते। तत्र चेत्कर्मैत्यस्यापि कर्मसंबंधात्।
अव्याहृत्तिरविशिष्टेव दक्षिणां गताच। तत्र चेत्कर्मेत्यस्य उत्तरांगत्वेनाविशेषादस्यापिभ

श्रौ॰ सू॰
३६
36

वति। नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां वा। अन्यतः प्राप्तस्य ब्रह्मणो ऽयं नियम उच्य
ते। ध्रुवाणां व्रजतां च पुरुषाणां यानि कर्माणि तेषां दक्षिणतो नित्यो भवेत्। प्राकृतानामप्राकृ
तानां च ध्रुवाणां नित्यं दक्षिणत्वं ध्रुवेपोव कर्तुं शक्यते इति ध्रुवेषु ध्रुव एव स्यात्। व्रजतां
कर्मसु नित्यं दक्षिणत्वाय व्रजनं नैव भवेत्। ध्रुवाणां व्रजतामिति कर्तृविशेषणं न कर्मणां। नि

ण

त्यत्वमन्त्रोपक्रमप्रभृत्यापरिसमाप्तेर्दक्षिणत्वसिध्यर्थो। वाशब्दः समुच्चयार्थः। क्वचित्कर्म
णि कश्चित्तिष्ठति कश्चिद्व्रजति तत्र भूयसां धर्मः परिगृह्यते। बहिर्वेदि यां दिशं व्रजेयुः सै
व तत्र प्राची। यत्र बहिर्वेदि वसतीवरीग्रहणादि कर्तुं यां दिशमभिमुखा व्रजंति ऋत्विजः
तत्र तामेव दिशं प्राचीं कृत्वा दक्षिणतो भवेत्। सैव तत्रेति वचनात्। बहिस्तिष्ठतामभिमुख
एव प्राची भवेत्। चेष्टास्वमंत्रासु स्थानासनयोर्विकल्पः। अमंत्रे त्र्यंबकेष्ट्यादिषु कर्मसु

३६

स्थानमासनंवाभवेत्। वाशब्देनविकल्पोऽसिद्धोविकल्पवचनमव्यवस्थयाऽविकल्पसिध्य
र्थं। तेनैकस्मिन्नपिप्रयोगेक्वचिदासनंक्वचित्स्थानमितिलभ्यते। तिष्ठद्धोमाश्चयेवषट्काराः।
तिष्ठतांयेहोमाःवषट्काररहिताश्चतेषुचस्थानमासनंवाभवेत्। आसीतान्यत्र। अन्यत्रे
त्यनंतरसूत्रद्वयविषयादन्यत्रेत्यर्थः। समस्तपाण्यंगुष्ठोऽग्रेणाहवनीयंपरीत्यदक्षिणतः
कुशेषूपविशेत्। समस्तौपाणीअंगुष्ठौचयस्यसोऽयंसमस्तपाण्यंगुष्ठःसव्येनपाणिनाद
क्षिणंपाणितलप्रदेशंगृह्णीयात्। दक्षिणेनसव्यांगुष्ठं। एवंकृतेपाणीअंगुष्ठौचसमस्तौ
भवतः। एवंभूतोऽग्रेणाहवनीयंपरीत्यतस्यदक्षिणतःकुशेषूपविशेत्। निरसनंकृत्वाकुशाग्र
हणात्सतिसंभवेत्एवासनेप्रकल्प्यंते। दक्षिणतइतिपुनर्वचनमाहवनीयस्यैवदक्षिणतो
नक्रियमाणस्यकर्मणइत्येवमर्थं। बृहस्पतिर्ब्रह्माब्रह्मसदनआशिष्यतेबृहस्पतेयज्ञंगो

श्री० वृ०
३७
37
त्र

पायेत्स्कपविश्यजपेत्।उपविश्यग्रहणंसकृदुपविश्यपुनरपिकर्मणाएवदक्षिपातोनभवेत्।
आसमाप्तेस्तत्रोपविशेदिति।एषब्रह्मजपःसर्वयज्ञतंत्रेषुसाग्नौयत्रोपवेशनं।एषमंत्रोब्र
ह्मजपसंज्ञोभवति।सचातिदेशमनपेक्ष्यसर्वेषुयज्ञेषुभवति।तत्रग्रहणंपाकयज्ञेषुअ
पिप्रापणार्थं।पाकयज्ञानामेतत्तंत्रमितितंत्रशब्दत्वात्तेषामिति।साग्नौयत्रोपवेशनमित्य
ग्निप्रणयनेनसाग्नित्वेकर्मणःप्रतिपन्नेयत्रोपवेशनंविहितंतत्रायंजपोभवति।एतदुक्तं
भवति।एषजपःसर्वेषुयज्ञेषुप्रविष्टमात्रेभवेत्।अग्निप्रणायनवत्स्वग्निप्रणयनांतेए
वभवति।उपविष्टमतिसर्जयते।अनुज्ञालाभार्थंमंत्रेणामंत्रयते।अध्वर्युरित्यर्थः।उप
विष्टग्रहणंप्रवेशकालज्ञापनार्थं।यस्मिन्कालेउपविष्टस्योपवेशनानंतरंअध्वर्युणाति ३७
सर्जनंभवतितस्मिन्कालेप्रविशेदित्यर्थः।ब्रह्मजपःप्रयोक्ष्यामीतिकृत्वाभूर्भुवःस्वर्बृह

स्याति प्रसूतइतिजपित्वों प्रणयेत्स्यातिसृजे त्सर्वत्र। अध्वर्युमंत्रपाठेपूशब्दसहितेपियां चाव
चने प्रणयेत्सेवानुजानीयान्नापः प्रणयेत्स्येवं। श्रुत्वेतिवचनं श्रुत्वापश्चाज्जपेन्नसहेति॥
जपित्वेतिपूर्वस्योपांशुत्वायोत्तरस्य चतंत्रस्वरत्वाय। अतिसृजे दनुजानीयात्। सर्वत्रेतिस
र्वेष्वनुज्ञावचनेषु अस्यविधेः प्रापणार्थो। यथाकर्मत्वादेशाः॥ प्राप्तस्यायंविशेषविधिः।
यस्मै कर्मणोअनुज्ञामिच्छति तदेवानुजानीयान्न प्रणयेत्स्येवं। यथाकर्मकर्मानुरूपमादे
शाः कर्तव्या इत्यर्थः। प्रणवाद्युच्चैः। उत्तरविवक्षार्थं। ऊर्ध्वं वाप्रणवात्। उच्चैर्भवतीत्यर्थः।
अतऊर्ध्वं वाग्यत आस्त आहविष्कृतउद्वादनात्। प्रणीताप्रणयनोपलक्षितात्कालादूर्ध्व
माहविष्कृन्मंत्रोच्चारयाद्वाग्यतोभवेत्। आस्तइतिवचनं अमंत्रेष्वपि कर्मस्वास्मिन्नवसरे
ऽऽसनमेवेतिनियमार्थं। आमार्जनं स्थो। पश्चावग्निप्रणयनमारभ्याआचात्वालमार्जनात्।

ना। स्थाने

वाग्यतो भवेत्। सोमे घर्मादि चातिप्रैषादि चासुब्रह्मण्यायाः। घर्ममारभ्य अतिप्रैषं चारभ्य आ
सुब्रह्मण्यायाः वाक्नियमः। सोमग्रहणं पशुधिकारात्पशुनामक एव सोमे स्यादिति तन्नि
वृत्त्यर्थं सर्वसोमेषु प्रापणार्थं॥ प्रातरनुवाकाद्यांतर्यामात्। प्रातरनुवाकलक्षितात्। काला
दूर्ध्वं आ अंतर्यामग्रहयागात्। हविष्कृतोनुसवनमेळायाः। तथा सवनत्रये पिपुरोळाश
प्रचारमारभ्य आ पुरोळाशेळायाः। स्तोत्रे प्रतिसर्जनाद्यावषट्कारात्। स्तोत्रादौ स्तुध्वमि
त्युपाकरणं। तदादि आ शस्त्रयाज्यावषट्कारानुमंत्रणात् वाग्यतो भवेदित्यर्थः। ओ हृ चः प
वमानेषु। पवमानस्तोत्रे ष्वुपाकरणादारभ्य आ उ हृ चः। उ हृगिति समाप्तिरुच्यते। तो य
च्चाकिंच मंत्रवत्। सर्वत्र मंत्रवति कर्मणि वाग्यमनं भवति। होत्राशेषः। उक्तादन्यो योविष
यस्तत्राप्यस्य वाग्यमनं होतृतुल्यं भवति। अतो वाग्यमनमित्यादि नियमोस्याप्यधिक्रियत

इत्यर्थः। आपत्तिश्च। आपद्यातो देवा अवंतु न इति जपेदित्युक्तत्वादेतत्प्रायश्चित्तमापत्ति
रित्युच्यते। अनंतरोक्तैर्नवभिः सूत्रैर्विहितस्य वाग्यमनस्यात्रैष एतदेवं वाग्यमने तदादि
त्वमात्रमत्र विधीयते। तुशब्दसमन्वयात्। अपि ससोमे सोमसहितेपि। अग्नीषोमीय
प्रणयनेपीत्यर्थः। तत्र वचनं यस्मिन्नहन्यग्निः प्रणीयते तस्मिन्नेवाहनि कर्मप्रवृत्तौ
तदादि वाग्यमनं। न पूर्वेषु। प्रणयने तदादित्वनियमः। तथा त्वसद्यस्कालेषु पूर्वेद्युः प्र
णीयते वरुणप्रघासादिषु। दक्षिणतश्च व्रजं जपत्याप्तुःशिशान इति सूक्तं। सूक्तग्रह
णं व्रजं जपतीति व्रजतो जपविधानाद्व्रजनसमाप्तावपि कृत्स्नसूक्तप्रयोगविधानार्थं।
दक्षिणतो व्रजनविधानं दक्षिणतो व्रजत एवायं जपः स्यान्नाग्निं सोमं वा प्रणयतः। त
दा त्वग्रेणागच्छतीति। समाप्योपवेशनाद्युक्तं। समाप्येति वचनं समाप्योपवेशनादिय

निरसन

 उक्तं तदेव कुर्यात्। न सूक्तावृत्तिं गमनापरिसमाप्तावपीति। आदिग्रहणेन ब्रह्मजपः परिग

ह्यते। उपवेशनग्रहणेनैमपि गृह्यते। सहचारित्वात्। एतत्त्रयमग्निप्रणयनाग्नीषोमप्र
णयनयोरंतो विधीयते अनेन सूत्रेण॥ साग्नौ यत्रोपवेशनमित्यनेन साग्निप्रणयने शुप
श्वादिकर्मस्वग्निप्रणयनांत एव ब्रह्मजपो नान्यत्रेति नियम्यते। ननु सौमिके प्रणयने
ब्रह्मजपः। सोमे यदग्निप्रणयनं तदंते न ब्रह्मजपो भवति। तत्र निरसनोपवेशने एव भव
तः। अन्यत्र विसृष्टवाग बहुभाषीयतमनाः। यतमनाः क्रियमाणपदार्थाभिमर्शी। विसृ
ष्टवागपि यतमनाः स्यादिति योगविभागकृतः। विपर्यासें तरिते मंत्रे कर्मणि वाख्यातेवो

पलक्ष्य वाजान्वा च्याकुर्तिं जुहुयात्। विपर्यासोनुक्रमः। अंतरितोनुगमनं मंत्रयोः कर्म

णो वा विपर्यासें तरिते मंत्रे कर्मणि वास्वयमुपलक्ष्य परेण वाख्याते दक्षिणं जानु निपात्य

ग्रहण

वक्ष्यमाणेन मंत्रेण वक्ष्यमाणाग्नावाहुतीर्जुहुयात्। सर्वत्र जानुनिपातनमुपस्थस्योत्ता

नत्वाविरोधेन कर्तव्यं। नन्यकुभावेन केनचिद्कृत्यकारेणाशांवक्यादिनादोषनिबंधनात्।

आख्यातोपलक्षणमन्यस्मिन्नपिविषयेयथाकथंचित्ज्ञातेएतत्प्रायश्चित्तंभवतीत्येवम

र्थो। तेनैवमस्यसूत्रस्यार्थोवगंतव्यः। सर्वेषुभ्रेषेष्वेतत्प्रायश्चित्तंसामान्यरूपेणभवतिय

दन्यत्र्त्रेषविशेषेविहितंतदस्यापवादकंभवति। विपर्यासांतरितयोरत्रभेदेनग्रहणा

त्तद्विषयेणाप्यस्यसमुच्चयोभवति। सर्वेषांनैमित्तिकानामयमुत्सर्गः। निमित्तादनंतरंक

र्तव्यमिति। यस्यपुनर्बलवताप्रमाणेनानंतरंकर्तुमसंभवतितस्ययावत्संभवमुत्कर्षो

नात्यंतमिति। वाशब्दस्याद्विरुच्चारणंज्ञातएवनिमित्तेएतत्प्रायश्चित्तंनपूर्वोक्तप्रायश्चि

त्तवद्ज्ञाते पीतिज्ञापनार्थं। आहुतिमित्येकवचनंबहुष्वपिनिमित्तेषुयुगपत्ज्ञाते

श्रौ०सू० ४०

श्रुएकेवाकृतिः कर्तव्या न प्रतीति निमित्तमिति वा। शब्दस्याद्विरुच्चारणं त्राम्नायः॥ ऋकश्चेद्गा
तिगार्हपत्ये। यजुष्टोष्टुव इति दक्षिणे। आग्नीध्रीये सोमेषु। प्रागाग्नीध्रीय प्रणयनात्सोमे
पि दक्षिणावेव दक्षिणाग्न्यर्थत्वात्। आग्नीध्रीय प्रणायनस्य। सामतः स्वरित्याहवनीये। सर्व
तो विरात वा भूर्भुवः स्वरित्याहवनीय एव। यदा सर्वेभ्यो वेदेभ्यो युगपद्भ्रंशा आगच्छेयुः। त
दा समस्ताभिरेकाकृतिराहवनीय एव कार्या। एवकारग्रहणं समस्ताभिरेकाकृतिराहव
नीय एवेति ज्ञापनार्थं। अविज्ञात इति स्मार्तानां शोचाचमनादीनां भ्रेषस्य ज्ञापनार्थं। एते
ऋगादयः शब्दा वेदवचना न जातिवचनाः। प्राक्प्रयाजेभ्यो गारं बहिष्परिधिनिर्वृत्तं स्रु
वदंडेनाभिनिदध्यान्मात यौमायज्ञपतिस्तपन्नमस्ते अस्त्वायते नमो रुद्रपरायतेनमो
यत्र निषीदसीति। प्राक्प्रयाजेभ्य इति स्कगादापनात्साकृत्स्नं संगत्य तो। बहिष्परिधीस्य

२× मायज्ञस्तपनू×२

४०

स्यपरिधिशब्दस्य देशोपलक्षणार्थत्वात्सर्वतो निर्वृत्तं गृह्यते। तच्च वक्ष्यमाणसूत्रैः स्पष्टयति

य ।अमुं माहिंसीरमुं माहिंसीरिति च प्रतिदिशमध्वर्युर्जमानो पुरस्ताच्चेद्वृत्तं यजमानो दक्षि

णतो होता पत्नी यजमानान्यश्चादाग्नीध्रयजमाना उत्तरतः।अध्वर्युं माहिंसीर्यजमानं मा

हिंसीरित्येवमंतेन मात पदस्यनेन पुरस्तान्निर्गतमभिनिदध्यात्। एवमुत्तरेष्वपि प्रयोगो

द्रष्टव्यः।चशब्द अमुमादेः पूर्वेण समुच्चयार्थः।दिगनुक्रमेयाप्रतिदिशशब्दार्थे सिद्ध एव य

त्प्रतिदिशग्रहणं करोति तज्ज्ञापयति। सर्वोदिक्संबद्धं कर्मानेन क्रमेण कर्तव्यमिति।अथे

नमनुप्रहरेदाहृयत्तं ददे निर्ऋते रुपस्थात्तं देवेषु परिददामि विद्वानाः स्फ प्रजास्त्वं शतहि

मामर्दं तद्दृहनो देवामायिशर्मयच्छतेति। नस्वाहाकारांतं। नमभिजुहुयात्सहस्रशृंगो वृ

षभो जातवेदास्तोमपृष्ठो घृतवान्स्फ प्रतीकः।मानो हिंसीधिंसितो नेत्वाजहामि गोपो

श्रौ० द्व०
८१

यंचनो वीरपो षंचयच्छस्वाहेति। तमिति प्रहृतमेवांगारमभिजुहुयात्। इत्यर्थः। १२। प्राशित्र
माक्रियमाणमीक्षते मित्रस्यत्वा चक्षुषा प्रतीक्षे इति देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां प्रतिगृह्णामीति। तदंजलिना प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयाम्यदित्याउ
पस्थ इति। कुशेषु प्राग्दंडं निधायांगुष्ठोपकनिष्ठिकाभ्यामसंखादन्प्राश्नीयात्। अग्नेष्ट्वास्ये
नप्राश्नामि बृहस्पतेर्मुखेनेति। तदित्याहृतस्य प्रतिग्रहार्थमाक्रियमाणस्येति अंतर्वेदिकु
शेषु प्राग्दंडं निधाय असंखादन्प्राश्नीयात्। असंखादन् दंतैरपीडयन्नित्यर्थः। आचम्या
न्वाचामे ... त्सत्येन त्वाभिजिघार्मि या अप्स्वंतर्देवतास्ताइदं शमयंतु चक्षुः श्रोत्रं प्राणान्मेमा
हिंसासिरिति। शौचार्थमाचमानं कृत्वा पश्चान्मंत्रेणापः पिबेत्। पुनरपि प्राग्वत् शौचार्थमा
चमनं कुर्यात्। इंद्रस्यत्वा जठरे दधामीति नाभिमालभेत प्रक्षाल्य प्राशित्रहरणं निरनेना

८१

ध्यात्म म पोनिनयते। प्रक्षालितेन प्राशित्रहरणेनात्माभिमुखेन हस्तेन च तथाभूतेनात्म
नः पुरस्तान्निरपः सिंचेत्। मार्जयित्वास्मिन्ब्रह्मभागं निदध्यात्। सर्वैः कर्तृभिरिळाभक्षणा
स्यानुष्ठेयत्वात्त[illegible]दं गत्वा च मार्जनस्यास्मिन्नेवावसरे अपमपीळां भक्षयित्वा मार्जनं च कृत्वा
ततः पश्चाच्चतुर्धाकरणे कृते ब्रह्मणे आनीतं ब्रह्मभागं प्राशित्रहरणे निदध्यात्। पश्चात्कु
शेषु यजमानभागं। यस्मिंदेशे प्राशित्रहरणं निहितं तस्य पश्चात्कुशेषु यजमानभागं नि
दध्यात्। प्राशित्रहरणे इत्यर्थः। अन्वाहार्यमवेक्षेत प्रजापतेर्भागोस्यूर्जस्वान्पयस्वानक्षि
तिरसि मा मे क्षेष्ठा अस्मिंश्च लोके मुष्मिंश्च इति काराध्याहारेण सूत्रच्छेदः। प्राणापानौ मे
पाहि कामाय त्वेत्यस्पृशन्नेव प्रायां गुष्ठोपकनिष्ठिकाभ्यां शिष्टं गृहीत्वा ब्रह्मभागे निदध्या
त्। अन्ये नांगेनास्पृशन्नेव जिघ्रेत्। अन्वाहार्यं प्राणापानावित्यादिना शिष्टं पुळाकमात्रं

श्री०वृ० इत्यर्थः। तन्मात्रमन्वाहार्यतां गृहीत्वाब्रह्मभागेनिदध्यात्। ब्रह्मन्प्रस्थास्याम इति श्रुत्वा

८२ बृहस्पतिर्ब्रह्माब्रह्मसदन आशिष्ट बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स

मां पाहि। अध्वर्युमंत्रपाठः प्रस्थास्यामः प्रस्थास्यामीति वा श्रुत्वा प्रतिष्ठेत्येव वा वचनं श्रुत्या

दित्येवमर्थो भूर्भुवः स्वर्बृहस्पतिप्रसूत इति जपित्वा प्रतिष्ठेति समिधमनुजानीयात्। संस्थि

ते जघन्य ऋत्विजां सर्वप्रायश्चित्तानि जुहुयात्। तमितरेन्वारभेरन्। भूर्भुवः स्वरित्यादेः पाठः

समुच्चयार्थः। समिद्ग्रहणं समिदाधानानुज्ञानमपि सत्प्रतिष्ठेत्येवंरूपमेव भवति। नाधेहि

त्येवंरूपं। ऋत्विजां कर्मसु संस्थितेषु उपरतेषु अनु परते यजमानकर्मापि जघन्यः सन्प्राय

श्चित्तानि जुहुयात्। अत्राग्नीध्रोन्वारभेत ब्रह्माणं बहुवचनं विकृत्यर्थं होतारं वा होता ८२

रं वेतरेन्वालभेरन्। एतयोर्नित्यहोमः। होम एवैतयोः कार्यो नान्वारंभः परस्परमित्यर्थः॥

सर्वसंस्थाजपेनोपतिष्ठेत उपतिष्ठेत। सर्वे होमकर्तारोन्वारंभकर्तारश्चेत्यर्थः॥ इ॰आ॰२॰ प्रथमो

ध्यायः

८६

सर्वे संस्थाजपेनोपतिष्ठंत उपतिष्ठंते सर्वे होमकर्तारोन्वारंभकर्तारश्चेत्यर्थः। इत्याश्वलायन।

श्रौतसूत्र वृत्तो प्रथमोध्यायः॥१॥ ॐ पौर्णमासे नेष्टिपशुसोमा उपदिष्टाः प्रथमेध्याये

दर्शपूर्णमासौ व्याख्यातौ विध्यंतसहितौ इतरत्रेष्टयः प एव श्ववक्ष्यंते विध्यंतरहिताः तेषां

च विध्यंतापेक्षास्ति। यथाह नहि तत्करणं लोके वेदे वा किंचिदीदृशं। इति कर्तव्यता साध्येय

स्य नानुग्रहेर्थितेति। एवं च तदपेक्षायां सत्यां तदपि वैदिकमेव श्रौतमेवेत्यपि सिद्धे श्रौते

षु चाग्निहोत्रिक दार्शपूर्णमासिक सोमिकेषु त्रिषु सत्त्वस्येदमिति विध्यंतविशेषमर्थं

यूपायाज्यमानायेति यूपमज्यमानमभिधातुमेताम्र्च मनुब्रूयादित्यर्थः। तस्या उत्तमेन

वचनेनेति संबंधः। उच्छ्रयस्व वनस्पते समिधस्य श्रयमाणः पुरस्तादूर्ध्व ऊषुणऊतय

श्रौ० वृ०
८३

इतिद्वेजातोजायतेसुदिनत्वेअह्नामित्यर्धर्चआरभेद्युवासुवासाःपरिवीतआगादितिपरि
दध्यात्। परिदध्यादितिवचनंपदार्थानुसमयेप्रतिपदार्थंनानुवचनस्यभेदइतिज्ञापना
र्थं। यत्रैकतंत्रेबहवःसपशवोत्वंपरिधायसंस्कृतायाद्न्तमिहिंकृत्ययान्वोनरोदेवयंतो
निमिम्युरितिषड्भिः। यस्मिन्कर्मणिएकस्मिन्नेवपशुतंत्रेबहवोरूपाःसपशवश्चतत्रात्व
मनुवचनंपरिधायसंस्कृत्याद्युपात्। कांडानुसमयाभिप्रायेणेदमुच्यतेअंत्यमितितदा
नुवचनस्याभिन्नत्वात्पदार्थानुसमयेत्वेकमेवानुवचनंभवति। एकतंत्रइतिवचनंएक
कर्ममात्रनिवृत्त्यर्थं। बहवइतिद्वयोर्निवृत्त्यर्थंसपशवइतिअपशुकबहुत्वनिवृत्त्यर्थं॥
पंचभिर्वा। अनभ्यासमेके। प्रथमोत्तमयोरनभ्यासमित्यर्थः। उक्तमग्निमंथनंतथाधा
य्येकृताकृतावाज्यभागावावाहनेपशुदेवताभ्योवनस्पतिमनंतरं। आवाहयेदितिशेषः।

८३

॥ॐ॥ पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः। प्रथमे ध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यंतरहितौ इ
त उत्तरत्रेष्टयः पशवश्च वक्ष्यंते विध्यंतरहिताः। तेषां च विध्यंतापेक्षास्ति। यथाह॥ न हि तत्कर
णं लोके वेदे वा किंचिदीदृशं। इति कर्त्तव्यता साध्येयं स्मिनानुग्रहेर्थिनेति। एवं च तदपेक्षायां स
त्यां तदपि वैदिकमेव श्रौतमेवेत्यपि सिद्धे श्रौतेषु चाग्निहोत्रिक दार्शपौर्णमासिक सौमिकेषु
त्रिषु सत्स्वस्येदमिति विध्यंतविशेषग्रहणे चोदनासामान्यं स्वरूपसामान्यं च मुख्यकान्यस्य वि
शेषलिंगस्याभावान्नैरेव विशेषलिंगैर्विध्यंतविशेषः परिगृह्यते। तानीमानि विध्यंतविशेषग्र
हणलिंगानि। निर्वपेत्पद्धितश्चाज्यमौषधत्वं षपत्वं पयो दधि। कपालानि च तत्संख्या देवता शब्द
एव च। तस्मिन्नक्षरसंख्या च तद्वाच्येष्वेकवत्कृपि। द्रव्यत्वं प्राकृतः शाब्दो हविषः प्रभवादि च। ए
तद्गुणशब्दश्च तद्वदित्युपदेशनं। नामधेयं तथाऽव्यक्तचोदना चान्यदीदृशं। लिंगान्येतानि

पशौ सान्नाय्यधर्मः २

मासमग्निहोत्रं जुहोतीत्यादौ १

१ विश्वजिता यजेतेत्यादौ १

श्रौ॰सू॰
४२
43

चान्यानि गुरूणि च लघूनि च। समीक्ष्य प्रकृतिश्चैवं विकृतिश्चेति कल्पना। द्रव्यदेवतयोर्यत्र विरोध
स्तत्र निश्चये। तत्र द्रव्यं बलीयः स्याद्देवताया इति स्थितिः। यत्र सर्वासामिष्टीनां दर्शपूर्णमासौ प्रकृ
ती तत्र विशेषलिङ्गात्कासांचिद्दर्शः प्रकृतिः कासांचित्पौर्णमासीत्येवं समीक्ष्य व्यवस्था कल्पनीया। एवं
सर्वेषां पशूनां दर्शपूर्णमासावेव प्रकृती। तद्धिताद्विशेषलिङ्गात् अग्नीषोमीयस्य पशोरन्येषां च॥
अत्र न्यायविद आहुः। अग्नीषोमीयस्य पशोर्दर्शपूर्णमासौ प्रकृती। नान्येषां पशूनां। स चातिदेशि
केनौपदेशिकेन संबद्धोऽन्येषां पशूनां प्रकृतिः। एवं सत्युपकारप्राप्तिरखंडिता भवतीति स
त्यमेषां न्यायविदां स्थितिः। किंत्वत्र कल्पसूत्रकाराणामेवं प्रवृत्तिः। सर्वेषु पशुषु दार्शपौर्ण
मासिको विध्यंतो दर्शपूर्णमासाभ्यामेव प्राप्नोति। अग्नीषोमीयाच्च पशोः पाशुक इति। अत
एवास्मिंत्सूत्रेऽग्नीषोमीयशब्दमनुक्त्वा पशुसामान्यवाचिनं पशुशब्दमेव प्रयुक्तवानाचा

ए॰म॰
४२

र्थः। तेनैवायमतिदेशः सर्वेषां पशूनां नाग्नीषोमीयस्यैवेति गम्यते। अत एव भाष्यकारः ४ अ
थसवनीयेनेत्यस्मिंस्सूत्रे यद्दैवतग्रहणस्येदं प्रयोजनमुक्तवान्। अनुक्तदेवतानामपि पशू
नां सवनीयत्वप्राप्तौ तेषामपि समाम्नातत्वं भवतीति। समाम्नातत्वे च वार्त्रघ्नाज्यभागस्य ला
भः प्रयोजनं नान्यत्। अतः सर्वपशूनामतिदेश इति सिद्धं। तत्राग्नेय उपांशुयाजोऽग्नीषोमीय इ
ति पूर्णमाससंज्ञका यागाः। आग्नेय उपांशुयाज ऐन्द्राग्न इत्यसंनयतोमावास्यायां। संनयत ऐ
न्द्राग्नस्य स्थाने ऐन्द्रो महेन्द्रो वा दधिपयसी इति। तयोः समुदाययोः पौर्णमास्यमावास्याना म
नी भवतः। अनयोस्तन्त्रं साधारणं। एतावानेव भेदः प्रधानदेवताः आज्यभागयोरनुवाक्ये च।
यत्र प्रधानदेवताविकृतिषु प्रत्यक्षाम्नातातिदेशव्यापारो नास्ति। अतः पारिशेष्यादाज्यभागा
नुवाक्ययोरेवातिदेशः फलति। एवं स्थिते येऽस्मिंश्शास्त्रे समाम्नाता इष्टयः पशवश्च सप्रकर

णेऽविशेषिताज्यभागाः। च तेषां मध्ये केषांचिद्वचनाद्वार्त्रघ्नाज्यभागतां मत्वा तदुपदेशार्थमे
तत्सूत्रं प्रणीतवानाचार्यः। तस्यायमर्थः। उपदिष्टाः समाम्नाता इत्यर्थः। अनुवादत्वेन चायं शा
ब्दः संबध्यते। अतोयमर्थः सूत्रस्य। येस्मिं छास्त्रे उपदिष्टा इष्टयः पशवश्चापि अविशेषिता
आज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति। पौर्णमासेनेत्यस्यायमर्थः। पौर्णमासेन व्याख्याता
इति। वार्त्रघ्नाज्यभागा इत्यर्थः। तेनासमाम्नातानामिष्टीनां पशूनां च न्यायादेव तंत्रनियमः सि
द्धो भवति। तथा चोक्तमिष्ट्ययनप्रकरणे। असमाम्नातास्वर्थात्तंत्रविकार इति। तच्च पशूनाम
पि प्रदर्शनार्थत्वेनोक्तमिति द्रष्टव्यं। सोमग्रहणमुत्तरार्थं। अत्रापि किंचित्प्रयोजनमस्ति। या
ज्याधर्मा निरसनाद्यर्थश्चैवं प्रकारः श्रुतावनारभ्याधीता अप्यस्मिं छास्त्रे दर्शपूर्णमासप्रक
रणे विहितास्तेषां प्रापणाय इति। तैरमावास्यायां पौर्णमास्यां वा यजेत। तैरिष्टिपशुसोमैरमावास्या

यां पौर्णमास्यां वा याग: कर्तव्य इति इष्टिपशूनां प्रकृतिप्राप्त एवायं काल: पुनर्विधीयते। द्यह
कालतां निवर्त्य सघस्कालताप्राप्त्यर्थं॥ किंच दर्शप्रकृतेरमावास्या पौर्णमासप्रकृते: पौर्णमा
स्यां त्वेवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थं प्रकृत्यविरोधात्सर्वणास्त इत्यहो एतै
विकृति: कर्तव्या। यदा ऋ: पूर्वभागे पर्व स्यात्तदा प्रकृतिं कृत्वा विकृति: कार्या॥ यदा परभागे एतैर्वा
तदा विकृतिं कृत्वा प्रकृति: कार्येति। सोमस्यायमप्राप्त: कालो विधीयते। इत्यादि शब्दसंबंधादेवय
ज्ञेनेत्यपि सिद्धे यज्ञेनेति वचनं सोमस्य याग एवानयो: कालयो: संपादनीयो नान्यद्दीक्षादीनि। ए
जन्यश्चाग्निहोत्रं जुहुयात्। क्षत्रियस्याग्निहोत्रहोम: पर्वणोरेव कर्तव्यो नान्यस्मिन्काल इति। च
शब्दाद्वैश्योप्यनयोरेव कालयोरग्निहोत्रं जुहुयात्। नान्यस्मिन्नित्यवगम्यते। कथमनयोरन्या
स्मिन्काल इत्याह। तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत्। तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय।

अतपस्विनेपिब्राह्मणायैवदद्यात्। नजात्वंतरायतपस्विनेपीति। इतरंकालमिति। इतरे
ष्वस्तर्वेष्वग्निहोत्रकालेष्वित्यर्थः। भक्तमुपहरेत् भक्तंपक्वौदनं। पक्वान्नमुपहरेद्दद्यात्। एतदु
क्तंभवति। एतजन्यवैश्ययोः पर्वण्यग्निहोत्रकालद्वयंवर्जयित्वा इतरेषु कालेषु ब्राह्मणायौदनं
दातव्यं। नहोमः कर्तव्य इति। अग्निधारणंतु क्रियत एव। ऋतसत्यशीलः सोमसुत्सदाजुहुया
त्। ऋतंवाङ्मनसयोः सत्यत्वं। सत्यंवाच एव॥ ऋतसत्यस्वभावः सोमयाजीचयः क्षत्रियोवैश्यो
वासस्सदाजुहुयादग्निहोत्रंनपर्वणोरेव। ऋतशब्देनैवसत्यशब्दार्थेसिद्धेसत्यग्रहणंवाक्तत्य
स्वभावस्यापिसर्वदाहोमसिध्यर्थं। बहुषुबहूनामनुदेश आनंतर्ययोगः समानानामितिशेषः। अ
नेकेषुविहितेषुतानुद्दिश्यानेकेषांसमानानामनुदेशेपश्चाद्विधानेसत्यानंतर्ययोगः क्रमेणसंबं
धः स्यादित्यर्थः। द्वेद्वेतु याज्यानुवाक्ये। याज्यानुवाक्ययोर्देवताभिरेवंआनंतर्ययोगोभवति। एक

स्याएकस्यादेवतायाद्वाभ्याद्वाभ्यामग्न्यांनेकैकस्याएकैकयेति।अदृष्टादेशेनित्ये।यदिकश्चिदने
कादेवताविधायकस्याश्चिद्देवतायास्तल्लिंगयोर्याज्यानुवाक्ययोर्विधिंनकुर्यात्तदानित्येगृही
तव्येइत्येकोर्थः।अयमप्यपरोर्थः।गृहीतत्वात्तुनस्ताभ्यांविहितामिश्रसहदेवताभिरानंतर्य
योगइति।आदेशोविधिरित्यर्थः।नित्येउक्तेइत्यर्थः।अग्न्याधेयं।अग्न्याधेयप्रभृतित्वंकर्मणा
मनुष्ठानस्योक्तंअनुष्ठानक्रमेणैवव्याख्यानमपीत्युक्तं।तत्रोपोद्घातात्दर्शपूर्णमासौव्याख्यातौ।
तत्प्रसंगादतिदेशस्तत्प्रसंगात्कालविधिः।तत्प्रसंगादेवाग्निहोत्रहोमप्रकारविधिःपरिभाषाप्र
संगात्कथंचिदानंतर्ययोगविधिः।सूत्रत्रयेणैवंगतेसतिप्रथमप्राप्तमाधानमुच्यते।विशिष्टका
लेविशिष्टदेशेविशिष्टपुरुषेणविशिष्टैर्मंत्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थंयदंगानांनिधानंतद
ग्न्याधेयमुच्यते।अग्नीनामाधेयमग्न्याधेयंअग्न्याधेयंकर्तव्यमित्यर्थः।अस्मिन्कालइत्याह।कृ

त्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः। फल्गुनीष्वि
ति पूर्वे उत्तरे च गृह्येते। अविशेषाद्बहुवचनाच्च। प्रोष्ठपदे तूत्तरे एव। अतः सप्तैतानि नक्ष
त्राणि तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्तव्यमित्यर्थः। एतेषां कस्मिंश्चित् पर्वणि॥ एतेषां क
स्मिंश्चित्पर्वणि एवमेतत्सूत्रमर्थतो द्रष्टव्यं। उत्तरं च सूत्रं वसंते ——— ब्राह्मण आदधीते
ति। एवं कृते सर्वमनुगुणं भवति। एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि चाग्न्याधेयं क
र्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्वसूत्रं तु केवलं न
क्षत्राणामेवाधानसंबंधं विदधाति। अतो द्वौ पक्षौ स्तः। तत्र समुच्चयः प्रथमः कल्पः। तदसंभवे
केवलं नक्षत्रमेवेति विनिवेशो युक्तः। इदं पक्षद्वयं सोमाधानवर्जितेषु सर्वेष्वाधानेषु भवति।
वसंते पर्वणि ब्राह्मण आदधीत। इदमपि सूत्रमर्थत एवं भवति। अनेन वसंते ब्राह्मणगु॰

णकमाधानंविधीयते।ग्रीष्मवर्षाशरत्सुक्षत्रियवैश्योपकुष्टाः।वैश्यस्तत्स्वकर्मोपजीवीउपकुष्ट

स्तुच्यते।अस्मिंत्सूत्रेत्रीण्याधानानिविधीयंते।ग्रीष्मेक्षत्रियगुणकं।वर्षासुवैश्यगुणकं।शरदि

उपकुष्टगुणकंचेति।एतेवसंतादयःशब्दाऋतुवाचकाऋतवोनामषट्वसंतग्रीष्मवर्षाशरद्धेमं

तशिशिराः।तेचचैत्रमासमारभ्यद्वौद्वौमासावृतवोवसंतादयोमासाश्चैत्रादयएव।यस्मिन्कस्मिंश्चि

दृतावादधीत।आदधीतेतिप्रकृतेपुनरादधीतेतिवचनंआपत्कल्पोयमाधानविधिरितिदर्शयति।अ

त्यंतापदिमुमूर्षोःसर्वेष्वृतुषुआधानंकर्त्तव्यंनैवानाहिताग्निर्म्रियेतेति॥इदंचापरमाधानं[illegible]पूर्वो

क्तानिचत्वारितेषुसर्वेषुपर्वनक्षत्रविधयउपसंहर्त्तव्याः।नपर्वर्त्तुस्वातंत्र्येणाधानस्यकालविधयोभ

वेयुः।अतएवचसूत्रकारःपर्वनक्षत्रविधीनामृतुविधिभिःसंबद्धानामेवाधानकालताप्रदर्शनार्थ

मेव।एतेषांकस्मिंश्चिद्वसंतइतिपर्वनक्षत्रसमुच्चयविधिपरेसूत्रेपठितव्यंपर्वशब्दंउत्तरसूत्रायप

एतचांद्रमासाः
य

57

ष्ठितव्यं ऋतुशब्दं व्यतिषज्य पठितवान्। पर्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च ना
स्ति। तत्रैव तयोरंतर्भावदर्शनादिति। सोमेन यक्ष्यमाणो नर्तुं प्रच्छेन्न नक्षत्रं। अद्यैव सोमेन य
क्ष्य इति संकल्प्य य आधानमिच्छेत् स आधानस्य कालं नापेक्षेत सोमोपक्रमकाल एवादधीतेत्यर्थः।
अयमपि मुख्य एवाधानकालः। ऋतुनक्षत्रनिरपेक्षवचनं पर्वणोरपि प्रदर्शनार्थं। अस्य च मू
लं यदहरेवैनमिति श्रुतिः सोमाधानस्य विधायिका न सोमस्य तेन वसंतसंबंधित्वं सोमस्य न
बाध्यते। इष्ट्युत्तरकालतातु बाध्यते। सोमाधानयोरनंतर्यविधानादिति। अश्वत्थाच्छमीगर्भाद
रणी आहरेदनपेक्षमाणः॥ शम्याः गर्भः शमीगर्भः। तस्मादश्वत्थादरण्याहरणं कर्तव्यं। त
च्चाधानार्थमाहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानोप्यनेन मंत्रे
णाहरेत्। अनपेक्षमाणः पश्चतोनवेक्षमाणः। अयमपरोर्थः। कुर्यान्न कुर्यादिति नास्मदपे।

यजमानपक्षे

क्ष्यमाणः। अध्यवसिताधान इत्यर्थः। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वा हरामि ब्रह्म
णा यज्ञियैः केतुभिः सहेति। पूर्णाहुत्यंतमग्न्याधेयं। पूर्णाहुतिरंते यस्य तत्पूर्णाहुत्यंतं आऽग्न्याधे
यं कर्तव्यमित्युक्तं। न चाग्न्याधेयमरण्याहरणादि पूर्णाहुत्यंतं भवतीत्यर्थः। अस्य सूत्रस्य प्रयो
जनं पूर्णाहुत्यंते आहिताग्निव्रतप्राप्तिः कथमिति चेत्। श्रुतावेवमाम्नातं। अग्नयः पुरुषार्थ
साध्या इति प्रस्तुत्य वसंते ब्राह्मणोग्नीनादधीतेत्येवमादीनि वसंतादिकालानि ब्राह्मणादिकर्तृ
काणि। कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधानानि विधाय ततो अरणी आहरेत्।

फलसमर्पकवाक्यर
हितानि ४

संभारांत्संभरेत्। अग्न्यायतनानि कुर्यात्। केशश्मश्रु वपते। ब्राह्मौदनिकं औपासनिकं नि
दध्यात्। तस्मिन्ब्रह्मौदनं पचेत्। समिध आदध्यात्। आयतनेषु संभारान्निदध्यात्। ब्राह्मौद
निकमरण्योः समारोप्य मथित्वा गार्हपत्यादीनादध्यात्। तत्र काश्चित्समिध आदध्यात्। अ

ग्निहोत्रं जुहुयात्। पूर्णाहुतिं जुहुयात्। तत आग्नेयमष्टाकपालं निर्वपेत्तद्दहरेवा। तद्दह
एादिसंवत्सरं तानीं कालान्नां कस्मिंश्चित्काले पवमानहवींषि निर्वपेत्। तत श्चान्यानि हवीं
षीति। तथाहिताग्निः कुन्नं दारुणीम्याद ध्यात्। नान्नतं वदेत्। इत्यादि आहिताग्निव्रतानि चा
म्नातानि। तथाग्निमन्तायो सिद्धायाम ग्निहोत्रादीनि नित्यनैमित्तिककाम्यानि कर्माणि त
त्रतत्राम्नातानि। तत्र कस्मिन्नवसरे आहिताग्निव्रतप्राप्तिः। कस्मिन्नवसरे अग्निहोत्रादीनामा
रंभ इति तद्विवेकार्थमिदं सूत्रद्वयं। तत्र पूर्वेण सूत्रेण श्रुत्यादिभि प्रकरणरहितैः पंचभिः
प्रमाणैर्यावतः पदार्था आधानविधिना संबध्यंते तावत्सु समाप्तेषु आधानसमाप्तिः। आधान
समाप्तौ चाहिताग्निव्रतप्राप्तिरित्येतत् प्रतिपादयितुं पूर्णाहुत्यंतमग्न्याधेयमित्युक्तवाना

नार्यः। उत्तरेण चाग्निहोत्राद्यारंभकालं प्रतिपादितवान्। यदि ति इष्टयस्तत्रु युः। अग्नीनेवेति

वाक्यशेषः। यद्यनधिकारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्यापारासंभवादाधानांगमि
ष्टयो न स्युः। इष्टीनां चानधिकारत्वादिष्ट्यंगमाधानं न स्यात्। तथापि न कश्चिद्दोषः। अग्न्यर्थत्वेनैवो
भयोरप्यनुष्ठानसिद्धेः। नन्विष्टीनामग्निसंबंधाभावादग्न्यर्थता न संभवतीति चेत्। न। यदाहवनी
ये जुह्वतीति एवमादिभिरग्निसंबंधोऽस्ति। नन्वेष संबंधः साधनत्वेन न दृश्यते। सत्यमेव न दृश्यते।
तथाप्याहवनीयादिष्वग्निषु साध्यत्वबुद्धेरनुवर्तमानत्वादन्यस्य च साध्यस्यानवगमात् त्रिसत्रन्या
ये नाग्नय एवेष्टिभिः साध्या इत्येवमाश्रयितुं युक्तं आनर्थक्याश्रयणादधिकारांतरकल्पनाश्रयणा
च्चेति। तत्राधानेनेष्टिभिश्चाग्निसिद्धिर्भवति। न तयोरन्यतरेण।। तेन सिद्धमग्निहोत्रादीनामग्नि
साध्यानामिष्टिभ्य उत्तरकाल एवारंभ इति। अस्मिन्नर्थे एषा सूत्रयोजना। यद्यप्यासामिष्टीनामाधा
नांगता न स्यात्तथाप्याहवनीयाद्यग्निसंबंधात्तानेवाग्नीनिष्टयस्तनुयुः। विस्तारयेयुः कुर्युः साधये

युरित्यर्थः॥ तुशब्दस्तु आसां आधानात् तु विशेषं दर्शयति। आधानेग्नीनां साध्यत्वेन संबद्धानामेव
साध्यत्वमिष्टिषु साधनत्वेन संबंधानामपि कल्पनागौरवभयात्साध्यत्वमिति विशेषं म[illegible]मः।
एवं यथाधानेनेष्टिभिश्चाग्नय एवांशतः साध्या इति। अनधिकारिणां कथमनुष्ठानसिद्धिरिति न्या
यविदामेष उपालंभो नास्माकं। अस्माकं तु साध्यसाधनसंबंधेवगते तदर्थिनां कर्तृत्वेनावगतानां
ब्राह्मणादीनामेव कथंचिदधिकारकल्पनयानुष्ठानसिद्धिः। अपवानधिकारिणामनन्यशे
षाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन कामश्रुतिप्रयुक्तैरेव एवंविधानामनुष्ठानसिद्धि
रित्यलमतिविस्तरेण। प्रपमायामग्निरग्निः पवमानः। प्रथमायामिष्ट्यां द्वे देवते अग्निरेव प्रथ
मः केवलः॥ द्वितीयः पवमानगुणकोग्निः॥ केवलस्याग्नेर्नित्ये एव। अग्न आयूंषि पवस इत्येते पव
सस्वपाः॥ एते द्वितीयस्य पवमानगुणविशिष्टस्य। स हव्यवाळमर्त्योग्निर्होता पुरोहित इति स्वि

ष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्। सौविष्टकृत्योर्याज्यानुवाक्ययोर्ऋचोरनेन संया
ज्ये इति संज्ञा विधीयते॥ सर्वत्र देवतागमे नित्यानामपायः॥ सर्वत्रेति प्रकरणांतरेपीति दर्शयति।
देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां चाऽगम इत्येवं भवति। नित्या
नां प्राकृतीनामित्यर्थः। अपाय उद्धार इत्यर्थः। एतदुक्तं भवति। विकृतौ देवताया एकस्या आगमे द्वयो
र्वा बह्वीनां वागमेपि प्राकृतीनां सर्वासामुद्धार इति। यस्यां पुनर्विकृतौ इष्टिचोदनां कृत्वा देवता न विद
धाति तत्र नोद्धारः [illegible] प्राकृतीनां तत्र ता एव देवता भवंतीत्यर्थः। यथाग्दितः सोमेन पशुनेष्ट्वा वेत्यादौ।
या स्विष्टकृतमंत आज्यभागौ च तास्तत्स्थाने। नित्यानामपाय उक्तः। तत्र किं सर्वा नित्या उद्धर्तव्या उत का
श्चिद्देवता इत्येतं संशयं निवर्तयति आज्यभागौ स्विष्टकृतं चांतरा या देवता यष्टव्यास्ता उद्धर्तव्याः।
याः पुनर्विकृतौ विहितास्तास्तत्स्थाने उद्धृतानां प्राकृतीनां स्थाने भवंतीति॥ तत् वचनात्। तद्धर्मिकाश्च

भवंतीतिगम्यते। एषसमानजातिधर्मः। योयमुपदिष्टोविधिरेवदेवताभ्योन्यत्रापिससमानजा
तीयेषुभवति। समानजातीयाएककार्याइत्यर्थः।। द्वितीयस्यांहृयन्वंतौ। अग्निःपावकोग्निःशुचिःस
नःपावकदीदिवोग्नेपावकरोचिषा। अग्निःशुचिव्रततमउदग्नेशुचयस्तवाएकःपावकगुणोग्निः।
अपरःशुचिगुणकः। साव्हाग्निश्चा। अभिगुजोग्निमीळेपुरोहितमितिसंयाज्ये। तृतीयस्यांसामिधे
न्यावावपतेप्राग्रुपोत्तमायाःपृथुपाजाअमर्त्यइतिद्वे। आवपतइतिवचनात्। अधिकेएतेसामिधे
न्यौभवतः। प्रथमायांद्वितीयस्यांतृतीयस्यामितिवचनंयस्यामिष्टौयत्तंत्रंविहितंतस्यामेकदेवता
यामपितत्तंत्रंभवति। नयथोक्तनानादेवतायामेवेति। धाय्येइत्युक्तएतेप्रतीयात्सुष्टिमंतावग्निना
रयिमश्नवद्यस्यानोअमीवहेति। अग्नीषोमाविंद्राग्नीविष्णुरितिवैकल्पिकानित्रयाणामेके
गृह्यते।। अदितिः। अदितिश्चान्या। अस्यांद्वेदेवते। उतत्वामदितेमहिमहीमूषुमातरंसुव्रताना

मतस्य पत्नीमवसे हुवेम [illegible] तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिं। एषा क
ल्पजा। प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजौ विलुक्त एते प्रतीयात्। इतिनिगमः॥ इत्येतास्तिस्र
इष्टयोऽनुक्रान्ता इत्यर्थः। ऋक्तानुकीर्तनमुत्तरार्थं। यदा घोत्तमेवैवस्यात्तामा घावेति पक्षस्तदापिति
सृणामिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थं। आघोत्तम पक्षे मध्यमायां ये देवते ते
आघायामेव प्रक्षेप्तव्ये। यदा पुनरग्धे वतदा सर्वा देवता आघायामेव प्रक्षेप्तव्या इत्येवमर्थं। आ
घोत्तमेवैवस्यात्तां। इष्टी इति शेषः। आघावा। आघे व वेष्टिर्भवतीत्यर्थः। तथा सति तस्यामेव धाय्ये
विराजौ। यदा घे वभवति तदा द्वितीयतृतीययोरपि देवतास्तत्र भवन्तीत्युक्तं। अतस्तस्यामेव धाय्ये
विराजौ च भवतः। धाय्याविराजामनुप्रवेशस्य निमित्तं तृतीयस्याः इष्टे देवतानुप्रवेश इत्येवम
र्थं तथा सतीत्युक्तं। इति मात्रे विकारे वैराजतंत्रेति प्रतीयात्। पौर्णमासतंत्राया मिष्टौ धाय्याविराण्मा

त्रैविकारे सति सेष्टिर्वैश्यजनं त्रेति वेदितव्या। आधानाद्वादशरात्रमजस्राः। अत्राधानमिष्टिश्रोक्ता आधानादूर्ध्वं द्वादशरात्रमजस्रा इत्युक्तं। तस्यायमभिप्रायः। यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुं। तेनाग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्यग्रहणं भवतीति सिद्धं। आधानेनेष्टिभिश्च सिद्धा अग्नयो द्वादशाहोरात्राणि सर्वैः स्वरूपेणैव धार्यन्ते। तदजस्रधारणमग्निहोत्रपूर्वमेवाधाने भवति। अग्निहोत्रस्यैवानंतरमुच्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वात्। इष्टिपूर्वे सोमपूर्वे चजस्रान्तराण्यालोच्य विचारणीयं। तत्रायं विचारः। इष्टिपूर्वे जस्रधारणं नास्ति। आपस्तंबवचनात्। अन्यमाहवनीयं प्रणीयाग्नीनन्वादधातीति। इष्ट्यर्थं तयान्यस्य प्रणयनस्य विधानात्। अपरेद्युः श्वोभूते पौर्णमासेन यजेतेति अपवर्जनविधानाच्चात्तथा

सोमपूर्वेपि नास्ति। तस्माद्दीक्षितो द्वादशाहं भक्तिं तन्वीतेति। प्रकृतौ द्वादशदीक्षा नियमादुपसद्भिः
सुत्यया च सह षोडशाहानि प्रकृतेः कालः। अजस्रधारणं तु द्वादशाहपरिछिन्नं। सोममध्ये विह
रणस्य चासंभवः। दीक्षणीया संस्कृतेष्वेवाग्निषु सोमयागविधानात्। अत इष्टिपूर्वे सोमपूर्वे चा
धा जस्रधारणं नास्तीति सिद्धं। अग्निहोत्रपूर्वेपि यदा वीगिष्टिकाला द्वादशाहानि न पूर्यन्ते तदा कथं॥ तत्रै
ते पक्षाः ४। अजस्रे विशिष्टिकरणं। इष्टिलोपः। यथासंभवमजस्रधारणं। अजस्रलोप इति। तत्र यथा
संभवमजस्रधारणमिति पक्षो दुराश्रयः। तथाविध्यभावात्। द्वादशाहकालविशिष्ट एवासौ विधिः
श्रूयते। नान्यकालविशिष्ट इति। नेष्टिलोपपक्षोपि संभवति। अग्निमत्तायां सिद्धायां पौर्णमास
काल आगते तदनारंभे प्रमाणाभावात्। अक्रियायां प्रायश्चित्तोपदेशाच्च। एवं चेदजस्रेष्वेव पौ
र्णमासी भवतु को दोषः। उक्तो दोषः। स्वार्थ एव प्रणीतेन्वाधानदर्शनात्। अपवर्जन विधानाच्चेति। न

न्वग्निहोत्रमपिस्वार्थ एव प्रणीत आहवनीये भवति॥ अर्थायार्थायाग्निं प्रणयतीत्यस्यावि
शिष्टत्वात्। स त्वमविशिष्टं। तथाप्याधानानंतरं धारणविधेः प्रवृत्तत्वात्। तद्वस्थेष्वेवाग्नि
ष्व[illegible]ग्निहोत्राधिकारस्य प्राप्तस्य त्यागे प्रमाणाभावात्। तेष्वेवाग्निहोत्रहोमोऽयुक्तः। एतमेव
न्यायमनुसृत्योक्तं भगवतापस्तंबेन। द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं
जुहुयादिति। तथा प्रणीते चेदग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहुयादेव मन्यत्रापि प्र
क्रांतेतंत्र इति। अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनान्नात्रायं दोष इति गम्यते। अतः अग्नि
होत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनादाधानानंतरमग्निहोत्रस्यानन्यार्थाहवनीय संभवात्। अजस्रे
ष्वेवाग्निहोत्रहोमो न विरुध्यते। पौर्णमास्याः पुनर्द्वादशाहोत्तरकालवर्तिन्याः स्वार्थाहवनीयसंभ
वादजस्रेषु तस्याः प्रवृत्तिर्विरुध्यते। अतोऽजस्रेष्विष्टिकरणमित्ययमपि पक्षो न संभवति। नन्वज

साथैकवेदवित् शुश्रुवानिति श्रौतचंद्रिकायां त्रिवेदविदित्यन्ये ४ तै० सं० २।५।४। शुश्रुवान् ग्रामणी राजन्यं

स्तलोपपक्षेप्याधानात् द्वादशरात्रमजस्रा इतिनित्यवदाम्नानं विरुध्यते। न विरुध्यते। अस्यनि
त्यत्वासंभवात्। उक्तं हि दृष्टिपूर्वे सोमपूर्वे चाप्रवृत्ति करणमिति। तस्मादस्य विध्यंतरानुपरोधे
न प्रवृत्ति दर्शनात्। अकरणे प्रायश्चित्तानाम्नानात्। अस्मिन् विषये अजस्रलोपए व श्रेयानिति
वक्तुं युक्तं। अत्यंतं नु गतश्रियः। अत्यंतं यावज्जीवमित्यर्थः। त्रयो वै गतश्रिय इति श्रुत्तावुक्ताः। गत
श्रीणामग्नयो यावज्जीवमजस्रा भवंति। न द्वादशाहमेवेति। द्वितीये प्रथमः खंडः॥१॥ उत्सर्गे प
राह्णे गार्हपत्यं प्रज्वल्य दक्षिणाग्निमानीय विकुलादिति वतो वैक योनय इत्येके ध्रियमाणं वाप्र
ज्वल्यारणि मंतं वामथित्वा गार्हपत्यादाहवनीयं ज्वलंतमुद्धरेत्। उत्सर्गे अजस्रोत्सर्गे अग्निहोत्र
होमार्थं विहरेत्। नाजस्रेषु होमस्त्वजस्रेष्वपि भवतीत्युक्तं। एवं स्थिते नेविहरणसहितमग्निहो
त्रहोमप्रयोगं वक्तुकाम उत्सर्ग इत्युक्तवान्। अत्रापराह्णशब्देन अह्नश्चतुर्थो भागो गृह्यते विह

रणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्यगृहादानयेत्। चतुर्णां वर्णाना
मन्यतमस्य द्रव्यवतो वा गृहात्। गार्हपत्याद्वा॥ नित्यधार्यश्चेत्संज्वलयेत्। काले काले यद्यग्नि
र्मथ्यस्तदा मंथयेत्। एषां प्रकाराणामुत्सन्निवशाद्व्यवस्था। तेषामन्यतमेन प्रकारेण दक्षिणा।
ग्निं साधयित्वा ततो गार्हपत्यात् ज्वलंतमग्निमाहवनीयार्थमुद्धरेत्। पात्रांतरेण पृथक्कुर्यादि
त्यर्थः। देवं त्वा देवेभ्यः श्रिया उद्धरामीत्युद्धरेत्। अनेन मंत्रेणाग्निहोत्रार्थमुद्धरेत्। पूर्वस्योद्धरे
दिति वचनस्येदं प्रयोजनं। गार्हपत्यं प्रज्वल्येत्यादेराहवनीयं ज्वलंतमुद्धरेदित्यंतस्य मंत्रव
र्जितोद्धरणप्रकारस्य सर्वार्थत्वज्ञापनं॥ एवं सर्वार्थमुद्धरणं विदधतैतत्साधितं भवति। ये
नाग्निना यत्र प्रयोजनं तत्र तस्योद्धरणं कर्त्तव्यमिति। शास्त्रांतरे स्पष्टं वचनमस्ति। अर्थायार्था
याग्निं प्रणयतीति। उद्धरणमंत्रोयमग्निहोत्र एव नान्यत्रेति सिद्धं। उद्ध्रियमाण उद्धर पाप्मनो

मायश्चविद्वान्यश्च विद्वांश्च कार। अग्न आयदेनः कृतमस्ति किंचित्सर्वस्मान्मोद्गतः पाहितस्मादितिप्र
णयेत्। प्रणयेस्माद्व्ययेत्। अग्निं आहवनीयदेशं प्रत्यनेन मंत्रेण। अमृताहुतिममृतायां जुहो
म्यग्निं पृथिव्याममृतस्य योनौ। तयानंतं काममहं जयानि प्रजापतिः प्रथमो यं जिगायाग्नावग्निः
स्वाहेति निदध्यादादित्यमभिमुखः। आदित्याभिमुखो भूत्वानेन मंत्रेणाहवनीयायतनेग्निं नि
दध्यादित्यर्थः। एवं प्रातर्व्युष्टायां तमेवाभिमुखः। एवमेव प्रातर्होमार्थमप्यादित आरभ्य निधा
नांतं कुर्यात्। तमेवाभिमुखो निधीयमानमाहवनीयमेवाभिमुख इत्यर्थः। एवं सति प्रातःकाले
आहवनीयायतनात्स्वस्थानात्स्थितेन निधानं भवति। सायंतु पुरस्तात्स्थितेन। व्युष्टायामुषसि उदि
तायामादित्यो दयात्प्राक्। अग्न आयदेन इति तु प्रणयेत्। प्रणयनमंत्रे अग्न आयदेन इत्यस्य स्थाने रा
त्र्यायदेन इत्येतत्तु कर्तव्यं प्रातःकाले। अत ऊर्ध्वमाहिताग्निर्व्रतचार्याहोमात्। सत्रिधर्मी स्यात्॥

र्मास्य व्रतानि। अत्र व्रतशब्देनोच्यन्ते। विहरणादूर्ध्वमग्निहोत्रहोमप्रयोगसमाप्तेर्व्रत
चारी भवत्याहिताग्निः। अनुदितहोमी चोदयात्। अनुदितहोमी चेत्प्रागुदयात्समाप्ते विप्र
योगे आ उदयाद्व्रतचारी भवेत्। अस्तमिते होमः। अस्तमिते होमः कर्तव्यः। अंगान्यपि प्रधा
नकाले कर्तव्यानि यस्तु नरं गं विहरणवत्सकालविशिष्टं तत्स्वकाल एव कर्तव्यं। नित्यमाचम
नं। उक्तं प्राङ्मुखस्याचमनं यस्तु रत्नान्नदिदानीं कर्तव्यमस्यांगत्वात्। ऋतसत्याभ्यां त्वा पर्यु^
क्षामीति जपित्वा पर्युक्षेत्त्रिस्त्रिरेकैकं पुनः पुनरुदकमादाय। पर्युक्षणमन्त्रेऽपि जपित्वा पर्यु
क्षेदिति पप्रक्षियते। पर्युक्षणातिदिष्टे परिसमूहने मन्त्रो मा भूदिति। त्रिरेकैकमित्येतावतैव
स एकैकस्याग्नेस्त्रिस्त्रिः पर्युक्षणे सिद्धे त्रिस्त्रिरिति वीप्सावचनं मन्त्रस्यापि त्रिरावृत्तिर्भवतीत्ये
वमर्थं। पुनः पुनरुदकमादायेति वचनं न सकृद्गृहीतेन त्रिः पर्युक्षेदित्येवमर्थं। आनंत^

र्यै विकल्पः। अग्नीनां पर्युक्षणादिषु कर्तव्येषु केनानंतर्येण कर्तव्या इत्यानंतर्यविशेषे ज्ञात
व्ये ऽनेन सूत्रेणाग्नीनामुत्सत्तिक्रमस्य होमक्रमस्य च विकल्पो विधीयते। दक्षिणं त्वेव प्रथमे
विज्ञायते पिता वा एषो ग्नीनां यद्दक्षिणः पुत्रो गार्हपत्यः पौत्र आहवनीयस्तस्मादेवं पर्युक्षेत।
पर्युक्षणे अयमेव क्रमः। दक्षिणाग्निं गार्हपत्यमाहवनीयमिति। तत्र श्रुतिमेव हेतुमुपन्यस्यत।
स्मादेवं पर्युक्षेदित्युपसंहृतमनेन पर्युक्षणादिष्टे च परिसमूहने ऽयमेव क्रमः। अन्यत्र पूर्वो
क्तो विकल्पः। अत्र विशेषः। प्रधानात्पूर्वेषामुत्पत्तिक्रमः। परेषां प्रधानक्रम इति। गार्हपत्याद वि
च्छिन्नामुदकधारां हरेत्तं तं तन्वन्तत आसोमात्तु मन्विहीत्याहवनीयात्। अयमाकारो मर्यादयामग्न्यु
पघातविरोधात्। पश्चाद्गार्हपत्यस्योपविश्योदगां गारएन पो हेत्तु हृतस्य स्रुहृतं करिष्यपे
ति। पश्चाद्गार्हपत्यस्य तूष्णीमेव दक्षिणोत्तरिणोपस्थे नोपविश्यागार्हपत्यात्कृतिपयानंगारानहृ

विः॥ श्रपणार्थमुदक्रुपत्यकुर्यात्॥ तेष्वग्निहोत्रमधिश्रयेद्दधिश्रितमध्यधिश्रितमधिश्रितं
हि॰ उ॰ इति॥ तेष्विति पृथक्कृतेष्वंगारेष्वित्यर्थः॥ अग्निहोत्रमिति अग्निहोत्रहोमसाधनभूतं द्रव्य
मुपचर्यते॥ इडायास्सरंघृतवत्सुरंचरं जातवेदो हविरिदं जुषस्व॥ येग्राम्याः पशवो विश्वरू
पास्तेषां सप्तानां मयि पुष्टिरस्त्विति वा॥ अनेन वा मंत्रेणाधिश्रयेत् पूर्वेण वेति विकल्पविधिः॥
नदध्यधिश्रयेत् अधिश्रयेदित्येके॥ दध्यधिश्रयेन्नवेत्येतावतैव सिद्धे गुरुसूत्रकरणं न्यायः॥
विकल्पोयमिति प्रदर्शनार्थं॥ अत्रैके आचार्याः प्रवृत्तिपरत्वाच्छास्त्रस्य कार्यस्य चातींद्रियत्वा
द्रलोपमाहुः॥ आचार्यस्तु कार्यार्थत्वात्प्रवृत्तेः॥ कार्यस्य च दृष्टस्य त्यागे प्रमाणाभावात्॥ तद्त्यागे
संस्कार्यस्वरूपविनाशात् संस्कार्यसंपादकत्वात् संस्कारस्य लोप एव श्रेयानित्याह॥ २॥ पयसा
नित्यहोमः॥ नित्यश्चासौ होमश्च नित्यहोमः॥ स पयसा कर्तव्यः॥ अकामस्याग्निहोत्रहोमः पय

१ × यवागू राजन्यस्य इति कात्यायनसूत्रं तस्योपरि देवयाज्ञिकव्याख्या। तंदुलानां शिथिलः पाको यवागूः सा राजन्यस्य क्षत्रि १
१ × यस्य दीक्षितस्य व्रतं भवति। सा च सिद्धैवोपादेया तस्या ग्न्यधिश्रितभक्षणप्रतिषेधात्। श्रौ० अ ७ खं० ४ सोमप्रकरण
१ × ब्राह्मणस्य यवागूगार्हपत्येधिश्रपणं॥१

साकर्तव्य इत्यर्थः। कामानुपदेशादेकास्वनित्यत्वेसिद्धेनित्यग्रहणमुत्तरार्थं। यवागूरेद
नोदधिसर्पिर्ग्रामकामान्नाद्यकामेंद्रियकामतेजस्कामानां॥ यथासंख्येन ग्रामकामादीनां
यवाग्वादीन्यग्निहोत्रहोमद्रव्याणि भवंति। ग्रामः प्रसिद्धः। अन्नंच तदाद्यंच अन्नाद्यं खा
द्यं। तत्काम इत्यर्थः। इंद्रियं शुक्रं चक्षुरादीनि च॥ तेजस्त्विषिः॥ नित्यहोम इत्यत्रापि संबध्यते।
तेन पुरुषार्थैरपि क्रियमाणो होमो नित्य एवस्यान्न काम्यार्थः। होमाश्रितानि द्रव्याण्येव का
माश्रितानि भवंतीति। अधिश्रितमवज्वलयेत्। अधिश्रितग्रहणात् अधिश्रितमात्र ए
वावज्वलयेन्न कालविक्षेपः कर्तव्य इत्यवगम्यते। अनधिश्रयं दध्यग्निष्टे तेजोमाहार्षीरि
ति। न अधिश्रयो यस्य तत् अनधिश्रयं। अधिश्रयरहितमपि दधि अवज्वलयेदित्यर्थः।
सर्वत्रावज्वलनमंत्रोयं अग्निष्टे तेज इति। दधि चेत्येनावर्तेवसिद्धे गुरुसूत्रकरणं दध्यादीनां

द्रीत्यादीनामपक्कानां संग्रहार्थं। स्रुवेण प्रतिषिंच्यान्नवा शंतिरस्य मतमसीति। पयसा॥
होमे दोहनपात्रप्रक्षालनं स्रुव आनीय तेन प्रतिषिंचेत् अग्निहोत्रद्रव्यं। अन्यत्रोदकेनैव॥
ऋतंतिरिति मंत्रेण॥ नवा प्रतिषेकः कर्तव्यः। तयोर्व्यतिचारः। तयोः प्रतिषेकाप्रतिषेकयोरि
त्यर्थः। अव्यतिचारे संकरः। एकस्मिन्पुरुष इत्यर्थः। एकः सर्वदा प्रतिषिंचेत्। अपरः सर्वदा न
प्रतिषिंचेदित्यर्थः। पुनर्ज्वलतापरिहरेत्त्रिरंतरितं रक्षोंतरिता अरातय इति। पुनर्वचनात्
ज्वलता येनोल्मुकेनावज्वलनं कृतं तेनैव परिहरणमपि कुर्यादिति गम्यते। उल्मुकादानं गा
र्हपत्यादेव न श्रपणार्थात् श्रपणार्थे पर्यग्निकृतस्य पुनः प्रक्षेपविधानात्। अन्यत्र कार्यार्थे प
र्यग्निकृतस्य कार्ये परिसमाप्ते त्याग एव कर्तव्यः। येनावज्वलनार्थे पर्यग्निकृतं अवज्वलने कृते पर्य
गेव निधाय तेनैव परिहरणमपि कृत्वा स्रजेत्। समुद्रं तं कर्षन्निवोदग्रद्वासयेद्द्विवेलां तरि

ते

नै

श्रपयित्वापृथिव्यैत्वेतिनिदध्यात्।सम्यकुउद्भूतःअंतोयस्यद्रव्यस्यतत्समुद्वंतंद्रव्यम्।परितः
स्थालीसंबंधप्रदेशेणतद्दुच्यते॥यदापच्यमानंपयएवमवस्थंभवेत्।तदाकर्षन्निवोद्गु
द्वासयेत्।कर्षन्निवेतिमंत्रार्थगत्येत्यर्थः।निदधदितित्रिभिर्मंत्रैस्त्रिर्निधानंकुर्वन्अवतारयेत्।
प्रथमद्वितीयाभ्यामाकाशेधृत्वातृतीयेनभूम्यांनिदध्यात्।सुहुतकृतस्यसुहुतमकार्ष्टेत्यं
गारेणतिसृज्यस्रुक्स्रुवंप्रतितपेत्प्रत्युष्टंरक्षःप्रत्युष्टाअरातयोनिष्टप्तंरक्षोनिष्टप्ताअरात
यइति।अतिसर्गोगारेणांगार्हपत्येप्रक्षेपः।उत्तरतःस्थाल्याःस्रुचमासाद्योमुंनयानीत्यतिसृ
र्जयीत।स्थाल्याउत्तरतःस्रुचमासाद्यस्रुवहस्तएवसन्नोमुंनयानीत्यनेनमंत्रेणाहिताग्निम
तिसर्जयेत्।आहिताग्निराचम्यापरेणवेदिमतिव्रज्यदक्षिणतउपविश्येतस्रुवोमुंनयेत्य
तिसृजेत्।विहरणकालएवाहिताग्निश्चाध्वर्युःपत्नीचस्नाताचम्यतीर्थेनप्रविशंति।तत्राध

र्धविहरणं कृत्वा होमकाले प्राप्ते निष्क्रम्य प्राङ्मुख उदङ्मुखो वा आचम्य तीर्थेनैव प्रविश्य
पर्युक्षणादि [illegible] कुर्यात्। पत्नी तु गार्हपत्यस्य दक्षिणत आस्ते॥ होमकाले प्राप्ते निष्क्र
म्याचम्या परिसमाप्तेस्तत्रैवास्ते॥ आहिताग्निश्चाहवनीयविहरणकाले दक्षिणत उप
विश्य उद्धर आहवनीयमित्यध्वर्युं संप्रैषमुक्त्वास्ते। ततो होमकाले प्राप्ते निष्क्रम्य प्राङ्मु[illegible]
ख[illegible] उदङ्मुखो वा आचम्य तीर्थेन प्रविश्यापरेण वेदिदेशं पूर्वेण गार्हपत्यं [उत्तरेण] दक्षिणा
ग्निं च गत्वा वेदेर्दक्षिणत उपविशेत्। उपविष्टः सन्नेतदिति सर्जनवाक्यं श्रुत्वाभिमंत्रयेस्माति
सृजेत्। अतिसृष्टो भूरिस्वाभुवद्वा स्वरिस्वा ह्वयध्वमिति स्रुवपूरमुन्नयेत्। अतिसृष्ट इ
तिवचने प्रवसति यजमाने स्वेनैवातिसृष्ट उन्नयेत्। नानतिसृष्ट इत्येवमर्थं चत्वार एते
मंत्राः समस्तात्संसर्गिणां अतश्चतुष्कृत्व उन्नयेत्। स्रुवपूरमिति निमित्तप्रत्यययोगात्।

एम॰
५७

अग्निममग्नियमितिउन्नयनमेदर्शनात्॥स्रुवपूरमितिस्रुवंपूरयित्वापूरयित्वेत्यर्थः॥
अत्रपंचमस्यमंत्रस्याभावात्पंचावत्तिनोनूह्यमेवपंचमुन्नीयते॥पुरुषविशेषधर्मत्वाद म
वदानविशेषसंबंधस्य॥अग्नियममग्नियंपूर्णतमंयोनुज्येष्ठमृद्धिमिच्छेत्सुत्रापां॥योयज
मानःपूर्वजानुसारेणात्मनःपुत्राणामृद्धितारतम्यमिछेत्॥तस्यपूर्वःपूर्वःपूर्णतमोभवेत्॥अ
नेकपुत्रस्यायंकाम्यःकल्पः॥नचतुःपुत्रस्यैव॥योस्यपुत्रःप्रियःस्यात्तंप्रतिपूर्णमुन्नयेत्॥प्रा
कृतानामेवपंचानांचतुर्णांवा॥एकंस्रुवंप्रियंपुत्रंध्यात्वापूर्णमुन्नयेत्॥अयमपिकाम्यःअ
यमेकपुत्रस्यापिभवति॥स्थालीमभिमृश्यसमिधंस्रुवंचाध्यधिगार्हपत्यंहृत्वाप्राणासं॥
मितामाहवनीयसमीपेकुशेषूपसाद्यजान्वाच्यसमिधमादध्यादुज्ज्वतांत्वाग्निज्योतिषंरा
त्रिमिष्टकामुपदधेस्वाहेति॥स्थाल्याःस्रुवेणस्रुचमुन्नयनंकृत्वास्थालीमभिमृश्यस्रुचासहस

१ उप[illegible]र्यध्येसः सामीप्ये इति द्विभीवः १ ५

आ॰श्रौ॰सू॰ मिधं च गार्हपत्याध्यधि गार्हपत्ये गार्हपत्यस्योपरि समीपं हृत्वा आहवनीयस्य वेदीयक्षिना
५८ सिका संमितां हरेत् । हृत्वा तस्य पश्चाद् दूरे कुशेषूपसाद्य दक्षिणं जानु निपात्य तां समिधमाद
58 ध्यात् ॰ रजतामिति मंत्रेण । समिधमाधाय विद्युदसि विद्य मे पाप्मानमग्नौ श्रद्धेत्यप उपस्पृश्य प्र
दीप्तां द्व्यंगुलमात्रेऽभिजुहुयाद्भूर्भुवः स्वरोमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति । समिधमाधायेत्युच्य
ते समिदाधानधर्मस्य जानुनिपातनस्यानुवृत्त्यर्थं । समिधमाधायेत्यनेनैव समिद्ग्रहणेन पूर्वसू
त्रे आदध्यादित्येवोक्तेऽपि समिध एवाधाने सिद्धे यत्पूर्वसूत्रे समिद्ग्रहणं करोति तज्ज्ञापयति । यत्र य
त्र समिधमादध्यात्तत्र तत्र जान्वाच्यादध्यादिति । विद्युदसीत्यप उपस्पृश्य प्रदीप्तां समिधं मूलतो द्व्यं
गुलमात्रेऽभिजुहुयात् । भूर्भुवः स्वरोमिति मंत्रेण । पूर्वामाहुतिं हुत्वा कुशेषु सादयित्वा गार्हपत्यम एम०
वेक्षेत पशून्मे यच्छेति । हुत्वेत्यभिवचनं निपातितजानुरेवोत्तरमपि कुर्यादित्येवमर्थं । पूर्वामितिवच ५८

नं पूर्वाहुत्युत्तरकालीनं स्रुचं सादयित्वैव कुर्यात्। उत्तराहुत्युत्तरकालीनं स्रुग्घस्त एव कुर्यादि
त्येवमर्थः। अथोत्तरां तूष्णीं भूयसीमसंसृष्टां प्रागुदगुत्तरतो वा। अथेत्यानंतर्यवचनेन पूर्वाहु
त्युत्तराहुत्योः संबंधः क्रियते। तेन जान्वाच्येत्यस्यानुवृत्तिर्लभ्यते। प्राधान्यं चोत्तराहुतेः। अतः पूर्वाहुतौ
हुतायां द्रव्यदोषे सति उत्तराहुत्यर्थं द्रव्यमुत्पादयितव्यमेव। भूयसीं पूर्वाहुतेर्भूयो द्रव्यां। असं
सृष्टां पूर्वयाहुत्या प्रागुदक् पूर्वाहुते रुत्तरतो वा तस्या एव। प्रजापतिं मनसा ध्यायात्तूष्णीं होमेषु सर्व
त्र। यत्र तूष्णीं शब्दविशिष्टो होमस्त्राद्यते तत्र प्रजापतिर्देवतां ध्यायेत्। देवतासाध्यत्वाद्धोमस्य॥ ध्या
नत्वादेव मानसत्वे सिद्धे मनोग्रहणं शाब्दध्यानार्थं॥ तेन चतुर्थ्यंतं प्रजापतिशब्दं ध्यात्वा तानंतरेत्स्वा
हेत्युपांशूत्काजुहुयात्। होमेष्विति बहुवचनादेव प्रकरणादुत्कर्षे सिद्धे सर्वत्रग्रहणं गार्ह्येष्व
पि प्रापणार्थं। भूयिष्ठं स्रुग्विशिष्टा त्रिरज्जसकं प्यावमज्यकुशमूले षु निमार्ष्टि पशुं शुम्भस्वेति। उ

आ॰श्रौ॰सू॰
५०

59

त्तराकृते भूयो द्रव्यं पूर्वाकृते भूयिष्ठं यथा भवति तथा भक्षार्थं स्रुचि शेषयेत्। पूर्वाकृत्स्यार्थं प्र
क्षिप्तात् द्रव्यादुत्तराकृत्स्यार्थं भूयो भवति॥ तस्मादपि भूयो भक्षार्थं भवति। तत्पूर्वाकृत्स्यपेक्षया भू
यिष्ठमित्युच्यते। भूयिष्ठं द्रव्यं स्रुचि शेषयित्वा स्रुचमेवाकृतिदेशस्थां प्रकंपयेत्। ततः स्रुग्गातलेपं पा
णिनाधोमुखेनावमृज्य पाणिगतं लेपं कुशमूलेषु निमार्ष्टि निमृज्येत्। पशुभ्यस्त्वेति॥ तेषां दक्षि
णत उत्ताना अंगुलीः करोति प्राचीनावीती तूष्णीं स्वधापितृभ्य इति वा। तेषां कुशमूलानां दक्षिणत उ
त्ताना अंगुलीर्निदध्यात्। प्राचीनावीती भूत्वा स्वधापितृभ्य इति मंत्रेण तूष्णीं वा। अपोवनिनीय। एता
वदेव सूत्रं॥ अपश्च कुशमूलानां दक्षिणतो निनयेत्। अवाचीनेन पाणिना। एतावत्स्रुग्घस्त एव
करोति। एवं वा॥ तेषां दक्षिणत उत्ताना अंगुलीः करोति। प्राचीनावीती॰ निनीय। वृष्टिरसि वृश्च
मे पाप्मानमृस्रुश्चऋदेत्स्य पउपस्पृश्या इदमपि सूत्रमेतावदेवं निधाय स्रुचमप उपस्पृशेत्।

एम॰
५०

आहिताग्निरनुमंत्रयेत। अधिकारोयं। आधानमुक्त्वा तेन ऋषिणा तेन ब्राह्मणा तया देवतयां॰
गिरस्वद्ध्रुवासीदेति समिधं। समिदाधानमंत्रेणानेन ऋषिणोक्तेन मंत्रेण च समिधमाधीयमा-
नामनुमंत्रयते। ता अस्य सूददोहस इति पूर्वामाहुतिं। एतयर्चा पूर्वाहुतिमनुमंत्रयते। उपोत्थायो-
त्तरेणांकं प्रेक्षते ईक्षमाणो भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः इतिकारण्याहा-
रेण सूत्रच्छेदः उत्तराहुते हूयमानाया देशतः कालतश्च समीपे स्थिता करोक्षेणेक्षमाणस्तामेवा-
हुतिमनुमंत्रयते। कांक्षेत न त्रा ब्रूः करोक्षवचनः। केचिदुत्तराहुतिमीक्षमाणोनुमंत्रयते॥ तन्मंत्राभि-
हिताःन्कामान्कांक्षेत चेति वर्णयंति। आग्नेयीभिश्च। याभिः काभिश्च त्र्यवराभिराग्नेयीभिरुत्तरा-
मेवाहु तिमनुमंत्रयते। अग्न आयूंषि पवस इति तिसृभिः ३। संवत्सरे संवत्सरे। पूर्णे पूर्णे संवत्सरे
एताभिरधिकाभिः सकृदनुमंत्रयेत। यवाग्वा पयसा वा स्वयं पर्वणि जुहुयात्। यवाग्वा पयसा वा स्व-

यं पर्वणि पौर्णमास्याममावास्यायां च सायं प्रातर्यजमानः स्वयमेवाग्निहोत्रं जुहुयात्। अस्मिंस्तंत्रे
पर्वणि द्रव्यमिति नियमः स्वयं कर्तृनियमस्य विधीयते। स्वयं होमे समिधमनुमंत्र्य विद्युदसीति॥ पू
र्वा। माहुतिमनुमंत्र्य परश्न्मेयक्षेत्युत्तरा माहुतिमनुमंत्र्य वृष्टिरसीति सेवं क्रमो भवति। यत्किंचि
दग्निहोत्रद्रव्यं काम्यं वैकल्पिकं वा प्रयुज्यते तत्सायमुपक्रम्य प्रातरपवर्गं प्रयुज्यते। नान्यथे
ति। प्रतिनिधिस्त्वेकप्रयोगपर्यवसाय्येवा। ऋत्विजामेकं इतरं कारयें। ऋत्विजां मध्ये एकः कश्चि
दृत्विगितरस्मिन्काले ऽग्निहोत्रं जुहुयात्। अंतेवासी वा। इतरस्मिन्काले ऽग्निहोत्रं जुहुयादिति शे
षः। अंते समीपे वसतीत्यंतेवासी स पुनः पुत्रः शिष्यो वा। अत्र किंचिदुच्यते। ऋत्विजस्त्रिवि
धाः॥ देवभूताः पितृभूताः मनुष्यभूता इति। ये कर्मणि कर्मणि क्रियंते ते देवभूताः। ये ऽन्वयागताः
ऋत्विजः ते पितृभूताः ये त्वेकस्य पुरुषस्य सर्वाणि कर्माणि कर्त्तुं क्रियंते ते मनुष्यभूताः। तत्र

यस्याहिताग्नेःपितृभूतामनुष्यभूतावाऋत्विजःसंति।तेषांऋत्विजामेकःकश्चित्सर्ववर्जिते
षुकालेषुजुहुयात्।यस्यदेवभूतास्तस्यांतेवास्येवेतिविनिवेशः।स्रुह्वोदकमुदञ्जुहूत्यभस्मये
त्।उक्तमेवोदकोपस्पर्शनंकृत्वाउदगाहृत्यस्रुग्गातंशेषंभस्मयेत्।उक्तसंकीर्तनमाहिताग्न्यधि
कारेसस्यपिहोमकर्तृप्रापणार्थं।अपरयोर्वाहुत्वा।भस्मयेदितिशेषः।आयुषेत्वाप्राश्नामीति।
प्रथमं।अन्नाद्यायत्वेत्युत्तरं।प्रथममुत्तरमितिभस्मयोःसंबंधकरणार्थं।तेनोत्तरस्यापिमंत्रस्य
प्राश्नाम्यंतताभवति।तूष्णींसमिधमाधायाग्नयेगृहपतयेस्वाहेतिगार्हपत्ये।जुहुयादित्यध्या
हारः।तूष्णींग्रहणमाहवनीयेसमिदाधानेहोमेचयेधर्माःजानुनिपातनंप्रदीप्ताभिहोमोद्व्यंगुला
भिहोमश्चतेषांप्राप्तिसूचनार्थं।मित्योत्तरा।उत्तराहुतिंतूष्णींभूयसीमित्येवमुक्तेसार्थः।तूष्णीं।
समिधमाधायाग्नयेसंवेशपतयेस्वाहेतिदक्षिणे।अग्नयेऽन्नादायान्नपतयेस्वाहेतिवा।मंत्रवि

कल्प्योयं। नित्योत्तरणागतार्थमेतत्। भक्षयित्वाप्यात्ममपःस्रुचानिनयते त्रिः सर्पदेवजनेभ्यः स्वा
हेति॥ भक्षयित्वेति वचनं भक्षणानंतरमेव निनयनमपि स्यादित्येवमर्थं॥ अप्यात्ममपःस्रुचानि
नयते त्रिः असंस्कारकर्मत्वान्मंत्रोपि त्रिरेवर्तते। अथैनां कुशैः प्रक्षाल्य चतस्रः पूर्णाः प्राग्
दीच्योर्निनयेद्वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेति। अथैतस्याप्यात्म
निनयनानंतरमेवेदमपि कर्तव्यमिति दर्शयति। एनां स्रुचमित्सर्पः। विहारस्य प्राग्देशे
पूर्णाश्चतस्रः स्रुचो निनयेत्। एकैकेन मंत्रेणैकैकामिति। पंचमीं कृत्वा देशे पत्युर्व्याममम
तं जुहोम्यग्नये वैश्वानराय स्वाहेति षष्ठीं पश्चार्द्धे पत्न्यस्य प्राणममृतं जुहोम्यमृतं प्राणे
जुहोमि स्वाहेति। पंचमीषष्ठीमिति पूर्णा [illegible] स्रुक् संप्रत्ययार्थं। प्रताप्योतर्वेदिं निदध्यात्। प्रतप
नमाहवनीये अं[illegible]तर्वेदिं यवमन्वपात्। प्रताप्य स्रुचमंतर्वेदिं निदध्यात्। परिकर्मिणो वा

प्रयच्छेत्। परिचारकः [illegible] पदिकर्मोत्नुच्यते। अग्नेणाहवनीयं परीत्य समिध आदध्या
त्ति स्यँउदञ्जुखस्तिष्ठन्। पूर्वेणाहवनीयं विहारस्य दक्षिणार्द्धं गत्वा तस्य तस्याग्नेर्दक्षिणत उ
दञ्जुखः स्तिष्ठन्तिस्वस्तिस्यः समिध आदध्यात्। पुनः प्रत्येत्य पर्युक्षणादि कुर्यात्। प्रथ
मां सममंत्रां। सकृन्मंत्रेणेति परिभाषा प्रधानकर्मसु न प्रवर्तत इति कृत्वा प्रथमां सममंत्रामित्युक्तवा
नाचार्यः। आहवनीये दीदिहीति गार्हपत्ये दीदायेति दक्षिणे दीदिद्दायेति। सर्वे स्वाहाकारान्ताः क
र्त्तव्याः। उक्तं पर्युक्षणं [illegible]। यदुक्तं पर्युक्षणं तदिहापि कर्तव्यं। ताभ्यां परिसमूहने। पूर्वोक्तमिदं चेद्
पर्युक्षणेनाभ्यां परिसमूहने व्याख्याते इति। धर्मातिदेश एकोऽर्थः॥ परिसमूहने इति योगविभा
गात्स्वरूपसिद्धिश्च भवति। मंत्रस्तु जपितेति पक्षे प्रकरणात्त्र भवति लिंगाभावाच्च। पूर्वेन्तु पर्यु
क्षणात्। येद्दे परिसमूहने पर्युक्षणधर्मके विहिते तयोरनेन क्रमो विधीयते। पर्युक्षणाभ्यां

पूर्वं परिसमूहने भवत इति एवं प्रातः सायंकालेऽग्निहोत्रविधिरुक्तः। एवं प्रातःकालेऽपि हो-
मः कर्तव्य इत्यर्थः। तत्र विशेषमाह। उपोदयं व्युषित उदिते वा। उपोदयमादित्योदयसमीप-
मित्यर्थः। व्युषिते उषस्युदित इत्यर्थः। उदिते आदित्यमंडले कृत्स्ने उदित इत्यर्थः। एते त्रयः
प्रातर्होमप्रधानकालाः। तत्रय उपोदयमुदित इत्युच्यते। उदित आदित्ये सति। उदयसमीप इ-
ति द्वाभ्यां पदाभ्यामेक एव कालो विहितः स्यात्तां न ज्ञांति निहत्यर्थं व्युषितशब्दात्पूर्वमुपोदयश-
ब्दे पठितवानाचार्यः। एतेषु त्रिषु कालेषु प्रधानं यथासंपद्यते तथा। गानामेवोत्कर्षापकर्षौ
वा द्रष्टव्यः। सत्यकृताभ्यां त्वेति पर्युक्ष्य पूर्वमोमुं ने व्यामीत्वति सर्जनं हरिणीत्वा सूर्यज्योतिषम-
हरिष्टकामुपदधे स्वाहेति समिदाधानं भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति होमउ-
न्मार्जनं च। एते प्रातर्होमे विशेषाः॥ ३॥ प्रवत्स्यन्नग्नीन्प्रज्वल्याचम्यातिक्रम्योपतिष्ठते॥ यस्मि-

न्गामे अग्नय आसते तस्मात्स देशाद्ग्रामांतरे एकरात्राव मोवासः प्रवासः। तं करिष्यन्प्रव
त्स्यन्भवति। अग्नीनिति बहुवचनात्सर्वान्विहृत्य प्रज्वलयेत्। प्रज्वल्याऽच्युतीर्थदेशे नप्र
पद्याति क्रम्याग्नीनुपतिष्ठते। अतिक्रम्येति अव्यक्तोपस्थानदेशमतिक्रम्य अत्यंतसमी
पंगत्वा तं तमग्निमुपतिष्ठत इत्यर्थः। इदं कर्माहिताग्निः स्वयमेव कुर्यात्। इमं मनेनेत्याह। [illegible]
[illegible]। आहवनीयं त्रांस्य पशून्मे पाहीति। गार्हपत्यं नर्य प्रजां मे पाहीति। दक्षिणमथर्व पितुं मे पा
हीति। गार्हपत्याहवनीयावीक्षेते मानमे मित्रावरुणौ गृहा गोपायतं युवं। अविनष्टान्विहृता
न्पूषेतानभिरक्षतु स्माकं पुनरायनादिति। दक्षिणाग्निमुपस्थापयतत्रैव तिष्ठन्गार्हपत्याह
वनीयावीक्षेत। इमान्मे मित्रावरुणाविति। उत्तरत्रयपेतं प्रत्येत्येति वचनात्तत्रैव तिष्ठन्निति
लभ्यते।। द्विवचनलिंगाद्युगपदेवेक्षेत। यपेतं प्रत्येत्य प्रदक्षिणं परियन्नाहवनीयमुपति

ष्ठते। ममनामप्रथमं जातवेदः पिता माता च दधतुर्यदग्रे। तत्त्वं बिभृहि पुनरा ममैतोस्त
वाहं नाम बिभराण्यग्न इति। आहवनीयमुपस्थाय उत्तरेण विहारं गत्वा गार्हपत्यस्य प्र
त्यगुदग्देशेऽत्यंतसामीपं गत्वा तमुपस्थाय तद्वदेव स्थित्वा दक्षिणाग्निमुपस्थाय तत्रैव
तिष्ठन् गार्हपत्यमाहवनीयं चेक्षणं कृत्वा पुनस्तेनैव मार्गेणाहवनीयसमीपं गत्वा ततो ग
मनाय प्रदक्षिणमावर्तमान आहवनीयमुपतिष्ठते। ममनामप्रथममित्यनेन मंत्रेण। प्र
व्रजेदनपेक्षमाणो मा प्रगामेति सूक्तं जपन्। पष्ठतोग्नीन्नेक्षमाणो मा प्रगामेति सूक्तं।
जपन्। यथेष्टं गच्छेत्। सूक्तं गन्तृणमनम्यासार्थं। आरादग्निभ्यो वाचं विसृजेत्। अग्निभ्यो
दूरं कृत्वा वाचं विसृजेत्। यावदग्नेरग्न्यागारगृहदर्शनं दृश्यते तावदत्राराच्छब्देनोच्यते। अत्र
वाग्विसर्गविधानादितः प्राक् वाग्यमन एव सर्वं कुर्यात्। सरस्सुगः पितुमां अस्तु पंथा इति पं

आचमनादि सर्वं तत्रैव भवतीति केचित्॥

थानमवरुह्य॥ ब्रूयादिति शेषः। योभिलक्षित देशगामी पंथास्तं प्राप्येत्यर्थः। अनुपस्थिताग्नि
श्चेत्प्रवासमापद्येते हैव संतत्र संतं त्वाग्ने हृदा वाचा मनसा वा बिभर्मि। तिरो मा संतं मा प्रहासी
र्ज्योतिषा त्वा वैश्वानरेणोपतिष्ठत इति प्रतिदिशमग्नीनुपस्थाय। गच्छेदिति शेषः। यदि कदा
चिद्यथोक्तोपस्थानमकृत्वैव गंतव्यं स्यात् हैवान्मानुषाद्वा निमित्तात्तदा तत्रैव स्थित इहैव सन्नित्य
नेन मंत्रेण उत्पत्तिक्रमेण तं तमग्निं ध्यात्वा तां तां दिशमग्नीनभिमुख उपस्थाय गच्छेत्। अपि
पंथामगन्महीति प्रत्येत्य। ब्रूयादिति शेषः। प्रवासं कृत्वा प्रत्येत्य स्वग्रामसमीपं प्राप्यापि पंथाम
गन्महीति ब्रूयात्। समित्पाणिर्वाग्यतोग्नीञ्ज्वलतः श्रुत्वाभिक्रम्याहवनीयमीक्षेत। विष्णुरानीमा
भरं तोनातुरेण मनसा। अग्ने मा ते प्रतिवेशा रिषाम। नमस्ते अस्तु मीढुषे नमस्त उपसद्य
ते। अग्ने सुभस्त्वं नः संमा रय्यास जेति। वाक्यतः समिधो गृहीत्वा पुत्रेण शिष्येण वा पूर्वं प्र

१ उपस्थायेत्यस्य साकांक्षत्वान्मा प्रगामेति भवतिवाग्विस
र्गो न भवति अग्नीनामभावादिति सिद्धांतभाष्ये। १

आ॰श्रौ॰सू॰ ६४

64

स्थापितेनाग्नीन्विहृतान्प्रज्वल्य ततः श्रुत्वा स्वयमाहिताग्निरचम्य शुचिर्भूत्वा तीर्थेन प्रपद्याव्यक्त
देशाद्दसंतं समीपदेशमभिक्रम्याहवनीयमीक्षेत विश्वदानीमिति द्वाभ्यां मंत्राभ्यां। अग्निषु स
मिध उपनिधायाहवनीयमुपतिष्ठते। ममनामतव च जातवेदो वासी इव विवसा नो च एवः।
तेविभ्रवो दहसे जीवसे च यथा यथं नो तन्वौ जातवेद इति। इदानीमानीताः समिधो विभज्य तेंऽस्या
ग्नेः समीपे निधाय तत आहवनी[illegible]यमुपतिष्ठते। ममनामतव चेत्यनेन मंत्रेण। ततः स+ स्वत+
मिधोभ्याद्ध्यात्। उपनिहिता एवास्मिन्नेने स्वाहा। आहवनीये। अगन्म विश्ववेदसमस्मभ्यं
वसुवित्तमं। अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्व स्वाहेति। गार्हपत्येऽयमग्निर्गृहपतिर्गार्हप
त्यः प्रजाया वसुवित्तमः। अग्ने गृहपतेभि द्युम्नमभि सह आयच्छस्व स्वाहेति। दक्षिणेऽयमग्निः पु
रीष्यो रयिमान्पुष्टिवर्धनः। अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छस्व स्वाहेति। गार्हपत्याहवनीया

रा॰म॰
६४

वीक्षेते मान्मे मित्रावरुणौ। गृहान जुगुपतं युवं। अविनष्टान विहृतान्पूषेनान्यस्यक्षीदस्मा
कं पुनरायनादिति। दक्षिणाग्निसमीपे स्थित इत्युक्तं। यथेतं प्रसेत्स। परिसमुत्थोद्गिविहरणदु
पविश्य भूर्भुवः स्वरिति वाचं विसृजेत। यथेतमित्युक्तार्थं। यथेतं प्रसेत्स सर्वस्य विहारस्य परिसमू
हनं कृत्वा तस्योत्तरत उपविश्य वाचं विसृजेत। भूर्भुवः स्वरित्यनेन। असत्यपि प्रवासनिमित्ते एवं
प्रयोगक्रमः। सति तु नं निमित्ते यथेतं प्रसेत्स नं नैमित्तिकं कृत्वा परिसमूहनवाग्विसर्गौ कुर्यात। एव
मेव सूत्रस्वरूपं विविच्यं। प्रोष्य भूयो दक्षिणत्राद्वगुर्गृहान माडं जुया मनो ज्योतिर्जुषतामाज्यं मे विच्छिन्नं ऊ ४
यज्ञं समिमं दधातु। या इष्टा उषसो या अनिष्टास्ताः संतनोमि हविषा घृतेन स्वाहेति। दक्षिणत्राद्वूर्ध्वं प्रवा
सं कृत्वा जुहोति चतुर्गृहीतं गृहीत्वा तया जुहोति। मनो ज्योतिरित्येतयर्चा। चतुर्गृहीत शब्दादेवाज्यद्र
व्यसिद्धौ सत्यामाज्यग्रहणं तूष्णीमुत्सवनकाभार्थं। अग्निहोत्राहोमे च। अग्निहोत्रहोमविधे देवैता

आ॰श्रौ॰सू॰
६५

65

माहुतिं जुहुयात्। विच्छेदाभावात्। एकस्य द्वयोर्बहूनामपि विच्छेदे एष एव प्रायश्चित्तिः कार्या। प्रतिहो-
ममेके परिसमुह्योदग्विहारादुपविश्य भूर्भुवः स्वरिति वाचं विसृजेत। न ह्यत्र ध्याहार्यः। एता-
माहुतिं हुत्वा प्रतिहोमं च कुर्यादित्यर्थः। प्रतिहोमो नाम यावंतः कालाहोमेन विच्छिन्नास्तावता-
मेवैकैकं कालं प्रत्येकैको होमः कर्तव्यः। इत्येवं परिसमुह्येत्यादि पूर्वमेव व्याख्यातं। गृहानीक्षेताप्य-
नाहिताग्निर्गृहमा विभीतोपवः स्वस्त्येवोऽस्मासु च प्रजायध्वं मा च वो गोपतीरिषदिति प्रपद्येत
गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरानिदं वहंतो घृतमुक्षमाणास्तेष्वहं सुमनाः
संविशानीति शिवं शग्मं शं योः शं योरिति त्रिरनुवीक्षमाणः। ईक्षणं प्रपदनं चानाहिताग्निरपि
कुर्यात्। गृहमा विभीतेतीक्षेत। गृहानहमिति प्रतिपद्येत। प्रपद्यमान एवं प्रपद्येत॥ शिवं शग्मं
शं योः शं योरिति त्रिरनुवीक्षमाणः। अनुवीक्षणमनुमंत्रणं। मंत्रेण प्रकाशनं। [illegible] स्तुनर्मंत्रेण।
तं

रा॰म॰
६५

विनाकर्तुं न शक्यत इति मंत्रोपि त्रिरेव वर्तते। विदितमप्यलीकं न तद् गृहे ज्ञापयेयुः। अलीकम

प्रियमवगतमप्यप्रि[illegible]यं प्रवासादागतस्य तस्मिन्नहनि न निवेदयेयुः। विज्ञायते भयं वो

[illegible] भयं मेस्त्विति त्वे वोपतिष्ठेत प्रवसन्प्रत्येत्याहरहर्वेति। वाशब्दश्च शब्दस्यार्थे। अभयं वइ

त्यनेन मंत्रेण प्रवत्स्यन्प्रवासादागतश्चाहरहरग्निहोत्रहोमे च उपतिष्ठेतेति श्रुतिरेवोपन्यस्ता।

विज्ञायत इति। अस्मिन्प्रसंगे प्रयोगक्रमः। विहृत्य प्रज्वल्याचम्य तीर्थेन प्रपद्य तन्त्रे व्यवस्थित्वा सर्वान

ग्नीन्त्संस्कृत्य दैवोपस्थाय प्रदक्षिणमावृत्य तीर्थेनैव निष्क्रम्य मा प्रगाम इति जपन्प्रव्रज्य सदासुगा इ

ति पंथानं प्राप्य ब्रूयात्। प्रत्येत्य अपि पंथामित्युक्त्वा विहृतान्ज्वलितान्तीर्थेनैव प्रपद्य तन्त्रे व्य

स्थित्वा अभयं व इत्युपस्थाय परिसमूहनादिशेषं पूर्ववत्। अतिप्रवासोस्ति चेत्तत्स्वनैमित्ति

कमपि कुर्यात्। अग्निहोत्रहोमे च दक्षिणाग्निहोमानन्तरं अभयं व इत्युपतिष्ठेत। पूर्वोक्तस्यया

66

जमानस्यानुमंत्रणत्वादस्य चोपस्थानत्वान्न विकल्पः॥ तेन समुच्चय एव। अनुपस्थिताग्नेः
प्रवासे इहैव सन्निरसेताव देवा नान्यत्किंचित्॥४॥ अमावास्यायामपराह्ने पिंडपितृयज्ञः।
अमावास्याशब्दः प्रतिपत्संचदर्शयोः संधिवचनोप्यत्रापराह्णशब्दसमन्वयान्नहृत्यहोरा
त्रे वर्तते। तत्रापराह्णेऽह्नश्चतुर्थभागे पिंडपितृयज्ञः कर्तव्यः। औपवसथ्येहनि यजनीये वा काउरूप
हनि। यजनीये चेत्स्वार्थ एव दक्षिणाग्निः प्रणीयते। यदा पुनरहोरात्रसंधौ तिथिसंधिः॰ सायंप्रातःसंधौ
स्यात्तदौपवसथ्य एवाहनि क्रियते। दक्षिणाग्नेरेकोल्मुकं प्राग्दक्षिणा प्रणये घेरूपाणिप्रति
मुंचमाना असुराः संतः स्वधया चरंति। परापुरोनिपुरो ये भरंत्यग्निष्टाल्लोकात्प्रणुदात्वस्मादि ६६
ति। एकोल्मुकं एकतः प्रदीप्तमुल्मुकं प्राग्दक्षिणा प्राक् दक्षिणस्यां दिशीत्यर्थः। दक्षिणाग्नेः सका एम॰
शादेकोल्मुकं गृहीत्वा तस्मादेव प्राक् दक्षिणस्यां दिशि प्रणयेत्। ये रूपाणीत्यनेन मंत्रेण। सर्व २४

अवशिष्टासु दिक्षु विहितानि। प्रागग्न्युपरिस्तरणादीनि

कर्माणि तां दिशं। अवशिष्टदिक्कानि सर्वाणि कर्माणि तामेव प्राक् दक्षिणां दिशमभिमुखानि।
कर्तव्यानि। उपसमाधायेमौ परिस्तीर्य दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग्वैकैकशः पात्राणि
सादयेच्चरुस्थालिशूर्पस्फ्योलूखलमुसलस्रुवध्रुवकृष्णाजिनसकृदाछिन्नेध्ममेक्षणक
मंडलूनि। उभयोरुपसमाधाने परिस्तरणं च कर्तव्यं।। मध्यगतस्योभावितिशब्दस्य विशेष
संबंधे कारणाभावात्। पात्राणीति चरुस्थाल्यादीन्युच्यंते। तेन शब्देन संव्यवहारार्थं।। चरुश्र
पणार्थास्थाली चरुस्थाली चरुस्थाली ध्रुवाशब्दयोश्छांदसं ह्रस्वत्वं। एकेन प्रयत्नेन छिन्नाः
कुशाः सकृदाछिन्नाः। दक्षिणतोग्निष्ठमारुह्य चरुस्थालीं व्रीहीणां पूर्णां निमज्जेत्। निम
ज्यादिति प्राप्ते निमज्जेदिति छांदसः। अग्निसमीपे तिष्ठतीत्यग्निष्ठं शकटं। प्रयाणकाले वा
नयो यत्र तिष्ठंति। तदग्निष्ठं दक्षिणत आरुह्य तत्रैव शूर्पे स्थालीं निधाय व्रीहिभिरापूरयेत्।

२ विवेचोनाम व्रीहितंडुलानां पृथक्करणं तस्य ३
३ प्रतिषेधः।३
४ चेत्याछादकतुषोपसरणं फलीकरणं तन्नेयर्थः।४

तां पूर्णां निमृज्यात्। यथोपरितनाद्बिलदेशाच्छूर्पोपरि पतेत्। परिसव्यान्निदध्यात्। स्थाल्यास्त्र देशाच्छूर्पोपरि पतेत्ततान्व्रीहीन्परिसव्यांछ करे निदध्यात्। कृष्णाजिन उलूखलं कृत्वैतदन्य। त्यवहन्यादविवेचं। कृत्वा निधायेत्यर्थः। इत एतस्याल्यं तंडुलानित्यर्थः। अविवेचं। अविविच्याविविच्येत्यर्थः। अवहतांस्तत्कृत्स्नं प्रक्षाल्य दक्षिणाग्नौ श्रपयेत्। अवहतेषु। अवहननवचनं फलीकरणनिवृत्त्यर्थं। दक्षिणाग्नौ श्रपणवचनं वचनादृते गार्हपत्य एव श्रपणमिति ज्ञापनार्थं। अर्वाग्नि प्रणीतात्स्येन लेखामुल्लिखेदपहता असुरा रक्षांसि वेदिषद इति। दक्षिणाग्न्यतिप्रणीतयोरंतर एव उल्लिखेदित्यर्थः। तामभ्युक्ष्य सकृदाच्छिन्नैर्वस्तीर्य्य आसादयेदभिघार्य स्थालीपाकमाज्यं सर्पिरनुत्पूतं। नवनीतं वोत्पूतं। धृवायामाज्यं कृत्वा दक्षिणतः॥ आज्यं सर्पिरित्यादि धृवायामाज्यं कृत्वा दक्षिणत इत्येवमंतः पदसमूहः। आसादयेदभिघार्येत्यस्मात्पुरस्तादर्थतो द्रष्टव्यः।

पूर्वं

तेनायमर्थः। तां लेखामभ्युक्ष्य कृदाघ्निन्नैरवस्तीर्याज्यं सर्पिर्गृहीत्वा ध्रुवायां कृत्वा दक्षिण
तो दक्षिणाग्नेर्निधाय। तेनाज्येन स्थालीपाकमभिघार्य दक्षिणाग्नेः पश्चादासादयेत्। यदि
नवनीतमाज्यकार्यार्थं स्यात्तदास्य विलापनमात्रं कृत्वान्यस्मिन्पात्र आनीय पवित्राभ्यां तूष्णी
मुत्पूय ततो ध्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधाय तेनाभिघार्येत्यादि समानं॥ द्विती
यस्याज्यग्रहणस्येदं प्रयोजनं। पात्रान्तरस्थमुत्पूय पश्चात् ध्रुवायां ग्रहणमित्येवमर्थं। पू
र्वमाज्यग्रहणं कार्यं लक्षणार्थं। सर्पिः पक्वं नवनीतमपक्वं। आंजनाभ्यंजनकशिपूपबर्ह
णानि। दक्षिणत इत्यत्रापि संबध्यते। विशेषाग्रहणादपेक्षितत्वाच्च। आंजनादीनि च द
क्षिणतो दक्षिणाग्नेर्निदध्यात्। पूर्वसूत्रे अथ यथाविधिक्रमेण सूत्रप्रणयनं। दक्षिणात
इत्यस्योभयार्थत्वाद्ये वा। प्राचीनावीती ध्रुवमुपसमाधाय मेक्षणेनादायावदानसंपदा

आ॰श्रौ॰सू॰
२६८

68

जुहुयात्सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति। इध्मः पंचदशसं
ख्याकः। मेक्षणेनादाय तेनैव जुहुयात्। अवदानसंपदा। अवदानसंपन्नाम उपस्तर
णं द्विरवदानं प्रत्यभिधारणं चात येत्स्वं मूतं जुहुयात्। नात्र स्वाहाकारः। स्वधा नमः शब्द
स्य प्रदानार्थत्वात्। स्वाहाकारेण वाग्निं पूर्वं यज्ञोपवीती। स्वधा नमः शब्दस्य स्थाने स्वाहा
शब्दं वा कृत्वा जुहुयात्। अस्मिन्पक्षे मंत्रविपर्ययः व्यत्यासः। यज्ञोपवीतत्वं च भवति। अ
ग्निं पूर्वमिति॥ अग्नये कव्यवाहनायेत्येतं मंत्रं पूर्वं कुर्यादित्यर्थः। मेक्षणमनु प्रहृत्य प्रा
चीनावीती लेखां त्रिरुदकेनोपनयेच्छुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा
इति। प्राचीनावीतीग्रहणं स्वाहाकारपक्षेपि मेक्षणानुप्रहरणोत्तरकालं प्राचीनावीतित्व
प्रापणार्थं। उभयस्मिन्पक्षेपि मेक्षणमग्नावनु प्रहर्तव्यमेव त्रिभिर्मंत्रैस्त्रिर्निनयेत्। पिंड

एम॰
२६८

यां लेखा २

स्थाने भुग्नस्यां पिंडं निपृणीयात्पराचीनपाणिः पित्रे पितामहाय प्रपितामहायेति तत्ते सोयेचता
मत्रान्विति। अधिकृतायां लेखायां संप्रत्ययार्थं तस्यां ग्रहणं क्रियते। नाधिकारलेखासंबंधो
स्तीति ज्ञापनार्थं। तेन हविरासादनमग्नेः पश्चादिति साधितं भवति। तथैवोक्तं च। निपृणीयाद्घा
दित्यर्थः॥ निपरणं पित्र्येण तीर्थेन॥ पाणौ कृत्वान्नमजहदेव पित्र्येण तीर्थेन यदा कुर्यात
दा पराचीनपाणिर्भवति। असावित्यस्य स्थाने संबुध्यं तानि पित्रादीनां नामानि गृह्णीयात्। न स्ये
तस्मै परेषां प्रेताः स्युरिति गाणगारिः प्रत्यक्षमितरानर्चयेन्न दर्थत्वात्। त्रयाणां मध्ये प्रेतानां
पिंडदानं जीवानां प्रत्यक्षार्चनमिति गाणगारेर्मतं॥ पितृप्रीत्यर्थत्वात्कर्मण इति। सर्वेभ्य ए
व निपृणीयादिति तौल्वलिः क्रियागुणत्वात्। पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो
निपरणं तौल्वलिर्मन्यते। क्रियायामुद्देशकारकत्वेन च गुणभूताः पितरः न तेषां प्रीतिः शास्त्र

आ॰श्रौ॰सू॰
६९

69

वै

तो लोकतो वा गम्यत इति। अपि जीवान्त आत्रिभ्यः प्रेतेभ्य एव निपृणीयादिति गौतमः। क्रिया
त्वर्थकारिता। आदिमध्यान्तशब्दैः पितृपितामहप्रपितामहा उच्यन्ते। जीवः अन्तो यस्य स जी
वान्तः अपिशब्देन जीवादिर्जीवमध्य इत्यपि लभ्यते। जीवसर्व इति च। त्रयाणामेकस्मिन्
द्वयोः सर्वेषु वा जीवत्सु वा यावदर्थं परास्थितत्वना हीत्वा प्रेतेभ्यस्त्रिभ्यो दद्यादिति गौतमो म
न्यते। क्रियात्वर्थकारिता मरणपरार्थप्रवृत्तायस्मात्क्रियेत्यर्थः। उपायविशेषो जीवमृता
नां। पित्रादीनां। जीवानां मृतानां च पिंडदाने उपायविशेषो वक्ष्यत इत्यर्थः। उपन्यस्तान्प
क्षान्दूषयितुमाह। न परेभ्यो नधिकारतात्। न प्रत्यसं। न जीवेभ्यो निपृणीयात्। गौतमगाण
गारितो त्वजीनां क्रमेण दूषणानि। न जीवान्त हि तेभ्यः। जीवव्यवहितेभ्यो न निपृणीयादि
त्यर्थः। सर्वपक्षव्यापीदं दूषणं सर्वत्रानधिकार इत्ययमेव हेतुः। अनधिकारादयोग्यता

एम॰
६९

दित्यर्थः। क्वचिद्विध्यभावात्क्वचिन्निषेधादयोग्यत्वमवगम्यते। अयमुपायविशेष उच्यते। जुहुया
ज्जीवेभ्यः। जीवेभ्यो जुहुयात्तेभ्यो नियणीयादित्यर्थः। न जीवंतमतीयादित्यत्रापि निषेधो स्यद
स्ति। तेन जीवपितुः जीवपितामहस्य जीवोभयस्य वायमपि पक्षो नास्ति। तत्र होमांतमनारंभो वा।
अथ सर्वे पुजीवत्सु कथमित्याह। सर्वं हुतं सर्वजीविनः। सर्वं हुतमिति सर्वे पिंडहोतव्या इत्य
र्थः। पिंडहोमो निपरणमंत्रेण स्वाहाकारेणेतेन कर्तव्यः। अत्र दूषणीयपक्षाणामुपन्यासे प्रयो
जनं। सपिंडीकरणे पितामहे जीवति पितरि मृते संवत्सरादिषु कालेषु तस्यावश्यकर्तव्यत्वात्तत्रै
षां पक्षाणामुपयोग इत्येवमर्थं। एवमादीन्यन्यान्यपि प्रयोजनानि चिंत्यानि। नामान्यविद्वांस्तत
पितामहप्रपितामहेति। पित्रादीनां नामाज्ञाने ततादयः शब्दा नामस्थाने प्रयोक्तव्याः। निपतानेनु
मंत्रयेतात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति। निपूर्णानि ति प्राप्ते निपतानि तिछंद

सो निर्दिष्टः। निपूर्तानेव पिंडाननुमंत्रयेत नहुतानित्येवमर्थं निपृतानित्युच्यते। तेन सर्व
होमेनेदमनुमंत्रणं भवति। अस्मिन्प्रकरणे यद्यपि पिंडानामेवानुमंत्रणमुपस्थानं प्रवा
हणं च विधीयते तथापि मंत्राणां पितृलिंगत्वात्पिंडा एव पितर इति कृत्वा पितर एवैते मंत्रैरभि
धातव्याः। सव्यावृदुदङ्ङावृत्य यथाशक्ति प्राणेनासित्वाभिपर्यावृत्यामीमदंत पितरो यथाभाग
मावृषायीषतेति। अनुमंत्रयेतेति शेषः॥ सव्यावृदुदङ्ङिति एतावतैव सव्यावृदुदङ्मुखत्वयोः
सिद्धयोरावृत्येति वचनमावृत्यैवोदङ्मुखो न पूर्वमिति एतदर्थं॥ यथाशक्त्यनुच्छ्वसन्नासित्वा पुन
रभिपर्यावृत्यामीमदंत पितर इत्यनुमंत्रयते। आवृषायीषतेति यकारः पठितव्यः। विवृतिः ईकारः
प्रमादजा॥ चरोः प्राणभक्षं भक्षयेत्। तूष्णीमेवात्र प्राणभक्षणं कार्यं। निसंनिनयनं। यदुदको राम॰
पनयनमुक्तं शुंधंतां पितर इत्यादिकं तदत्र निनयनमित्युच्यते। तदत्र कर्तव्यमित्यर्थः। अ० ७०

नु

३ न वासो दद्यादिति सिद्धांतभाष्ये दत्वां ऊर्णास्तुकां स्वलोम वा दद्यात् ३

नाजं

सावभ्यंक्ष्वासावंक्ष्वेति पिंडेष्वभ्यंजनं दद्यादिति शेषः। वासो दद्यात् दशामूर्णास्तुकां वा पंचाश-
द्वर्षतायाः ऊर्ध्वं स्वं लोमेतद्वः पितरो वासो मा नो तोन्यत्पितरो युंग्ध्वमिति। एतेषामन्यतमं द्रव्यं
वासोर्थं पिंडेषु दद्यादित्यर्थः। दशां वस्त्रस्याग्रदेशं॥ ऊर्णास्तुकां वा अविलोमानि। पंचाशद्वर्ष-
तायाः पंचाशद्वर्षे व्यतीते पूर्ध्वं जीवन् स्वीयमेव लोम वासोर्थं दद्यात्। मंत्रस्त्वयमेव सर्वेषु द्र-
व्येषु सकृ[illegible]वेदं भवति। अथैनानुपतिष्ठेत नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः
पितरः शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय॥ स्व-
धा वः पितरो नमो वः पितरो नम एतास्माकं पितर इमा अस्माकं जीवा वो जीवंत इह संतः
स्याम। इति कारध्याहारेण सूत्रच्छेदः संतस्यामेति मंत्रः पठितव्यो वकारं वर्जयित्वा। मनोन्वा-
हुवामह इति च तिसृभिः॥ उपतिष्ठेतेति शेषः। अथैनान्प्रवाहयेत्सरेतन पितरः सोम्यासो गं-

२ कल्पांतरे संत्वस्यामेति पाठः अत्र तु संतस्यामेति पाठः अतः कारणा-
द्वकारं वर्जयित्वेत्युक्तं २

ओ॰श्रौ॰सू॰
९९
७१

71

भीरेभिः पथिभिः पूर्व्विणेभिः। दत्त्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छतेति। अत्रा
पि पिंडस्थाने यत्नेनैव प्रवाहयेत्। अग्निं प्रत्येयाद्ग्नेतमघाश्वं नस्तोमेरिति। प्रत्येयादिति वचन
सामर्थ्याद्दक्षिणामुखेनात्र किंचिदनुव्रजनं कर्तव्यं। अग्निं प्रत्येयाद ग्नेतमघाश्वं नस्तोमेरित्यवि
शेषवचनेन दक्षिणाग्निमेव। इतरयोर्विशेषानभिधानात्। गार्हपत्यं यदंतरिक्षं पृथिवीमुत द्यां
यन्मातरं पितरं वाजिहिंसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु करोतु मामनेनसं। इति
प्रत्येयादिति शेषः। वीरं मे दत्त पितर इति पिंडानां मध्यमं। आदद्दीतेति शेषः। पत्नी प्राशयेदाधत्त पि
तरो गर्भं कुमारं पुष्करस्रजं। यथायमरपा असदिति। तमेव मध्यममसि[illegible]ति शेषः। पत्न्येव मंत्रं
ब्रूयादाधत्तेति। अश्विनरो। प्रक्षिपेदित्यर्थः। अतिप्रणीते वा प्रक्षिप्य प्रवाहयेत्। यस्य वा गंतुरन्न
काम्याभावः स प्राश्नीयात्। आगंतुरभिनवः निर्निमित्त एवान्नेच्छाभावो यस्य स वेतरो प्राश्नीया

७१
ए म॰
९९

तः। महारोगेणवाभितप्तः प्राश्नीयादन्यतरं गतिं गच्छति। क्षयकुष्ठादिना शक्यपरिहारेणातिपी
डितः प्राश्नीयादिति पुनर्वचनं पूर्वेणास्य संबंधनिवृत्त्यर्थं। तेनान्यतरमित्यत्रैव भवति। अन्य
तरं गतिं गच्छतीत्यर्थः। स यद्येव अरोगो भवेत् म्रियेत वेति॥ एवमनाहिताग्निर्निस्वे॥ अनाहि
ताग्निरप्येवं पिंडपितृयज्ञं कुर्यात्। निस्वे औपासन इत्यर्थः। अप्रयित्वाग्निं प्रणीय जुहुयात्। त
स्यायं विशेषः। हविः श्रपणं कृत्वाग्निप्रणयनं कर्तव्यं। त स्येवाग्निप्रणीतस्योपसमाधानं परिस्त
रणं कृत्वा ततो वाग्निप्रणीतादित्यादि समानं। जुहुयादित्यस्यानुवादः। अयं चात्र विशेषः। यदं
तरिक्षमित्यस्मिन्मंत्रे गार्हपत्यशब्द उद्धर्तव्यः। तच्छब्दस्य प्रवृत्तिनिमित्तस्य संस्कारस्यात्राभावा
दिति। द्वित्वात्त्राणामुत्सर्गः। द्विरा इत्यर्थः। तणं द्वितीयमुद्रिक्तं। एकस्यातिरिक्त स्य त्यागेन द्वित्वसं
पाद्यो त्सर्गः कर्तव्य इत्यर्थः॥५॥ दर्शपूर्णमासावारप्स्यमानोऽन्वारंभणीयां। पूर्वं दर्शपूर्णमासयोः

स्वरूपमात्रमुक्तं । इदानीं तयोरनुष्ठानारंभ उच्यते । इदानीं तावारभ्यमानस्यान्वारंभणीयावि-
धानात् । यस्मादाधानानंतरमजस्राग्निहोत्रपिंडपितृयज्ञानुष्ठानं तयोरारंभ उच्यते । तस्मादेत
त्साधितं भवति । पौर्णमास्यामाधानमिष्टिं च कृत्वा ततो जस्रधारणमथाग्निहोत्रहोमं च कृत्वामावा
स्यायां पिंडपितृयज्ञं च कृत्वा पौर्णमास्यां तयोरारंभ इति । तत्र यदापस्तंबवचनं पौर्णमास्यां
तु पूर्वस्मिन् पर्वणि सेष्टिः सान्वारंभणीयमपहृत्य श्वोभूते पौर्णमासेन यजेत इति । अस्यायमर्थः ।
पौर्णमास्यामादधानः तदहरेव पौर्णमासीमारभेतेति । तस्यायं विषयः । यस्यां पौर्णमास्यामन्वारंभ
णीयापर्यंतं सर्वं प्रतिपत्संधौ दर्शसंधिक्षणात् प्रागेव कर्तुं शक्यते सास्य विषयः । संध्यनप
गमात्पौर्णमास्याधिकारप्राप्तिरिति । एकस्मिन्नहनि य उत्तरस्मिन्क्षणे दर्शपूर्णमासावारभ
ते स तस्मात्पूर्वस्मिन्क्षणे तावारभ्यमान इत्युच्यते । तस्यान्वारंभणीया कर्तव्या सेयं पुरुषार्था

न कर्मार्था। श्रुत्यादीनामभावात्। दर्शपूर्णमासावारभ्यमान इत्यनेन च कर्मसंबंधो व्यक्तं न शक्यते।
निमित्ततयाधिकारिविशेषणत्वेन उपक्षयात् उद्देशकं न भवितुमर्हति। तस्माद्नंगं तयोरन्वारंभणी
यात् तथापि तत्संबंधिपुरुषसंबंधात्तयोरेवाधिकारित्वेन पुरुषं संपादयतीति। युक्तमुक्तं। अतो दर्शपू
र्णमासावृत्तौ विकृतिषु च न पुनः पुनः कार्येति देशाभावात्। कार्यसंबंध्यतिदिश्यते न पुरुषार्थसंबधम
पीति। अग्नाविष्णू सरस्वती सरस्वान् अग्निर्भगी। भगीत्यग्नेर्गुणः। अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः।
द्युम्नैर्वाजेभिरागतं। अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा। दमे दमे सुष्टुतिर्वामिया
ना प्रति वां जिह्वा घृतमुच्चरण्यत्। पावका नः सरस्वती। पावीरवी कन्या चित्रायुः। पीपिवांसं सरस्वतो दिव्यं
सुपर्णं वायसं बृहन्तं। मासवं स वितुर्यथा सनो रधांस्या भरेति। इष्टेर्याज्यानुवाक्याः। आधानाघघामया
वीयद्दिवार्थाव्यथेरन्धुनरधेयइष्टिः। आमयावी उदरव्याधिमान्। अर्थव्यथा अर्थहानिः। अर्थाः पुत्र

आश्वे.सू.
७३॥
73

पश्चाद्यः। आधानानन्तरं तस्मिन्नेव संवत्सरे यद्येतानि निमित्तानि स्युः तदा पुनराधेयं कर्तव्यमिति। अ
यमर्थोऽस्मिन्सूत्रेऽर्थाल्लभ्यते। तस्मिन्पुनराधेये वक्ष्यमाणलक्षणा इष्टिः कार्येत्यर्थः। तस्यां प्रयाजानुयाजान्वि
भक्तिभिर्यजेत्। तस्यामिति वचनं तस्यामेवेष्टौ नान्यस्यां वक्ष्यमाणो विधिः स्यादित्येवमर्थं। तेन ज्ञायते नैके
ष्टिकं पुनराधेयमिति। विभक्तिभिः सहितान्प्रयाजानुयाजान् कुर्यात्। का विभक्तिः क्व वा प्रदेशे प्रयोक्तव्या
किं सर्वेषूत कतिपयेष्विति। एतेषां संशयानां निवृत्तये चतुरः प्रयाजान्स्वाहितान् विभक्तिभिः सहितान्यष्टि
त्वा द्वावनूयाजौ च विभक्तिभिः सहितौ पठिष्यति अपठितयोरेवाविकृतत्वसिद्ध्यर्थं। समिधः समिधोऽग्नेऽग्न
आज्यस्य व्यंतु। तनूनपादग्निमग्न आज्यस्य वेतु। इडोऽग्निनाग्न आज्यस्य व्यंतु। बर्हिरग्निरग्न आज्यस्य
वेत्विति। नराशंसिनां नराशंसोऽग्निमग्न इति भवति विभक्तिविधानस्याविशेषात्। पाठस्य चोत्तमप्रयाजानुया
जव्यावृत्त्यर्थत्वात्। समिधाग्निं दुवस्यतेत्यूष्यत्र वाचित इत्याग्नेयावाज्यभागौ। सोमस्थानेऽप्यग्निरेवानयोरे

अनेकेष्टिकमि
त्यर्थः अनेकाध्व
र्युशाखाभिप्रायं

एम०
७३॥

तेअनुवाकेऽ। बुद्धिमदिंदुमंतावित्याचक्षते। आज्यभागयोरेतौगुणौ। नचानुवृत्तिः। निगमेषु सगुणयोरे
वानुवृत्तिरित्यर्थः। इज्याचा। इज्याशब्देन याज्यायां देवतादेशा उच्यते। सच सगुणयोरेव कर्तव्यः। केचि
द्विहानुवृत्तिशब्देनैव देवतादेशस्यापि ग्रहणमभ्युपगम्य इज्याच इत्यनेन याज्यामध्यगतस्य अग्निशब्दस्य
सगुणोच्चारणमिच्छंति। नित्यं पूर्वमनुब्राह्मणिनः। नित्यः केवलोऽग्निः। अनुवाकाच्चाग्निर्वृत्राणीत्यनुब्राह्म
णिन आचार्याः। अग्निआपूंषिपवस इत्युत्तरं। उत्तरेपि केवलोऽग्निरियं चानुवाका अनुब्राह्मणिनामेवाभि
प्रायेण। नित्यस्तूत्तरे हविःशब्दः। उत्तरे याज्यामंत्रे हविःशब्दस्य सोमधर्मत्वात् तन्निवृत्तौ तस्य निवृत्तिप्रसं
गे तस्यानापन्नत्वाद्गनेरपि तद्धर्मसंबंध इति मत्वा नित्यस्त्विष्युक्तवान्। आग्नेयं हविः। अधात्यग्नेक्रतो
र्भद्रस्याभिष्टेअघ गीर्भिर्गृणंतएभिर्नोअर्कैःरग्नेनमघाप्यं नस्तोमैरिति संयाज्ये रेवं बर्हिरग्ने र्वसुधे सुवनेव
यस्य वेतु देवो न रणं सोग्नौ वसुवने वसुधे मस्य वेत्विति। गतार्थमिदं॥६॥ आग्नेयपं ब्रीहिश्यामा [illegible]

श्रौ० टी० २ कृपवानां॥ अग्नेअयनं भक्षणं येन कर्मणा तदाग्रयणं॥ प्रथमद्वितीययोर्ह्रस्वदीर्घत्वव्यत्ययः। ए
७४ षां त्रयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानामाग्रयणं नाम कर्म कर्तव्यमित्यर्थः॥ व्रीहिशब्द
स्य प्रथमनिपातो व्रीहीणां प्राधान्यस्थापनार्थं॥ तेन कालचोदना व्रीह्याग्रयणस्यैव भवति॥ श्यामा
74 कशब्दस्य मध्यनिपातो व्रीहिकालाद्यवकालो भिन्न इति ज्ञापयति॥ सस्यं नाश्नीयादग्निहोत्रमहुत्वा॥
सस्यं नवनिष्पन्नं। तन्नाश्नीयात् आग्रयणेनानिष्ट्वा। यद्याग्रयणेनानिष्टवतो नवनिष्पन्नेनान्नं
विना निर्वाहो न स्यात्। तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायं प्रातरग्निहोत्रं हुत्वाश्नीयात्। ततः का
ल आगते आग्रयणं कुर्यात्। अग्निहोत्रमहुत्वा नाश्नीयादिति वचनादाग्रयणेनानिष्ट्वाप्यग्निहो
त्रं हुत्वाश्नतो न दोष इति गम्यते। सस्यग्रहणेन व्रीह्यादिभ्योऽन्यदपि यन्नवनिष्पन्नं तस्य सर्वस्य प्र एम०
तिषेधार्थं। यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत। यदा वर्षं तृप्तिर्लोकस्य भवति तदाऽऽग्रयणे ७८

नयजेत। अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल उक्तो भवति। एतमेव कालं श्रुत्यास
मर्थयति। अपिहि देवा आकुस्त सो नूनं वर्षस्याग्रयणे नहि यजत इति। अग्निहोत्रीं वैना
नादयित्वा तस्याः पयसा जुहुयात्। अथाग्रयणेन यजेतेति। इष्टिरेवाग्रयणमनेनोक्ता। इदा
नीमिदमणुच्यते। अग्निहोत्रहोमार्था धेनुरग्निहोत्री युच्यते। तां व्रीहिश्यामाकयवानां अन्य
तमं आशयित्वा तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात्। इष्टिः प्रथमकल्पस्तदसंभवे अ
यमनुकल्पः। इति द्वावेवाग्रयणकल्पावत्रोच्यते। अपिवाऽक्रियायावेषा। यवेऽग्रयणस्य क्रि
यावाभवेत्। अक्रियावेति विकल्पः। इष्टिस्तु एकं त्रयाणां वर्णानामविशेषेण कल्पद्वये प्राप्ते
ऽज्ञो विशेष उच्यते। इष्टिरेव नान्य इति। सर्वेषां चैके। सर्वेषामपि वर्णानामिष्टिरेवेत्येके म
न्यन्ते। श्यामाकेके ष्ट्यां सोमस्य स्रुरुः। श्यामाकाग्रयणेष्ट्यां सोमदेवत्यस्रुरुर्भवति। कालो वर्षाऋतुः

शास्त्रांतरे च दर्शनात्। सोमयास्ते मयोभुवो याते धामानि दिवि या पृथिव्यामिति। अवांतरेळाया
निलंजपमुक्त्वा सव्ये पाणौ कृत्वेतरेणाभिमृशेत्प्रजापतये त्वा गृह्णामि मह्यं श्रिये मह्यं
यशसे मह्यमन्नाद्याय। इति काराध्याहारेण सूत्रच्छेदः॥ नित्यजपशब्देनेळाभागमितिमं
त्र उच्यते। तस्य नित्यत्वे सत्यपि नित्यवचनं॥ एतेन भक्षिण इति विध्यति देशे तद्वर्जितस्य
प्राप्त्यर्थं। भक्षमंत्रः श्रेयः समनैष्ट देवास्त्वया वसेन समशीमहि त्वा। स नो मयोभूः पित
वाविशेह शं नो भव द्विपदे शं चतुष्पदे इति प्राश्याचम्य नाभिमालभेत। मोसि प्राणतदृतं ब्रवी
म्यमासि सर्वानसि प्रविष्टः। स मे जरां रोगमपनुद्य शरीरादमाम एधि मामृथा मदिंद्रेति। स्म
ति प्राप्तस्याचमनस्य विधानं यस्मिं देशे आचमनं कृतं तस्मिन्नेव देशे स्थितस्य नाभ्यालं
भनमस्ति ध्वर्थं। एतेन भक्षिणो भक्षान्त्सर्वत्र नव भोजने। एतेन विधानेन सर्वं भक्षेषु सर्वे

भक्षिणः सर्वान्भक्षान्भक्षयेयुः। सर्वत्रवचनं प्रकरणादुत्कर्षार्थं। नवभोजनवचनं लौकि
केपि नवभोजने प्रापणार्थं॥ सर्वत्रवचनात्प्रकरणादुत्कृष्टमपि नवभोजनवचनाल्लौकि
क एव व्यवतिष्ठते। वैदिकेग्निहोत्रहोमे नवान्नो सवनीयाभि त्यत्र न प्राप्नुयात्। तत्रापि प्राप नि
णार्थं भक्षणवचनं। अथ व्रीहियवानां धान्ये विरूढौ। अथानंतरं व्रीहीणां यवानां चाग्रयणे
ष्टिरुच्यते। तत्र व्रीह्याग्रयणस्य काल उक्तः। सैवं तोयवाग्रयणस्य। तत्र हितेषां प्रथमः पाक इ
ति तंत्रे विशेषाभावात्। उभयोः सहवचनं। तयोर्धान्ये विरूढौ च भवतः। इतरसौर्णमासं तंत्रं।
वैरूढमित्येतावन्नैवोक्तेपि तावन्मात्रविकारसिद्धौ सत्यां धान्याविरूढग्रहणं विकल्पेन द्व
न्वेनोरपि प्राणार्थं। अग्नीन्द्राविंद्राग्नी वा विश्वे देवाः सोमो यद्वि तत्र श्यामाको द्यावापृथिवी। आ
द्ययोर्विकल्पेनैनादेवतागत्युंते। यदि श्यामाकाग्रयणमस्यामेवेष्टौ समानतंत्रेण क्रियते तेन स

आ·श्रौ·सू·
७६
76

सोमस्तृतीयो भवति। आघाये अग्निमिंधते सुकर्माणः सुरुचो देवयंतो विश्वे देवास आग
तये केचज्मा महिनो अहिमाया मही द्यौः पृथिवी च नः प्र पूर्वजे पितरा नव्यसीभिरिति। इंद्रा^
ग्न्योः सोमस्य चोक्ता याज्यानुवाक्याः॥७॥ अथ काम्याः। अथानंतरं काम्या इष्टयो वक्ष्यंते प्राक्चा
तुर्मास्येभ्य इत्यर्थः। काम्याधिकारवचनमनिर्दिष्टकाम्या अपि न नित्याः। शास्त्रांतरदृपितासां का
मो न्वेष्टव्य इत्येवमर्थं॥ आयुष्कामेष्ट्यां जीवातुमंतो। आयुष्कामस्य इष्टिः आयुष्कामेष्टिः तस्यां^
आयुष्कामेष्ट्यां॥ अस्मिन्प्रकरणे काम्यग्रहणानामेनत्प्रयोजनं। यद्देवतासंयुक्ता याभिष्टौ यन्मंत्रं
विहितं तद्देवतासंयुक्ता यामप्यन्यकामसंयुक्तायां तन्न भवतीति ज्ञापनार्थं। अग्ने सुचेतुना त्वं सोम
महे भगमिति। अग्निरायुष्मानिंद्रस्त्राता। द्वे देवते आयुष्मानित्यग्नेर्गुणः। त्रातेतींद्रस्य गुणः। आ
युष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राण आयातु परायक्ष्मं सुवामि ते। आयुर्दा अग्ने हविषो

नोअ

राम·
७६

जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमं।त्रा
तारमिंद्रमवितारमिंद्रं मा नो अस्यां सहसावन्परिष्टौ पाहि नो अग्ने पायुभिरजस्रैरग्ने त्वं पारया नव्यो
अस्मानिति संयाज्ये स्वस्त्ययन्यां रक्षितवंतौ। स्वस्तिगमनसाधनीभूतास्वस्त्ययनीष्टिः। अग्ने रक्षा णो
अंहसस्त्वं नः सोम विश्वत इति। त्वं नः सोम विश्वत इति रक्षालिंगाज्ञेतमंस्येव॥ अग्निः स्वस्तिमान्। स्वस्ति म्ये
नो दिवो अग्ने पृथिव्या आरे अस्मदमतिमारे अंह इति। पूर्वयोक्ते संयाज्ये। पाहि न इत्येते। पुत्रकामेष्ट्याम
ग्निः पुत्री। पुत्रकामेष्टौ अग्निः पुत्री देवता। पुत्री त्वग्नेर्गुणः। यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरि
णा मन्यमानः। अग्निस्तुविश्रवस्तममिति द्वे संयाज्ये। आग्नेय्या उत्तरे। ये उत्तरे इष्टी वक्ष्येते मूर्धन्वते का
मायेति न्वं ते अग्निदेवत्ये भवत इत्यर्थः। पूर्वस्यामग्नेर्मूर्धन्वान्गुणः। उत्तरस्यां कामो गुणः। नित्ये मूर्धन्व
तः। अग्निर्मूर्धा भुवो यज्ञस्येत्यर्थः। तुभ्यं ता अंगिरस्तमाश्याम तं काममग्ने तवोतीति कामाय। कामगुण

कस्याग्नेस्तुभ्यं ताअंगिरस्तमा श्यामतं काममिति याज्यानुवाक्ये। वैमृध्या उत्तरे। उत्तरे द्वे इष्टी वैमृध्यो भव
तः। वयोर्वैमृध्यमायो याज्यानुवाक्यायुगले ते इंद्रदेवते भवतः। स चेंद्रो विमृदुणकः। वैमृधगुणको
वा भवति। अत एते इष्टी वैमृध्या इत्युच्यते। वि न इंद्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः
सद्युतिमिंद्र सच्युतिं प्रच्युतिं जघनच्युतिं। प्र नाकाफान आभर। प्रयप्स्यंनिव सक्थ्यो वि न इंद्र
मृधो जहि। चनीखुदद्यथासपमभिनः सुष्टुतिं नयेति। ~~एवेति~~। एते पुष्टिकामस्य याज्यानुवाक्ये।
इंद्राय दात्रे पुनर्दात्रे वा। इंद्रो दाता स पुनर्दाता वा देवता भवति। उभयथाप्येते एव याज्यानु
वाक्ये वचनसामर्थ्यात्। यानि नो धनानि क्रुद्धो जिनासि मन्युना। इंद्रानुविद्धि नस्तान्यनेन हवि
षा पुनः। पुनर्न इंद्रो मघवा ददातु धनानि शक्रो धनीः सुराधाः। अस्मद्र्यक् कृणुतां याचितो म
नः श्रुष्टीन इंद्रो हविषा मृधातीति। आशानामाशापालेभ्यो वा। आशा आशापाला वा देवता। अत्रा

पि याज्यानुवाक्ययोरेकं। आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधे
म हविषा वयं। विश्वा आशा मधुना संसृजाम्यनमीवा आप ओषधयः संतु सर्वाः। अयं यजमानो
मृधो व्यस्यत्वगृभीताः पशवः संतु सर्व इति। लोकेष्टिः। इष्टिनामेदं। पृथिव्यंतरिक्षं द्यौरिति दे
वताः। देवताग्रहणं पृथिव्यादीनां पृथगेव देवतात्वसिध्यर्थं॥ त्रिलिंगत्वाद्याज्यानुवाक्ययो
स्तिसृणां सहिता एका देवता माभूदिति। तेनैतत्साधितं भवति। याज्यानुवाक्यालिंगाद्देवतानिर्ण
यः कार्य इति। पृथिवीं मातरं महीमंतरिक्षमुपब्रुवे। बृहतीमूतये दिवं। विश्वं बिभर्ति पृथिव्यंत
रिक्षं विपप्रथे। दुहे द्यौर्बृहती पयः। वर्म मे पृथिवी मह्यंतरिक्षं स्वस्तये। द्यौर्मे शर्म महि श्रव इतिति
सृणां। एतास्तिस्र ऋचस्तिसृणां हविषां याज्यानुवाक्या भवंति। उत्तरसूत्रे विनिवेशसामर्थ्या
देवास्यार्थस्य सिद्धौ सत्यां वचनमिदमन्यत्रापि तिसृणां विहिता एवं विनिवेशयितव्या इत्येव

२

मर्थं। एवं भवंतीत्याह। प्रथमे प्रथमस्योत्तमे मध्यमस्योत्तमा प्रथमान्त्योत्तमस्य ॥८॥ मित्रविं
दमहावैराजी। मित्राणि यया विंदते सा मित्रविंदा। गुणनामैतत्। महावैराजीत्यस्या नामैवा। अ
ग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टेत्येकप्रदानाः दशैता देवता
एकप्रदानाः महावैराज्यो भवंति। एकप्रदान एव उक्तार्थः। अग्निः सोमो वरुणो मित्र इंद्रो बृ
हस्पतिः सविता यः सहस्री। पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपेण समनक्तु यज्ञं। इयम
नुवाक्या। प्रतिलोममादिश्य यजे घे यजामहे त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिंद्रं
मित्रं वरुणं सोममग्निं त्वष्टा रूपाणि दधती सरस्वती भगं पूषा सविता नो ददातु। बृहस्पतिर्द
ददिंद्रः सहस्रं मित्रो दाता वरुणः सोमो अग्निरिति। एता देवताः प्रतिलोममादिश्य यजे घे यजा
महइत्यविवचनं याज्यायामेव प्रतिलोमत्वं नान्येषु निगमेष्वित्येवमर्थं। प्रतिलोमविधानादेव प्रति

लोमत्वे सिद्धे प्रतिलोमपाठस्येदं प्रयोजनं। उत्सर्जिन्यागक्रमयोर्विरोधे पूर्वे पूत्सर्जिक्रमः। उ
त्तरेषु यागक्रम इत्यस्य न्यायस्यैं प्रमारूत्यामुक्तत्वादुत्तरेष्वनियमेषु प्रतिलोमत्वं स्यादितितं
निवृत्त्यर्थं। इदं च पाठप्रयोजनं व रूपास्याप्युपांशुत्वं भवतीति। त्वष्टारूपाणीति याज्या। अ
ष्टौ वै सजतंत्राः। आग्नेय्या उत्तरे इत्येवमाघाम हावै सज्यंता इष्टयो वै सजतंत्राः। तासामाघाः
षच्छेकहविषः। अनुवादोयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं हविःशब्देन प्रधानहविषामेव
ग्रहणमिति ज्ञापनार्थं। स्नुषाश्वशुरीययाभिचरन्यजेत। स्नुषाश्वशुरीयानामेष्टिः। तयाभि
चरन् शत्रुं मारयामीति संकल्प यन्यजेत। इंद्रः सूरो अतरद्रजांसि स्नुषासपत्नाः श्वशुरोहम
स्मि। अहं शत्रूं जयामि जर्हृषाणो हं वाजं जयामि वाजसातौ। इंद्रः सूरः प्रथमो विश्वकर्मा मरु
त्वां असुरगणवां सजातैः। मम स्नुषाश्वशुरस्य प्रशिष्टौ सपत्ना वाचं मनसा उपासतां। याज्यानु

वाक्ययोर्लिंगाद्देवास्या देवता कल्प्या। सा चेंद्रः स्वरगुणो वा।जुष्टो दमूना अग्ने शर्द्धं महते सौभगायेति संयाज्ये विमतानां संमत्यर्थे संज्ञानी। विमतानां विमनस्कानां संमतिप्रयोजनार्थं संज्ञानीनामेष्टिः कार्या। अग्निर्वसुमांत्सोमो रुद्रवानिंद्रो मरुत्वान्वरुण आदित्यवानित्येकप्रदानाः। चतस्रोग्न्याद्याः सगुणा देवता एकप्रदाना वेदितव्याः। अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रैरभिरक्षतु त्मना। इंद्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैर्नो वरुणः शर्म यंसत्।समग्निर्वसुभिर्नो अव्यात्सं सोमो रुद्रियाभिस्तनूभिः। समिंद्रो एतहव्यो मरुद्भिः समादित्यैर्वरुणो विश्ववेदा इति। एषा संज्ञानीनामेष्टिः कार्या स्वामिभृत्योः संमत्यर्थं। यः समाने मिथो विप्रियः स्यात्तमेतया याजयेदिति। श्रुतेः। ऐंद्रामारुतीमेदकामाः। इंद्रश्च मरुतश्च देवते यस्याः सा ऐंद्रामारुती सैवात्र विग्रहः। केवलानां मरुतां याज्यानुवाक्यादर्शनादिंद्रस्य च पूर्वोक्तयोर्ग्रहणेनद्विदेवत्येयमिति निश्चीयते। मे

ष को

द्कामाः॥ एज्ञांचविशंच। लोके आहिताअग्नयोयदिस्युः। तेषामस्यामधिकारः॥ एकैकस्यै
व। मरुतोयस्यहविःस्येप्रशर्द्धाय मारुतायस्वभानव [illegible] इति। इंद्रस्यनिःस्ये एव। ऐंद्रीमनूच्य
मारुत्यायजेन्मारुतीमनूच्यैंद्र्यायजेदिंद्रं पूर्वंनिगमेषुमरुतोवा। प्रधानक्रमएवांगानांक्रम इति
प्रसिद्धोन्यायः। अत्रतुप्रधानयोःपरस्परव्यतिक्रमे सिद्धयोःक्रमोनास्ति। याज्यानुवाक्याभ्यामुभा
भ्यांयागक्रियावयवभूतस्यउद्देशभागस्यसिद्धेरितिमन्यमानोविकल्पमुक्तवान् वृद्धस्पत्येनं।
इंद्रंवा। प्रधानादूर्ध्वंमरुतः। सत्यमुत्पत्तिक्रमाभावे प्रधानक्रमएवांगानांभवति। उत्पत्तिक्रमेतुस
तिसएवानुपजातविरोधित्वात्प्रधानात्स्याक्रमभवतिपश्चात्तुप्रधानक्रमएवेतिन्यायः॥ अत्रतुप्रधान
योःक्रमोस्त्येव॥ याज्यायाएवोद्देश्यतयाप्रतिपादकत्वात्। आवाहनादिवदनुवाक्यायादेवताद्रव्य
स्वरूपप्रतिपादकत्वान्मारुतएवात्रयागःपूर्वंक्रियते। पश्चादैंद्र इतिविनिवेशमुक्तवानाचार्यः॥ वा

ऽिकःसं
एनौरैंद्रमिति

शब्दोत्र पक्षव्यावृत्त्यर्थः। प्रकृत्यासंपत्तिकामाः संज्ञानीं चा।यद्याहिताग्नयोरजविशां संपत्तिं
कामयेरन्तदानेएते देवते प्रकृत्यैव यजेरन्। पूर्ववदेकैक एव ते। ततः संज्ञानीं च कुर्युरेवमे
व। ऐंद्राबार्हस्पत्यां प्रधृष्यमाणाः शत्रुभिरभिभूयमानाः। आन इंद्राबृहस्पती अस्मे इंद्राबृ
हस्पती इति याज्यापीन्द्राय चोदयेयुः। यद्येंद्राबार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः अध्वर्यवः। य
द्वाबार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः। उभयोरपि पक्षयोरेते एव याज्यानुवाक्ये भवत इत्य-
र्थः॥९॥ पवित्रेष्ट्यां॥ एतत्सर्वं उमत्र न दृष्टं॥१०॥ वर्षकामेष्टिः कारीरी। वर्षकामस्य कारीरीना
मेष्टिः कार्या। तस्यां प्रतिसंचारु मध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये। तस्यामिति कारी
र्यामेवेत्यर्थः। अत्र बहुदेवत्याया आम्नानात्। अन्यसद्यमेव कारीरी एकदेवत्या भवति। तस्या
मपि प्रापणार्थं तस्यां ग्रहणं कृतं। याः काश्च वर्षकामेष्ट्यो मुमंतो। एतौ [illegible] वर्षकामेष्टिमात्रेभ

वतः। अप्स्वग्ने सधिष्टवाप्सु मे सोमो अब्रवीदिति। अत्र पूर्वस्या गायत्रीत्वात्तत्साहचर्याद् उत्त
रापि गायत्र्येव गृहीतव्येति॥ तथा चोत्तरत्र वक्ष्यति। अप्सु मंत्रौ गायत्राविति। इदमेव वाक्ता
म्नायमनुसरन्। अग्निर्धाम गच्छन् मरुतः सूर्यः। धाम गच्छद् इत्यग्नेर्गुणाः। तिस्रश्च पिंग उत्तरः।
उत्तर एतस्मिन्नः पिंगश्च भवेति। पिंग इति पिंडी द्व्याम रुद्रेवत्यास्त्वयो याग इत्यर्थः। हिरण्य
केशो रजसो विसार इति द्वे त्वं त्याचिदच्युता धामंते विश्वं भुवनमधिश्रितमिति वा वाश्चैव विद्यु
न्मिमाति पर्वतश्चिन्महि वृद्धो बिभाय स्वजंति रश्मिमोजसा वहिष्ठेभिर्विहरन्यासि तंतुमुदार
यथा मरुतः समुद्रतः प्रवो मरुतस्तविषा उदन्यव आयं नरः सुदानवो ददाशुषे विद्युन्महसो नरो
अश्मदिद्यवः कृष्णं नियानं हरयः सुपर्णा नियुत्वंतो ग्रामजितो यथा नरः। धाम गच्छ देयाद्या
नुवाक्या युगलद्वयं व्यवस्थया योजनीयं। यदा केवलोग्निस्तदा पूर्वं यदाग्निर्धाम गच्छत्तदोत्तरमि

ति। अग्नेर्वा ध सविमथो विदुर्गृहाः यंत्वा देवापिः शुशुचानो अग्न इति संयाज्ये। ऋचो नूच्य यजुर्भिरे
के यजंति। पिंडीयागानिति शेषः। एके शाखिनः ऋच एवानुवाक्या उक्त्वा यजुर्भिरेव पिंडीयागं कुर्व
तीत्यर्थः। अत्र विशेषस्तेष्वप्येवाधिगंतव्यः। संस्थितायां सर्वा दिश उपतिष्ठताः ध्वरत वसंगी भि
एभिरिति चतसृभिः प्रत्यृचं। एके कां दिशं सर्वा दिश इत्युपक्रम्य चतसृभिः प्रत्यृच मित्युपसंहा
एदन्यत्रापि दिशं सर्वत्वं चतसृष्वेव पर्यवस्यतीति गम्यते। सूक्तेन सूक्तेन वा। एके कां दिशं कृत्स्ने
न सूक्तेनोपतिष्ठते त्येवं वा। ११। अत ऊर्ध्वमिष्ट्ययनानि। अत ऊर्ध्वं यानि वक्ष्यंते तस्मिन्न ध्यायेता
नीष्ट्ययनसंज्ञानीति विद्यात्। इष्टिभिरयनं गमनं येषु कर्मसु तानीष्ट्ययनानि। सांवत्सरिकाणि। सं
वत्सरे प्रक्रियंते संवत्सरे च प्रक्रियत इत्युभयथा विग्रहः कर्तव्यः। दाक्षायणयज्ञचातुर्मास्यानाम
नेकसांवत्सरिकत्वसिध्यर्थं। ते षा फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः। फल्गुनीभिर्युक्ता पौर्ण

मासीफाल्गुनीचित्रयायुक्ताचैत्रीतेषांसांवत्सरिकाणांआगंतुकानामस्मिन्काले प्रारंभः कर्तव्यः।
दर्शपूर्णमासगुणविकाररूपाणां दाक्षायणयज्ञादीनामारंभे कालनियमोनास्तीतितेषामिदु
च्यते।तुरायणं।तुरायणंनामेष्ट्ययनमित्युच्यते।अग्निरिंद्रोविश्वेदेवाइतिपयस्येष्टयोनुस
वनमहरहः।अग्निदेवत्याइंद्रदेवत्याविश्वेदेवदेवत्याचेतास्तिस्र इष्टयः।त्रिषुसवनेषुय
थासंख्येनैकैकेष्टिःकार्याऽहन्यहनि।अहरहरितिवचनंपौर्णमास्यमावास्ययोर्बाधनार्थं।
एकावात्रिहविः।एताभिरेवदेवताभिर्युक्ताएकैवेष्टिस्त्रिहविष्काऽहन्यहनिप्रातःसवनेएव
कर्तव्यावेत्यर्थः।दाक्षायणयज्ञेद्वेपौर्णमास्योद्वेअमावास्येयजेत।दाक्षायणयज्ञःकर्तव्यइ
त्ययमर्थोर्थाल्लभ्यते।तस्मिन्दाक्षायणयज्ञेद्वेपौर्णमास्योद्वेअमावास्येयजेतद्वितीयानिर्देशा
त्प्रतिपन्नयोर्द्वित्वंगुणोविधीयते।नाप्रतिपन्नयोर्द्वित्व[illegible]विशिष्टयोर्विधानमत्रेतिगम्यते॥ए

आ॰श्रौ॰सू॰
८२
४२

तदुक्तं भवति। यापौर्णमासी याऽमावास्या ते एव स्वकाले द्विरावर्तयितव्ये इति। नित्ये पूर्वे यथा
संनयतोमावास्यायां। आहत्नयोः पूर्वे ये ते उक्ते एव न विकृते। तत्रामावास्याद्वित्वे असंनयतो
यासैव नियम्यते। उत्तरयोरैन्द्रं पौर्णमास्यां द्वितीयं। उत्तरयोर्विकार उच्यते। पौर्णमास्यां
यद्द्वितीयं हविस्तदैन्द्रं भवति। मैत्रावरुणममावास्यायां। अमावास्यायां यद्द्वितीयं तन्मैत्राव
रुणं भवति। आनो मित्रावरुणाय ह्वंहिष्ठं नातिविधे सुदानू इति प्राजापत्य इध्मादधः। इध्मा
दधो नामेष्ट्ययनं तत्प्रजापतिदेवत्यं। तस्य र्वाणि पर्वाणि कर्तव्यं विशेषविध्यभावात्। प्रजाप
ते न त्वदे[illegible]तान्यन्यस्त्वे मे द्यौ कः प्रदिशो दिश स्व परावतो निवत उद्वतस्व। प्रजापते विश्व
सृञ्जीवधन्य इदं नो देव प्रतिहर्य हव्यमिति। द्यावापृथिव्योरयनं। इदमपीष्ट्ययनं नाम॥ त
स्य स्वरूपमुच्यते। पौर्णमासेनामावास्या दामावास्येना पौर्णमासात्। स्वकाले पौर्णमासं कृ

एम॰
८२

त्वात्तेनैवाहरहर्यजेत। आऽमावास्यायाः कालत्वात्। ततोमावास्यां स्वकाले कृत्वा तयैवाहरहरापौ
र्णमासात्। एवं संवत्सरे समापयेत्। अत्रापि दर्शपौर्णमासयोः पुनः क्रिया नास्ति। असमाम्ना
तास्वर्थात्तंत्रविकारः। अस्मिं छास्त्रेया असमाम्नाता इष्टयः तास्वर्थात्तंत्रविकारो भवति। इष्टिप्र
करणात्स्त्रीलिंगाच्चेष्टिष्वित्यवगम्यते। अर्थात्सामर्थ्यात् द्रव्यदेवतादेश्चोदनासामान्यात्स्वरूपसा
मान्याच्चेत्यर्थः। तदुक्तं प्रकृतिविकारभावस्य लक्षणं। निर्वपेन्नश्छितं चाज्यमित्यादिना॥ तंत्रविकार
तंत्रान्यत्वं पौर्णमासादिस्यर्थः। उपदिष्टानामिष्टिपशूनां तंत्रमुक्तं। अनुपदिष्टानां कथमित्यपे
क्षायां तन्निश्चयार्थमिदं सूत्रचतुष्टयमारब्धं। अस्यार्थस्यन्यायलब्धत्वात्सूत्रनामप्येतस्य दर्शना
र्थत्वेन व्याख्येयं। अध्वर्युर्वा यथास्मरेत्। अध्वर्युशब्देन यजुर्वेद उच्यते। तच्च प्रदर्शनार्थं॥ ते
नैवं भवति यत्र क्वापि वेदेऽस्यैतत्तंत्रमित्याम्नातं स्यात्तस्यैव देवतंत्रं भवेत्। न न्यायतस्तंत्र कल्प्य

८२

२× एके आचार्याः अग्निमंथनसत्त्वे न वैराजतंत्रत्वेपि केवले धाय्ये एव भवत इति मन्यंते। धाय्ये विराजमात्रे वैराजतंत्रे इति वचनादुभय×२
मपि भवतीत्यन्ये×२

आ॰श्रौ॰सू॰
८३

नेति। वाशब्दोऽवधारणार्थः। वैराजं त्वग्निमंथने। अग्निमंथनसंयुक्ता याभिष्टो वैराजमेव तंत्रं भवति। तु शब्दोऽवधारणार्थमेव। धाय्ये त्वेवैके। अग्निमंथने सत्यपि धाय्ये एव केवले नियम्येते न वैराजं॥ धाय्याभ्यामन्यत्र न्यायकल्प्यमेव तंत्रमिति। असमाम्नातासु तंत्रलक्षणमित्युक्त्वेदानीं याज्यानुवाक्यालक्षणमित्युच्यते॥ देवतलक्षणा याज्यानुवाक्याः। देवतलक्षणेति। छांदसो ह्रस्वः। लक्ष्यते ऽभिधीयते विहितदेवता येन पदेन तल्लक्षणं। देवतायाः लक्षणं यासु सूक्तायाज्यानुवाक्या भवंति। विहितदेवतावाचकपदवत्य इत्यर्थः॥ व्यधिकरणो ऽयं बहुव्रीहिः॥ गायत्र्यावती हूतवत्युपोक्तवती पुरस्ताल्लक्षणानुवाक्या। इदमनुवाक्यालक्षणं। गायत्री छंदः। आदूत्वे तस्य दवती आवती हूतवती निष्ठांतस्य ह्वेणो धातुमात्रग्रहणं भवतीति सार्वत्रिकमेतत् हूतवदिति ह्वेञो रूपं। उपोक्तवती उपपूर्वस्य वचेरिदं रूपं। उपोनवतीति प्रमादपाठः। पुरस्ताल्लक्षणानु

ए॰म॰
८३

83

चः पूर्वभागे देवतापदं यस्याः सा पुरस्ताल्लक्षणा। त्रिष्टुप्वती वीतवती जुष्टवत्युपरिष्टा
ल्लक्षणा याज्यापि वान्यस्य छंदसः। असंभवे विहितछंदसोन्यस्य वा याज्यानुवाक्याः कर्तव्याः।
न तु याज्या ह्रसीयसी। सर्वथा तावदनुवाक्या याज्याया ह्रसीयसी न भवति। नो ष्मिदुष्टुबृहती। नो ष्मिदु
ष्टुबृहती याज्येत्यर्थः। क्षामनष्टहतदग्धवतीस्तु वर्जयेत्। एकवचनाधिकारे बहुवचनं याज्यानु
वाक्यापरिग्रहणार्थं। व्यक्ते तु दैवते तथैव। सर्वलक्षणासंपादनाशक्तौ स्वपदार्थपर्यवसितका
र्ये देवतापदे सति तथैवाश्रयणीयं न लक्षणांतरमन्वेषणीयमित्यर्थः। लक्षणमपि वाव्यक्ते। अथ
वा एवं भवति॥ अव्यक्ते देवतापदे सति लक्षणं गायत्र्याद्याश्रयणीयमित्यर्थः। अव्यक्त इति चोदितना
मधेयपर्याये वा वज्रहस्तधूमकेत्वादिपदे चोदितनामधेये वा परार्थे सतीत्यर्थः। अधिगच्छंत्स
र्वेत्राः। उभयथाप्यभावे सर्वेणाधिगंतव्याः। एरखांतरादाहर्तव्या इत्यर्थः। अनधिगमआगेमी

यसी २

नर

84

भ्यां। एवमप्यसंभवे याभ्यां काभ्यां चिद्राग्नेयीभ्यां यजेतानुब्रूयाच्चेत्यर्थः। व्याहृतिभिर्वा। तत्रानु
ब्रूयाद्यजेच्चेत्यर्थः। एवं व्याहृतिभिरित्याह। देवतामादिश्य प्रणुयाद्यजेच्च। पुरस्ताल्लक्षणत्वा
मअनुवाक्यायां देवतां द्वितीयया विभक्त्यादिश्य ततो भूर्भुवः स्वरोमिति ब्रूयात्। याज्याया
मागुरमुक्त्वा ततो देवतां ततो व्याहृतीः पुनस्तां देवतामुपरिष्टाल्लक्षणत्वा यततो वषट्कार इति।
नम्नाभ्यां वा। नम्ने इति नामधेयमचोर्वक्ष्यमाणयोः। इममाश्रृणुधी हवं यत्वा गीर्भिर्हवामहे। एदं
बर्हिर्निषीदतः। स्तीर्णं बर्हिरानुषगा सदेतदुपेक्षाना इहनो। अद्यागच्छ। अहेळतामनसेदं जुष
स्वेहि हव्यं प्रयतमाकृतं म इति नम्ने। एतेन नम्नसंज्ञे। पुनर्नम्ने इति वचनमेतयोर्नमनप्राप्त्यर्थं।
नम्नेन मनशीले ऋच्ये इत्यर्थः। आग्नेय्यावनिरुक्ते। देवतापदरहिते इत्यर्थः। तथाप्यग्निदेव
त्ये एते ऋचौ भवत इत्यर्थः॥ १२॥ चातुर्मास्यानि प्रयोक्ष्यमाणः पूर्वेद्युर्वैश्वानरपार्जन्यां। चातु

र्मास्यानीतीष्टयननामा। तानि च वैश्वदेवादीनि चत्वारि पर्वाणि॥ तानि फाल्गुन्यां चैत्र्यां वा आर

भ्यमानः तस्याः पूर्वस्मिन्नहनि वैश्वानरपर्जन्यदेवत्यामिष्टिं चातुर्मास्यानामारंभार्थं कुर्या

त्। द्वे एते देवते याज्यानुवाक्यास्तु गद्य[illegible] पदर्शनात्। वैश्वानरो[illegible]। याज्यानुवाक्ययोरग्निलिं

गत्वात्। यद्यध्वर्यवः केवलं वैश्वानरं कुर्युस्तदा कृतावानं वैश्वानरं नाभिं यज्ञानां सदनमिति

याज्यानुवाक्ये भवतः॥ वैश्वानरो अजीजनदग्निर्नेनव्यसी मतिः। क्ष्मया वृधान ओजसा। पृष्टो

दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायत प्रवातावांति पतयंति विद्युत इति। अग्न्याधेयप्र

भृत्वात् उपांशुहविषः। अग्न्याधेयं प्रभृति कृत्वा वैश्वानरपार्जन्यां नाद्रियेत [illegible] यो यास्तादुपांशुहवि

षस्तूपांशुप्रधानाद्युत्सर्गः। सोमिकाः॥ [illegible] सोमोत्सन्नाः प्रायश्चित्तिकाः प्रायश्चित्तप्रकरणोक्ते क सन्नाः। अन्नाया

[illegible] क[illegible] पालाः। अन्नायास्ते [illegible] ककपालान्नामिष्टिं ता [illegible] संभवाद्याग्यावि शेषं ते अन्नाया[illegible] त्ताए

ककपालाश्चयेयागास्तेउपांशुप्रयोक्तव्याइत्यर्थः।सर्वत्रवारुणवर्जं।सर्वत्रविषयेवारुणंव
र्जयित्वाउपांशुत्वंभवति।नक्वचिदपिविषयेवारुणउपांशुर्भवतीत्यर्थः।सावित्रश्चातुर्मा
स्येषु।चातुर्मास्येषुसावित्रउपांशुर्भवति।प्रधानहविःषिचैके।हविःषीत्येतावताप्रधानप्रत्यये
सिद्धेप्रधानवचनंप्रधानान्तरस्यसंप्रत्ययार्थं।।अतोयेचातुर्मास्यपर्वणांव्यपदेशहेतवोवैश्वदे
ववरुणप्रघाससमाहेंद्रशुनासीरीयास्तेप्रधानशब्दवाच्यास्तेषामुपांशुत्वंभवतीत्यर्थः।पित्र्यो
पसदःसंतंत्राः।संतंत्रेणसहैताउपांशुभवंति।पौनराधेयिकीचप्रागुत्तमादनुयाजात्।यस्मा
भिरग्न्यातापुनराधेयेष्टिः।साचोत्तमादनुयाजात्प्राक्संतंत्राउपांशुभवति।अपिवासुमंद्रतं
त्राः।यासुसंतंत्रमुपांशुत्वंविहितंताःसर्वाःसुमंद्रतंत्रावाभवेयुः।सुमंद्रतंत्राइतिमंद्रेऽपियेपू
र्वतराग्रमास्तैःप्रयोक्तव्यंतासांप्रधानंतूपांश्वेवेत्यर्थः।आगूःप्रणववषट्काराउच्चैःसर्व

त्र। प्रणवशब्देनात्रानुवाक्याप्रणव एव गम्यते आगूर्वषट्कारसाहचर्यात्। आगुरादयः स
र्वत्र विषये उच्चैर्भवंति न क्वचिदपि विषये तेषामुपांशुत्वं स्यात्। तथाग्रयणे ग्नियो। अग्नेभव
मग्न्यो। आग्रयणे ऽस्त्र थमं हविः आग्नेन्द्रं ऐंद्राग्नं वा तदुच्चैर्भवति। आहार्यस्तु प्राणसंततः प्र
णवः पुरोनुवाक्यायाः। पुरोनुवाक्यायाः प्रणवस्योच्चैस्त्वं विहितं। स प्रणवः पुरोनुवाक्यायाः
प्राणसंततः कार्यः। तथागूर्वषट्कारे याज्यायाः। तथैतौ याज्यायाः प्राणसंततौ कार्यौ वित्यर्थः।
आगुरादिभिः प्रसिद्धो ऽनुस्वरैर्याज्यानुवाक्ययोः प्राणसंतानविधिसामर्थ्यादेवोपांशुत्वं सिद्धं भ
वति। प्राणसंततः प्रणवः। तथागूर्वषट्कारा विलेतावतैव याज्यानुवाक्ययोरुपांशुत्वस्य प्राणसं
तानस्य च सिद्धौ सत्यामपि यद्याज्यानुवाक्याग्रहणं करोति तत् ज्ञापयति। अनुवाक्याया याज्या
याश्च पृथक्कृत्य प्राणसंतानेन आगूः प्रणववषट्कारा वक्तव्या न ऋगंते स्वरगादेश्च प्लुतेस्त्यः

सांहितो विकारो मा भूदिति ॥ तंत्रस्वरण्युपांशोरुच्यानि । तंत्रस्वर आतो मंद्रेणोत्येवमादिभिर्वि
हिताः ते तंत्रावयवसंबद्धत्वात् तंत्रस्वरा इत्युच्यंते । तेषां तानि तंत्रस्वराणि उपांशुयाजसंबं
धीनि यान्युच्यानि आवहादीन्याग्नेयादीनि च तानि तंत्रस्वराणि भवंति । मंद्र एवोपांशुतंत्राणां ।
उपांशुतंत्राणां तान्युच्यानि मंद्रस्वराणि भवंति न तंत्रस्वराणि भवंतीत्यर्थः ॥१३॥ प्रातर्वैश्व
देव्यां प्रेषितोग्निमंथनीया अन्वाहेत्युक्तत्वात् सामिधेनीस्थानस्य पदमात्रेव स्थायामिहं हत्व [?] ।
प्रातरित्युच्यते प्रयोक्ष्यमाणः पूर्वेद्युरित्यनघतनविभक्तिदर्शनात् । पूर्वेद्युरेव वैश्वदेव्या
अपि यागः प्राप्नोतीति तन्निवृत्त्यर्थं । अतः पूर्वेद्युरुपक्रम्यापरेद्युः प्रातर्वैश्वदेव्यायष्ट्यामित्य
र्थः ॥ अग्निमंथनार्था ऋचः अग्निमंथनीयास्ताः प्रेषितोनुब्रूयात् । प्रेषितवचनमस्यानुवचन
स्य प्रैष एव निमित्तं नाम्नाने । अ नाम्नानेपि प्रेषितोनुब्रूयादेवेति । सामिधेनीस्थानस्य पश्चाद

वस्थायेत्येतावतैव पदमात्रेवस्थानस्यासिद्धौ सत्यां पदमात्र इति वचनं पदमात्रे नीत इति ज्ञा
पनार्थं। अभिहिंकृत्येति वचनमस्यानुवचनस्याभिहिंकारप्रतिषेधे सत्यप्यभिहिंकृतिसि
ध्यर्थं। तथा च वक्ष्यति। प्रातरनभ्यासमनभिहिंकृतानीति। अभित्वा देवसवितर्मही द्यौः पृथि
वी च नस्त्वामग्ने पुष्करादधीति तिसृणामर्धर्चे शिष्टारमेदासंप्रैषात्। त्वामग्न इति तिसृणामृचः
तासामुत्तममर्धर्चे शिष्टायदवसानं तत्रावसायारमेत्। आसंप्रैषात्। आसंप्रैषश्रवणात्।
नोत्तरमादृशीतेत्यर्थः। अन्यत्राप्यंतर्ऋचोवसाने जायमाने तेतस्मिन्नेवावसाने। अन्यत्रापि वि
षये ऋचो मध्येऽवसाने यत्रारमेदिति विधिरस्ति तत्राप्यासंप्रैषात् नोत्तरमादृशीत। अग्ने हंसि
न्यत्रिणमिति सूक्तमावपेत पुनः पुनराजन्मनः। मथ्यमानोग्निर्यदि न जायते न तत्रैवावसाने
स्थित्वा अग्ने हंसीत्यावपेत्। पुनः पुनरसकृदप्यावपेत्। अग्ने राजन्मनः। आजन्मन इति वच

आ॰श्रौ॰सू॰
८७

नाज्ञाते सति संप्रैषात्सामापि स्रुक्तस्य कांचिद्दृव्यं चेन्नारभेत्। एतस्मिन्नेवावसान इति वचनात्। ए
तस्मिन्नेवार्द्धर्चावसाने ऋगंतरमावपेत्। अन्यत्र ऋगंत एव ऋगंतरमावपेतेति गम्यते।
तेन यत्र यूपसंस्कारे ष्वंजनोच्छ्रयणपरिव्ययणेषु पशार्थानुसमयं कुर्वंति बहुयूपे कर्मणि त
त्र ऋगंते ऋगंतरस्यावापः सिद्धो भवति। पादग्रहणस्रुक्तग्रहणयोः प्रयोजनं आवापे पूर्वावधि
रेका ऋक्। परावधिः सूक्तं॥ तत्रैकस्या द्वयोर्बहूनां वा ऋचां सूक्तस्य वाऽवापः सिद्धो भवति। आ
हृतौ च सूक्तं समाप्यैवावृत्तिरित्येवमादि। जातं श्रुत्वानंतरेण प्रणवेन शिष्टमुपसंतनुयात्।
जातश्रवणानंतरमग्ने हंसी त्यस्य स्रुक्तस्य यः प्रणव आगच्छति तेन शिष्टमर्द्धर्चमुपसंतनुया
त्। शिष्टेनोत्तरं। अनावापपक्षे जातश्रवणानंतरमेव शिष्टेनार्द्धर्चेनो त्तरं ऋचमुपसंतनुया
त्। उतब्रुवंतु जंतव आयं हस्ते न खादिनमित्यर्द्धर्च आरभेत्। प्रदेवं देववीतय इति द्वे अग्निनाग्निः

राम॰
८७

87

समिध्यते त्वं ह्यग्ने अग्निना तं मर्जयन्तसुक्रतुं यज्ञेन यज्ञमयजन्त देवा इति परिदध्यात्। यज्ञेने स
न यर्चा परिदध्यात्। समापयेदित्यर्थः। सर्वत्रोत्तमां परिधानीयेति विधानात्। सर्वत्र शस्त्रादिषु या
उत्तमा ऋक्‌ कृता परिधानीयेति विधानात्। धाय्ये विराड्जौ नव प्रयाजाः प्राग्उत्तमाच्चतुर आवपेत तदु इळो अ
ग्न आज्यस्य व्यन्तूषासानक्ताग्न आज्यस्य वीतां दैव्या होताराग्न आज्यस्य वीतां तिस्रो देवीरग्न आज्यस्य
व्यन्त्विति। बर्हिरग्न इति प्रयाजानन्तरमेतानावपेत्। अग्निः सोमः सविता सरस्वती पूषा मरुतः स्व
तवसो विश्वेदेवा द्यावापृथिवी। अष्टौ देवताः॥ स्वतवस इति मरुतां गुणः। आविश्वदेवं सत्पतिं वाम
मद्य सवितर्वाममु श्वः पूषन्तव व्रते वयं शुक्रं ते अन्यद्यजतं ते अन्यद्विहे हुवः स्वतवसः प्रवित्रमर्कं
गृणानेनुरयेति। अस्मिन्पर्वणि निर्गुणानामपि मरुतामेते एव भवतः। प्रकरणपठितत्वात्। गुण
शब्दस्य चस्तुत्यर्थतयाप्यन्वयसंभवात्। नवानुयाजाः षळूर्ध्वं प्रथमादेवी द्वारो वसुवने वसुधेय

स्यव्यंतु देवीउषासानक्ता वसुवने वसुधेयस्य वीतां देवीजोष्ट्री वसुवने वसुधेयस्य वीतां देवी
ऊर्जाहुती वसुवने वसुधेयस्य वीतां देवा दैव्या होतारा वसुवने वसुधेयस्य वीतां देवीस्तिस्रस्ति
स्रो देवीर्वसुवने वसुधेयस्य व्यंत्विति। अनुयाज्ञानामेष देशः कृतः। अनुयाज्ञानां सूक्तवाकस्य
शंयुवाकस्य शंयुवाकस्य वो परिष्टाद्वाजिभ्यो वाजिनमनावाह्याद्देशं। त्रयाणामन्यतमस्मिन्का
ले वाजिभ्यो यागः कर्तव्यः। वाजिनं च तस्य द्रव्यं। द्रव्यशब्देन कर्मणः संव्यवहारार्थं तद्वचनम्॥८
अनावाह्येत्यावाहनप्रतिषेधोयमनुवादः। अपूर्वत्वादस्य कर्मणः। अपूर्वत्वं च पूर्वत्वे कार
णाभावात्। द्रव्यदेवतासंबंधमात्रमत्र चोद्यते। नैतावता प्राकृतधर्मसंबंधोस्ति। उक्तं च प्राकृ
तधर्मसंबंधकारणं निर्वपेत्यादि। तस्य चात्राभावः। तेनापूर्वत्वं निश्चीयते। इष्टिशब्दवाच्यताचा
स्य नास्ति। तेनापूर्वत्वं। तस्मादपूर्वत्वादुत्तरेष्वपि निगमेषु निगमनं नास्ति। आदेशवचनं वा

+ दूर्ध्वज्ञुरनवानं याज्यामिसस्यायमर्थः। याज्याग्रहणं अनुवाक्यायाः वषट्कारेषु ऊर्ध्वज्ञुतामाभूदिति। नन्वनुवषट्- +
+ कारे स्यात्। न स्यात्। याज्यामिसेकवचननिर्देशात्। ऊर्ध्वज्ञुतां विधाय पश्चादनुवषट्कारनिर्देशाच्च। अनुवषट्को +

जिनां यागानामन्वायात्यत्वसंशयनिवृत्त्यर्थं। तत्रायं संशयः। किं यस्य कस्यचित्प्रधानस्यानुपन्वा
हायात्यते क्रियते न सर्वमन्वायात्यमुतान्वायात्यशब्दचोदितमेवेति। तत्र तच्छब्दचोदिते चातच्छ
ब्दचोदिते चान्वायात्यशब्दप्रवृत्तिनिमित्तस्य विशेषाभावाद्यद्युत्किंचिदन्यानुप्रवेशितं सर्वमन्वा
यात्यमिति कृत्वा वाजिनामप्यन्वायात्यत्वादनादेशः प्राप्नोति। एवं प्राप्ते तु प्रवेशिनामादेशं विद
धन्नानुप्रवेशित्वमन्वायात्यत्वे निमित्तमिति दर्शितवानाचार्यः। अतस्तच्छब्दचोदितमेवान्वाया
त्यमिति सिद्धं। एतदेवादेशावचनस्य प्रयोजनं। नान्यदिति मंतव्यं। शंनो भवंतु वाजिनो हवेषु वाजे
वाजे वत वाजिनो न इत्यूर्ध्वज्ञुरनवानं याज्या। ऊर्ध्वज्ञुः ऊर्ध्वजानुः। याज्याग्रहणस्य प्रयोजनमनु
वषट्कारे ऊर्ध्वज्ञुतामाभूदिति। अग्ने वीहीत्यनुवषट्कारो वाजिनस्याग्ने वीहीति वा यत्र क्वचैकसंप्रैषे
द्वौ वषट्कारौ समस्तावेव तत्र द्विरनुमंत्रयेत। असंव्यवहारार्थमिदं। यत्र क्वच विषये एकस्मिन्नेवाध्व

+ रे ऊर्ध्वज्ञुतापेक्षायां हि अनुवषट्कारमपि विधाय पश्चादूर्ध्वज्ञुरनवानमिसवक्ष्यत्। याज्ये इति वा वक्ष्यत्। तस्मा +
+ द्विष्णोऽलरिणोपस्थेनाग्र्योर्ध्वज्ञुर्याज्यां पठित्वोपस्थेनोपविश्य वषट् कुर्यात् इति ३

89

र्युसंप्रेषेत्तुल्यरूपावतुल्यरूपौ वा द्वौ वषट्कारे भवतस्तत्र तौ वषट्कारे समस्तावेव वा गोऽजद्
स्यादिनाद्विरनुमंत्रयेत। न चागूरुत्तरस्मिन्। याज्यादावागूर्भवतीत्युक्तत्वादनुवषट्कारे प्या
गूः प्राप्तो निषेधः। आगुरः प्रतिषेधो याज्याधर्माणामितरेषां प्रापणार्थः। वाजिनभक्षमिच्छा
मि व प्रतिगृह्योपह्वमिच्छेत। इष्टमिष्टं वाजिनं भक्षार्थं पात्रेणानीतं। इच्छामि वांजलिना प्रति
गृह्यांजलौ निधायोपह्वमिच्छेत॥ भक्षणानुज्ञापनार्थं वाजिनभक्षसंबंधिनः सर्वान्याचेते
त्यर्थः। सर्वेषु भक्षसंबंधिषु उपह्वयाचनं कर्तव्यमित्युक्तं। तदनेन क्रमेणैवं प्रकारेण वा
क्येनेत्याह। अध्वर्य उपह्वयस्वेत्यनुपह्वयस्वाग्नीदुपह्वयस्वेति। वचनसामर्थ्यादेवैषामयं
क्रमः। एतेआदितोंततोन्येभक्षिणः वाक्यं च एवंप्रकारं कर्मनामधेयमित्युक्तमित्येतत्सर्वमव
गम्यते। अंतेंततो यजमानोपह्वयस्वेति। एतदपि लब्धं भवति॥ प्रतिवचं शब्दस्यास्मिंश्छास्त्रेऽनु
न १

कृत्वात्तस्य चापेक्षितत्वाद्धास्यां तत ऐक्कस्योपहूत इतिच्छन्दस्य ग्रहणं भवति। यन्मे रेतः प्रसिच्यते
न्यद्य मे अपि गच्छति यद्वा जायते पुनः। तेन मा शिवमाविश तेन मा वाजिनं कुरु। तस्य ते वाजिपी
तस्योपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयेत्। तस्य वाजिनस्य किंचिद्दातव्यानेन मंत्रे
णावघ्रेत्। एवमध्वर्युर्ब्रह्माग्नीध्रः। एते च प्राणभक्षं भक्षयेयुः। अध्वर्युग्रहणं भक्षयोपि
क्रमोस्तीति ज्ञापनार्थं न तस्यापि प्राणभक्षणनियमार्थं। अतो होतुर्भक्षणानंतरं अध्वर्य्वादेः क्र
मेण भक्षणं सिद्धं भवति। यजमानः प्रत्यक्षमितरे चरीक्षिताः। यजमानादितरे च परोक्षिता भ
वंति तत्र सर्वे प्रत्यक्षमेव भवेयुः। तच्च सत्रे संभवति। तत्र गृहपतेश्चान्येषां च प्रत्यक्षमेवेत्सर्थः। त

होत्रा

त्र च क्रमो मुख्यादि गृहपत्यंतः। पौर्णमासेनेष्ट्वा चातुर्मास्यव्रतान्युपेयात्। यस्मिन्नहनि वैश्व
देवी क्रियते तस्मात्परस्मिन्नहनि पौर्णमासेनेष्ट्वा तदानीमेव वक्ष्यमाणानि व्रतानि कर्तुमा

90

रभेत। पौर्णमासीयागवचनं व्रतारंभकालविधानार्थं। नित्यानामनिवर्तकत्वात् विकृतीना-
नामिति। व्रतशब्देन मानसो नियम उच्यते। अतः केशनिवर्तनादीनि करिष्ये। मध्वादीनि
वर्जयिष्ये इति दृढसंकल्पो भवेत्। एतद्व्रतरूपं॥ निवर्तनादीनि च कुर्यात्। मध्वादीनि वर्ज-
येच्च। न केवलं संकल्पमात्रमेव। केशान् निवर्तयीत। निवर्तनं कर्तव्यं। श्मश्रूणि वापयी-
त। अधः शयीत। मधुमांसलवणास्यवलेखनानि वर्जयेत्। केशप्रसाधनादीनि स्वैरिक-
र्माणि· अवलेखनशब्देनोच्यंते। पूर्वाणि त्रीणि कार्याणि। पराणि पंच वर्जनीयानि। एतानि
चातुर्मास्यव्रतानि॥ चातुर्मास्यव्रतवचनं सर्वेषां पर्वणामेतानि व्रतानि नैकस्यैव सन्निहि-
तस्य पर्वण इत्येवमर्थं। ऋतौ भार्यामुपेयात्। स्त्रीशब्देन प्रतिषिद्धस्य कालविशेषे प्रतिप्र-
सवोयं। वापनं सर्वेषु पर्वसु। उत्तरविवक्षार्थोयमनुवादः। ओं घोत्तमयो वा। ओं घोत्तमयो

वौ॥ पर्वे पोर्वापनं न मध्यमयोरित्यर्थः। अनुवादाभावे आद्यंतयोरेव वापनं स्यात्॥ तत्र विकल्पे
न मध्यमयोर्वापनप्रसंग एव नास्तीति गम्यते। तेनाद्यंतयोर्वापनं नित्यं मध्यमयोरनित्यमिति
सिद्धं भवति॥१४॥ पंचम्यां पौर्णमास्यां वरुणप्रघासैः। यस्यां पौर्णमास्यां वैश्वदेवी कृता तामा
रभ्य या पंचमी पौर्णमासी तस्यां वरुणप्रघासकैर्यष्टव्यमित्यर्थः। पश्चाद्दार्शपौर्णमासिका
या वेदेरुपविश्य प्रेषितोऽग्निप्रणयनीयाः प्रतिपद्यते। वेदेः पश्चादिति प्रदर्शनार्थं। प्रणीयमा
नस्याग्नेः पश्चादित्यर्थः। प्रेषितवचनमुक्तप्रयोजनं। अग्निप्रणयनीयाः अग्निप्रणयनार्थाः
प्रदेवं देव्याधियेतितिसृ ३ ब्ला यास्त्वापदे वयमग्ने विश्वेभिः स्वनीक देवैरित्यर्द्धर्चे आरमेत्। आ
सीनः प्रथमामन्वाहोपांशु सप्रणवां। उपविष्टस्यैवासीन इति वचनं व्रजत्स्वपि प्रथमामसमा
प्य नानुव्रजनायोत्तिष्ठेदित्येवमर्थं॥ सप्रणवां समानप्रणवामित्यर्थः। प्रथमायां रजतीयप्रणवेः

वसानेपित्रिमात्र एवेत्यर्थः। तत्र स्थानात्स्थानसंक्रमणे प्रणवेनावसायानुच्छ्वस्योत्तरं प्रति
पद्यते। तत्र प्रणवेनावसाय्येत्येतावतैव सिद्धे स्थानात्स्थानसंक्रमण इति वचनमस्य विधेः
सर्वार्थत्वाय॥ तत्रोपांशुस्वरस्थानात्स्वरे तरस्थानसंक्रमणे प्रणवेनावसाय अनुच्छ्वस्यैवो
त्तरमृचमारभेत॥ क्रगंते श्वासस्य प्राप्त्यभावे सत्यप्यनुच्छ्वासवचनमवसानविधिबला
दुच्छ्वासोपि प्राप्नोतीति तं निवृत्त्यर्थमनुच्छ्वासविधानं॥ तेनावसानविधानमुच्छ्वासार्थं साधितं
भवति। अतो यत्रोच्छ्वासप्रतिषेधः तत्रावसानमपि न कर्तव्यं भवेद्गावानादौ। अग्निमंथ
नाग्निप्रणयनादयो मंद्रस्वरेण प्रयोक्तव्याः प्राथम्यात्तस्य स्वरस्य तदतिक्रमणे कारणाभावा
त्। आतो मंद्रेणेत्यत्र पूर्वावधेरभावात्। प्राणसंततं भवतीति विज्ञायते। यदिदमवसायानुच्छ्
स्योत्तरामारभेत इति तस्मात् प्राणसंततं भवतीति विज्ञायते॥ श्रूयत इत्यर्थः॥ उत्तरमग्निमनुब्रूहीत्यु

तरणः। अनुब्रूयादिति शेषः। द्वयोः प्रणीयमानत्वादुत्तरमिति विज्ञेष्यते। अग्निद्वित्वे ह्याहवनीयद्वि-
त्वाभावान्मंत्राणामूहो नास्ति। इमं महे विदथ्याय शूषमयमिह प्रथमो धायि धातृभिरिति तु एज-
न्यवैश्ययोरग्नेः। समानजातीयत्वादेनाभ्यां बाधः प्रदेवमित्यस्याः। अयं एजन्यवैश्ययोर्विशेषः।
अन्यत्समानं। पश्चादुत्तरस्या वेदेरवस्थायाः शेषं समापयेदिति शेषः। वेदिद्वित्वादुत्तरस्या इत्यु-
च्यते। उत्तरवेदेस्तु सोमेषु। पश्चादवस्थाय समापयेदिति शेषः। निहिते ग्नौ सीद होतः स्व उ लोके चि-
कित्वान्निहोता होतृषदने विदान इति द्वे परिधाय तस्मिन्नेवासन उपविश्य भूर्भुवः स्वरिति वाचं वि-
सृजेत। अत्र निहिते ग्नाविस्तुत्तरादानस्य निमित्तं नाध्वर्युसंप्रैषः। तस्मिन्नेवेति यस्मिन्निदमनुवच-
नमारब्धं तस्मिन्नेवेत्यर्थः। अन्यत्रापि यत्रानुब्रुवन्नुव्रजेत्। तत्राप्येवं कर्तव्यमिति शेषः। अनुब्रु-
वन्निति वचनं आनुवचनं एवैतस्या नाभिष्टवनादिषि सेव मर्थः॥ तिष्ठत्सं प्रेषे श्रुत पेवं वाग्विसर्गः।

आश्रौ॰ सू॰ ९२

तिष्ठतः संप्रैषे तु तिष्ठत एव वाग्विसर्गो भवति। अग्निमंथनादिसमाना वैश्वदेव्या। इयमि
ष्टिर्वैश्वदेव्या समाना भवति। द्वयोरपि मथ्यमानयोरग्निद्वित्वं नास्ति। एकस्यैवायमग्नेर्विभाग
इति कृत्वाऽनूहेनाहवनीयाभिधायिनां प्रयोगसिध्यर्थमग्निमंथनादिसमानावचनं। हविषां
तु स्थाने षष्ठप्रभृतीनामिंद्राग्नी मरुतो वरुणः कः। अयमत्र विशेषः। षष्ठ्याद्यास्तिस्र उद्धल
इंद्राग्न्यादयस्तिस्रः कर्तव्या इति। इंद्राग्नी अवसागतंस्म पहूत्रमुत सनोति वाजं मरुतो यस्य हि
क्षयेऽस इवेदचरमा अहेवेमं मे वरुण श्रुधि तत्वा यामि ब्रह्मणा वंदमानः कया नश्चित्र आभुव हि
रण्यगर्भः समवर्तताग्र इति। प्रतिप्रस्थाता वाजिने तृतीयः। उपहवयाचनेऽयं तृतीयो भवति। भक्ष
णे चतुर्थः। उपहवयाचनं होत्रादियजमानांतं। होतुरध्वर्य्वादि यजमानस्याग्नीदंतं। भक्षणं तु होत्रा
दियजमानांतमेव। वैश्वदेव्यामप्येवमेव। संस्थितायामवभृथं व्रजेति। संस्थितायामिष्टौ अवभृथ

एम॰ ९२

92

कर्मार्थमुदकं गच्छेत्यध्वर्य्यवे इत्यर्थः। तत्रावम्रेष्टिः कृताकृता। कृतिरेव कृतं कृते चाकृतं च यस्याः सा
न कृताकृता अनित्येत्यर्थः। इष्टिभावे यदन्यदप्यवधानादित्तत्सर्वं भवति। तामुपरिष्टाद्व्याख्यास्यामो द्वयोर्मासयो
रैंद्राग्नः पशुः। वरुणप्रघासपौर्णमासीमारभ्य तत्तीयस्यां पौर्णमास्यामित्यर्थः। अनेन चातुर्मास्यांगत्वे
न पश्वंतरं विधीयते। नानेन निरूढकालो विधीयते। अतो निरूढोपि स्वकाले कर्तव्य एव॥ ५॥ तथा ततः
साकमेधाः। यथा वरुणप्रघासेभ्यः ऐंद्राग्नः। तथैंद्राग्नात्साकमेधाः। द्वयोर्मासयोरित्यर्थः। अनीकवदा
दीनामादित्यांतानां साकमेधा इति नाम। पूर्वेद्युस्तिस्र इष्टयोनुसवनं। यस्यां पौर्णमास्यां साकमेधा यष्ट
व्यास्तस्याः पूर्वेद्युः सवने सवने एकैकेष्टिः कार्या। प्रथमायामग्निरनीकवान्। अनीकवंतमूतयेग्निं गीर्भिर्हू
वामहे। स नः पर्षदतिद्विषः। सेनानीकेन सुविदत्रो अस्मे इति। उत्तरस्यां वृधन्वंतो मरुतः सांतपनाः सांतप
ना इदं हविर्यो नो मरुतो अभिदुर्हृणायुरिति। मरुद्भ्यो गृहमेधेभ्य उत्तरज्यभागप्रभृतीव्ठंता। मरुतो ग

हमेधा देवताः। आज्यभागप्रभृतिश्वसाइत्वन्ता चेति। आज्यभागप्रभृती त्वन्ता। गृहमेधास आगतप्रभु
ध्याव ईरते महांसीति। आम्नातत्वादेते एव गृहमेधिन्यो भवतः॥ पुष्टिमन्तौ विराजौ संयाज्ये अनिगदे। इ
हविराजौ संयाज्ये इत्युक्ते संयाज्ये अनिगदे निगदरहिते भवत इत्यर्थः। निगद इति अयाडग्निरित्या
दि जुषतां हविरित्येवमन्त उच्यते। अन्यत्राप्यनावाहने। गृहमेधीयादन्यत्रापि यत्रावाहनं नास्ति तत्रा
प्यनिगदे संयाज्ये भवतः। अन्यत्रापीति योगविभागार्थमुच्यते। तस्य प्रयोजनं। अन्यत्रानावाहने निग
दे भवतः। इह त्वावाहने ऽनावाहने वा अनिगदे एवेत्येवमर्थं। अत एवात्र पक्षे आवाहनमप्यस्ती
ति ज्ञापितं भवतीति गम्यते। पूर्वसूत्रे संयाज्याग्रहणस्येदं प्रयोजनमिदमनिगदत्वविधानं संयाज्यामात्र
स्य न विराज एवेति ज्ञापनार्थं। आवाहनेपि पित्र्यायां पत्नौ च। अनयोरावाहने सत्यपि अनिगदे एव भव
तः। बहुचैतस्यां रात्र्यामनन्तं प्रसुवीरन्। प्रसुवीरन्निति बहुवचनं। लोके यष्टारो बहव इति प्रसुवीरन्नृद्धु

रित्यर्थः। एतस्यां रात्र्यामिति वचनाद्रात्रावेवेष्टिः परिसमाप्यत इति गम्यत इति। तस्या विवासे पौर्णदर्वं जु-
हुयुः। विवासो रात्र्याः पश्चाद्भागः। पौर्णदर्वमिति कर्मनाम। तत्तस्मिन्काले कर्तव्यं। ऋषभे रवाणे। ऋषभे रु-
वति। स्तनयित्नौ वा। मेघे वा रुवति। आग्नीध्रं हैके रावयंति ब्रह्मपुत्रं वदंतः। [illegible] तस्याप्यभावे ब्रह्मपुत्र-
शब्देनाग्नीध्रं संबोध्य रावयंति। ब्रह्मपुत्र रोरुहीत्येवं। यदि होतारं चोदयेयुस्तस्य याज्यानुवाक्ये। पू-
र्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो। देहि मे ददामि ते नि मे धे-
हि नि ते दधे॥ अपामिक्षमिव संभरकं वा ददते ददद्दिति। एवं त्वर्वेतोऽध्वर्युर्वा यदि होतारमपि चो-
दयेयुः॥ अनुब्रूहि यजेति तदैते याज्यानुवाक्ये भवतः। शतक्रतुलिंगाच्छास्त्रांतरे ऐंद्रं पौर्णदर्वमित्या-
म्नानाच्चाइंद्रोस्य देवता भवति। मरुद्भ्यः क्रीडिभ्य उत्तरा इष्टिरित्यर्थः॥ उत ब्रुवंतु जंतवो ये कृत्स्नुरग-
भीत इति परे स्ववार्त्रघ्नौ। आज्यभागौ परे स्ववार्त्रघ्नौ भवतः। क्रीडं वः शर्धो मारुतमत्यासो न ये मरुतः

आ॰श्रौ॰सू॰ ९४

९५

स्रुचः। क्रौञ्चिनामेते आम्नाते। अक्रौञ्चिनामप्येते याज्यानुवाक्ये भवतः। जुष्टो दमूना अग्ने त्वाईमहे ते
सौभगायेति संयाज्ये। वाजिनावभृथवर्जं माहेन्द्रान्तः वरुणप्रघासैः। माहेन्द्रीतीष्टिनाम। आमिक्षाभा
वादेव वाजिनाभावे सिद्धे वाजिनप्रतिषेधं कुर्वन् वाजिनस्य प्राधान्ये संबन्धं दर्शयति। तेन वाजिनस्य
मध्यमः स्वरः साधितो भवति॥ हविषां तु समस्मादीनां स्थाने। इन्द्रो वृत्रहेन्द्रो वा विश्वकर्मा। वृत्रहा शब्द
इन्द्रस्य गुणः। आघाराः स्तिस्रो विकल्पन्ते। विश्वकर्मा त्वः। अतो ष्ठा वत्र देवनाः। आ नून इन्द्र वृत्रहन्नगुतेय
थिमहइन्द्रियावद्विश्वकर्मन्हविषावावृधानो याते धामानि परमाणि यावमेति॥१६॥ दक्षिणाग्नेरग्नि
मतिप्रणीयपित्र्या। दक्षिणाग्नेरग्निमानीयातीत्य ते देशमन्यत्र निधाय तस्मिन्नग्नौ पित्र्या नाम कर्म
कर्तव्यं। अतिप्रणीय पित्र्येति वचनात्तस्मिन्नेव पित्र्या भवेत्। नैमित्तिकं त्वाहवनीयादिष्वेव। आहवनीयो
प्यत्र विहरणीयः। उत्तरत्रोपस्थौत्॥ साशंस्यं वा। साग्रहणं योगविभागार्थं। योगविभागप्रयोजनम

धर्म
महेन्द्रो

रामं
९४

नदर्शना

नतिप्रणीतचर्यायामपि त्र्यंबकं तादृग्धर्मप्रापणार्थं। लुप्तजपा हि तारमहाथा वषट्कारनुमंत्रणाभि
हिंकारवर्जं। जपशब्देनात्र न केवलो जप एव गृह्यते। किंतु अनुमंत्रणलोपप्रतिषेधाज्जपादीनां
णामुपलक्षणार्थं इति गम्यते। नान्यस्योपांशुप्रयोज्यस्यापि॥ तेनेक्तानिगदस्यालोपः सिद्धो भवति।
लुप्तजपायस्याः सा लुप्तजपा॥ हो तारमहाथा इत्यस्य निगदैकदेशस्योपांशुत्वसिद्ध्यर्थं न जपेदिति
वचनेन जपशंकयालोपशंकानिवृत्त्यर्थं तद्वर्जनवचनं। इतरयोः प्राप्तस्य प्रतिप्रसव एव। तस्यां प्रा
चिकर्माणि दक्षिणा। तस्यामिति वचनं कृत्स्नप्राप्त्यर्थं। प्रकृत्यात ऊर्ध्वमित्यत्रापि प्रापणार्थं। यानि
प्रकृतौ प्राचिकर्माणि प्राङ्मुखानीत्यर्थः। तान्यस्यां दक्षिणामुखानि कर्तव्यानीत्यर्थः। इतराणि तथान्व
यं। यानीतरदिङ्मुखानि प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च तथान्वयं कर्तव्यानि।
दक्षिणां दिशं प्राचीं कृत्वा तदनुसारेणान्यदिङ्मुखानि कर्तव्यानीत्यर्थः। उशंतस्त्वा निधीमहीत्येतां त्रि

रनवानं ताः सामिधेन्यः। एतामचं त्रिरनुच्य सन्नमनु ब्रूयात्। ता इति वचनात्ता एव सामिधेन्यो न पुन
रभ्यसितव्या इत्यवगम्यते। तासामुत्तमेन प्रणवेनावह देवान्यितॄन्यजमानायेति प्रतिपत्तिः। तासां
सामिधेनीनां उत्तमेन प्रणवेनावह देवान्पितॄन्यजमानायेति प्रतिपत्तिरेव संधेया। तेनाग्नेमहा
नित्यादि परिभूरसीत्यंतं लुप्यते। प्रतिपत्तिश्चैवं रूपा भवति पित्र्यायां। प्रकृतौ देवा इज्यंत इति तेषां
संकीर्तनकृते। इह च देवाश्च पितरश्चेज्यंत इति पितृशब्दोपि प्रयोक्तव्य इति। सर्वत्र देवशब्द व
ति मंत्रे पितृशब्दं प्रयोज्यत्वेन प्राप्ते स्वार्थ एव देवशब्दं प्रयोज्यो न परार्थ इति कृत्वाचार्यो न्यत्र पर ए पितृशब्दः
र्थत्वाद प्रयोगं मन्यमानः तत्सहिते प्रतिपत्तिवाक्यं पठितवान्। तेनान्यत्र पितृशब्दो न प्रयोक्तव्य इ
ति सिद्धं। प्रतिपत्तिवाक्यमुक्त्वा ततो वक्ष्यमाणा देवता आवाहयेत्। अग्निं होत्राया वह स्वं महिमानमा एम॰
वहेत्येतस्य स्थानेग्निं कव्यवाहनमावाहयेत्। आज्यपांत देवता आवाह्य प्राकृतस्विष्टकृतमावाह दा ९५

नस्योद्धारं कृत्वा तस्थाने ऽग्निं कव्यवाहनमावाहयेत्। उत्तमे चैनं प्रयाजे प्रागाज्यपेभ्यो निगम
येत्। उत्तमे च प्रयाजे प्रागाज्यपेभ्यः अग्निं कव्यवाहनं निगमयेत्॥ सूक्तवाके चाग्निर्होत्रेणे
त्येतस्य स्थाने। निगमयेदिति वर्त्तते। नेह प्रादेशः। कार्यार्थत्वान्मंत्राणां मंत्रलोपेपि कार्यस्यालो
प इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते। न बर्हिष्मंतौ प्रयाजानुयाजौ नेडायां भक्षभक्षणं। भ
क्षेषु प्राणभक्षमिति प्राप्ते इडायां भक्षणमेव नास्ति। कः प्रसंगः प्राणभक्षस्येत्यर्थः। भक्षणव
चनं प्रकृतावंतरेडाभक्षादन्य इडाभक्षोस्तीति ज्ञापनार्थं। इडायामिति सप्तमीनिर्देशादिडा
विषयं यद्भक्षणमिति गम्यते। नेडाया एव भक्ष इति। तेनावांतरेडाभक्षणमिडाभक्षणं च अत्र
नास्तीति गम्यते। न मार्जनं। इडाभक्षणं गत्वा देवमार्जनाभावे सिद्धे तदभाववचनं तदंगत्वज्ञाप
नार्थं। न सूक्तवाके नामादेशः। सूक्तवाके यजमाननामतन्त्रादृष्टं। सूक्तवाकवचनं स्रुगादाप

नादिषु ध्वर्य्वादिशब्दाप्रसंगानिवृत्त्यर्थं। ईक्षितः सीद होतरिति वोक्त उपविशेत्। उत्तरस्योप
वेशनस्येदं निमित्तद्वयं विधीयते। प्रादेशकरणाद्यर्थत्वात्पूर्वस्य तदभावे भावः। प्रादेशस्या
भाव उक्तः। अनुमंत्रणमपि नास्ति। अनुमंत्रणाप्यायनोपस्थानानां मंत्रारूढरूपत्वात्क्रिया
यां मंत्राभावे क्रियाया अप्यभाव इति। तस्मादत्र पूर्वमुपवेशनं नास्ति। माठषशब्दप्रत्याम्नायई
क्षणादितत्स्थात्वोपविशेदित्युक्तत्वादतिक्रमणादि सर्वं न भवति। निरसनोपवेशनबर्हिरु
पस्पर्शनानि मंत्ररहितानि कुर्यादेव। जीवा नु मंतौ सव्योत्तरौ उपस्थाः प्राचीनावीतिनो हविर्भि
क्षरंति। उपस्थविधानं येषां तदंगं तेषामेव। हविर्ग्रहणं प्रधाने पर्ययं धर्म इति ज्ञापनार्थं। तेन प्र
धानमध्येपि यस्याप्यश्चिन्तत्वेन प्राप्तं तस्याप्ययं धर्मो न भवतीति गम्यते। दक्षिणा आग्नीध्र उत्तरे
ध्वर्युः। द्वे द्वे अनुवाक्ये। अध्वर्धामनवानं। अत्रानुवाक्याकार्यस्यैकत्वान्मध्ये प्रणवो नास्ति। ॐ

स्वधेत्याश्रावणं। अस्तु स्वधेति प्रत्याश्रावणं। अस्तु स्वधा स्वधेति संप्रैषः। द्वावेतौ संप्रैषौ। अ
स्तु स्वधा इत्येके। स्वधेत्यपरे। एकवचनं जात्यभिप्रायं। अस्तु स्वधा स्वधेति दीर्घः पठितव्यः। ये स्वधेत्या
गूर्ये स्वधामह इति वा। स्वधा नम इति वषट्कारः। अत्र ओं स्वधेत्यादयः स्वधान्ताः शब्दाः दीर्घान्ता एव प्र
योक्तव्याः। अध्वर्युसंप्रैषपाठप्रयोजनं। तदेव श्रुत्वास्य कार्यकरणार्थं। नित्याः प्लुतयः। उक्ताः प्लुतयः
प्रकृतावाघेह्निती ये उपांसे वायदक्षरस्याप्लुतिः एतेषु पितर[illegible]क्षरस्यैव कार्येत्यर्थः। पितरः सोमवन्तः
सोमो वा पितृमान् पितरो बर्हिषदः पितरोऽग्निष्वात्ता यमः पितॄणां सोमवन्तो गणाः। सोमस्य पितृमत्ता
गुणाः। बर्हिषदोऽग्निष्वात्ता इति च पितॄणामेव गुणाः। आद्ये वैकल्पिके। उदीरतामवर उत्परासस्त्वया
हि नः पितरः सोम पूर्वे उपहूताः पितरः सोम्यासस्त्वं सोम प्रचिकितो मनीषा सोमो धेनुं सोमो अर्वन्त
माशुं त्वं सोम पितृभिः संविदानो बर्हिषदः पितर ऊत्यर्वागा हं पितॄन्न सुविदत्रां अवित्सीदं पितृभ्यो

आ॰श्रौ॰सू॰
९७

97

नमो अस्त्वग्निष्वात्ताः पितर इह गच्छत ये चेह पितरो ये च नेह ये अग्निदग्धा ये अनग्निदग्धा इ
मं यम प्रस्तरमाहिंसीदिति द्वे परेयिवांसं प्रवतो महीरनु। पंचानां तिसृणां तिस्र ऋचः। वैवस्वताय
चेन्मध्यमायाज्या। यदि यमो वैवस्वतो देवता ननु तत्र मैत्रिके मध्यमा ऋग्याज्या भवति। प्रथमो
न मे अनुवाक्ये इति। ये तातृपुर्देवत्रा जेहमाना स्त्वदने काव्या त्वन्मनीषाः स प्रत्नथा सहसा जायमान
इति। स्विष्टकृत इति शेषः। अग्निः स्विष्टकृत् कव्यवाहनः। प्रकृतौ यो अग्निः स्विष्टकृत्। इह तत्कार्य
करोऽग्निः कव्यवाहन इत्यर्थः। तेनात्र स्विष्टकृच्छब्देन प्रयोक्तव्यः। प्रकृत्यात ऊर्ध्वं। स्विष्टकृ
त ऊर्ध्वं प्रकृत्या भवति। सव्योत्तर्युपस्थादयो न भवंतीत्यर्थः। वचनमिदं स्विष्टकृतस्यापि प्रापणा
र्थं। अंगत्वादेव उत्तरत्र प्राप्त्यभावात्। वषट्कारक्रियायां चोर्ध्वमाज्यभागाभ्यामन्यमंत्रलोपात्।
मंत्रलोपशब्देन पूर्वोक्ताः सर्वे विकारा लक्ष्यंते। तेभ्योऽन्येषां सव्योत्तर्युपस्थानादीनामभावाय प्र

एम॰
९७

कृतिभावो विधीयते ॥ प्रधाने पुंस्विष्टकृति च स्वधाकारं वर्जयित्वा वषट्कारेणक्रियाचेतदूर्-
ध्वमाज्यभागाभ्यामिति वषट्कारक्रियायाः [illegible] स्थानलक्षणार्थं । तेनाज्यभागाभ्यामूर्ध्वं स्वि-
ष्टकृत्पर्यन्ते स्थाने वषट्कारक्रियायां प्रकृत्या भवतीति गम्यते । तत्र मंत्रलोपादिः पूर्वो विका-
रः सर्वप्रकारायां पित्र्यायामासमासेर्भवत्येव । एकैकस्याच्चातुर्वाक्या । प्रकृतिभावादेव एकत्वे
सिद्धे एकत्ववचनमिदं तयोरेकैकस्याग्रहणार्थं । यो अग्निः क्रव्यवाहनस्त्वमग्न ईळितो जा-
तवेद इति संयाज्ये । वषट्कारक्रियायामेव । भक्षेषु प्राणभक्षानभक्षयित्वा बर्हिष्यनुप्रहरेयुः ।
संस्थितायां प्राग्वानुयाजाभ्यां दक्षिणावृतो दक्षिणाग्निमुपतिष्ठन्ते । उभयतो विहारस्य दक्षि-
णमेप्राक्षे नियमार्थं दक्षिणावृद्वचनं । अनावृत्यानतिप्रणीतचर्यायां । अनतिप्रणीतचर्यायां
पित्र्यायां आवर्तनमकृत्वैवोपतिष्ठन्ते । तथैवाभिमुखत्वसंभवात् । अथापि छाजननयन्तर्वर्णपि

सहि घृणिरुरुर्वराय गातुः। स प्रत्युदैद्धरुणं मध्वो अग्ने स्वां पुनस्तनूं न्वा मेरयते ति। अयं दक्षिणा
ग्नेरुपस्थानमंत्रः। आहूतस्त्वैवे न रै। अतिप्रणीतचर्यायां दक्षिणाहृ दक्षिणाग्नेरुपस्थानमुक्तं।
अनतिप्रणीतचर्यायामनाहूतस्यैवोपस्थानमुक्तं। इदानीं गार्हपत्याहवनीययोरुपस्थानमु
च्यते। तु शब्दो विशेषविधानार्थः एवशब्दो वधारणार्थः। अतिप्रणीतचर्यायामनतिप्रणीतचर्यायां च
गार्हपत्याहवनीययोः आहूतस्यैवोपस्थानमिति। आहवनीयं सुसंदृशं त्वेति पंक्त्या। पंक्तिवत्वनं प्र
तीकः संदृहनिहूतस्यर्पे। गार्हपत्यमग्निं ते मन्य इति। एकयर्चा न सूक्तेन उत्तरत्र सूक्त वचनात्। अ
प्येनमभिसमायंति। मा प्रगाम मा ग्ने त्वं न इति जपेतः। एते सूक्ते जपेतः। एनं गार्हपत्यमभितः स
मायंति। प्राग्दक्षिणयेन। पूर्वेण गार्हपत्यं सूक्ते समाप्य सव्यावृत्त स्वं स्वं वकान्नजंति। गार्हपत्यस्य
पुरस्ताद्देशः तस्मिन्देशे यथा सूक्ते समाप्येते तथा समापयंति सूक्तग्रहणमग्निं ते मन्य इत्य

त्रस्त्वचोग्रहणार्थं। यदीष्टिं समाप्योपतिष्ठंते तदा ततस्त्यैव कान्त्रजंति। यदानूयाजान्त्यांप्राकृ
तदा समाप्येष्टिं त्र्यंबकार्थं व्रजेयुः। त्र्यंबकानाम कर्मविशेषाः। तत्राध्वर्युः कर्माधीयते।
तत्र यदध्वर्युणोक्तं तद्यजमानेरपि कर्तव्यमित्यर्थः। प्रत्येत्यादित्ययाचरेति। अदितिरत्र देवता
नादित्यः। आदित्या नौ याज्यानुवाक्याः नाम्नानाताः। पुष्टिमंतौ धाय्ये विराजौ॥२॥ पंचम्यां पौर्णमास्यां
शुनासीरीयया। साकमेधकालमारभ्य या पंचमी पौर्णमासी तस्यां शुनासीरीया कर्तव्या। शुनासीरी
येति कर्मनाम। अर्वागपयोपपत्तिवा। पंचम्याः पौर्णमास्या अर्वागपि यत्र काले कर्तुं संभवति तत्र
वेत्यर्थः। ततो गृहेष्वग्न्येहे इति त्रयाणं स्त्रांतरोक्त इत्यर्थः। वाजिनवर्जं समानां वैश्वदेव्या। हविषां तु स्थाने
षष्ठप्रभृतीनां वायुर्निरुप्तान्वायुर्वा शुनासीरो वींद्रो वा शुनासीर इंद्रो वा शुनः। सूर्य उत्तम इति निरुप्ता
निति वायोर्गुणः। शुनासीरः शुनश्च इंद्रस्य गुणौ। प्रथमद्वितीयौ वैकल्पिकौ। पुनस्त्रयोपि विकल्प्यंते।

आ॰श्रौ॰सू॰
९९
99

सूर्यस्योन्नमवचनं देवतांतरप्रवेशेपि सूर्यउन्नमएव। अन्यत्रेक्रमांतरंभवतीति एवम
र्थं। आवायोभूषशुचिपाउपनः प्रयाभिर्यासिदाश्वांसमच्छसत्वंनोदेवमनसेथानाय
प्रकृतिंयस्तआनडूच्छुनासीरविमांवाचंजुषेथां शुनंनःफालाविकृषंतुभूमिमिंद्रंवयंशुना
सीरमस्मिन्यज्ञेहवामहे। सवाजेषुप्रनोविषत्। आप्यायंतोगव्यंतोवाजयंतः शुनंहुवेममघ
वानमिंद्रमस्यायंतोगव्यंतोवाजयंतंतस्तरणिर्विश्वदर्शतश्चित्रंदेवानामुदगादनीकमितिया।
ज्यानुवाक्याः। याज्यानुवाक्याग्रहणंयाअस्मिन्प्रकरणेआम्नाता याज्यानुवाक्यास्ताएवएतत्प्रक
रणसंबंधिनीनांदेवतानांशास्त्रांतरादागतानामपिकथंचिदपिसंभवेग्रहीतव्याः नान्याइत्येव
मर्थं। समाप्यसौमेनयज्ञेनाशक्तोपशुना। चातुर्मास्यानामेतावंगभूतौपशुसोमौ निरूढज्योतिष्टो
मप्रकृतिकौ समाप्तिनिमित्तत्वादनयोः। चातुर्मास्यानिवापुनश्चातुर्मास्यानिवापुनः। चातुर्मास्ये

राम॰
९९

रितिवक्तव्येअन्यथावचनंनेमानितदंगभूतानीतिह्यापद्येत।तेनपुरेऽग्नेपिताऽन्येवाभ्यसितव्यानी। अ
तिगम्यते।अभ्यासपक्षेसमाप्तावपिनैवपशुसोमौकर्तव्यौ।अस्यपक्षस्यपूर्वाभ्यांसहवैकल्पि
कत्वात्।वरुणप्रघासेषूहउच्यते।अग्निद्वित्वाभावादग्निवाचिनामनूहः।घृतवतीत्यत्राध्वर्यू
आस्येथांविश्वावसूइत्यूहः।वेदोसीत्यत्रवेदविषयाणांपदानामूहः।अन्यदप्येवंरूपमस्तिचे
न्नद्रन्वेषणीयं॥ ॥१९॥ ॥इत्याश्वलायनसूत्रवृत्तौनारायणीयायांद्वितीयोध्यायः॥२॥ॐ॥ॐ

हरिः ॐ ३॥पशोः।अधिकारोयंपाकयज्ञाश्रिताधिकारात्।पशुगुणकंकर्मपशुरित्यु
र च्यते।इष्टिमुभयतोन्यतरतोवा।तस्यपशोरुभयतः अन्यतरतोवाइष्टिःकर्तव्या।आग्नेयीवा।

यासाविष्टिः पशोरुभयतोन्यतरतो वा कर्तव्यत्वेन चोदिता साग्निदेवत्या वा भवेदित्येकोर्थः। अपरश्चार्थो वाशब्दाल्लभ्यते। येयमाग्नेयीष्टिः पशोरुभयतोन्यतरतो वांगत्वेन विहिता सा न भवेद्वेति। तेनेयमिष्टिरनित्येत्यवगंतव्या। अतः सिद्धंस्वतंत्रेषु पशुषु कर्तव्या अंगभूतेषु न कर्तव्येति। आग्नावैष्णवी वा। इष्टेः करणपक्षे देवताविकल्पोनेन विधीयते। उभे वा। आग्नेयी चाग्नावैष्णवी च एकस्मिन्पशुप्रयोगे द्वे वा इष्टी भवेतां। अन्यतरा पुरस्तात्। यदा उभे स्यातां तदैका पुरस्तादितरोपरिष्टादित्येवं भवतः। नोभे संहते उभयतो अन्यतरतो वा भवेतामिति सूत्रार्थः। उक्तमग्निप्रणयनं। उक्तग्रहणं वारुणप्रघासिकस्य सविधिकस्य ग्रहणार्थं। पश्चात्साग्निबंधिकाया वेदेरुपविश्य प्रे

तेन चात्वालोत्करावंतरेण प्रवेशः सिद्धः =२

षितो यूपायाज्यमानायांजं तित्वामध्वरे देवयंत इत्युत्तमेन वचनेनार्धर्चआरमेत्।
वेद्यंतरस्याभावेपि पाशुबंधिकाया इति विधिभ्रमपांतत्वज्ञाने तद्व्युदुपचारासिध्यर्थं॥
प्रेषितवचनं बहुयूपके कर्मणि अंजनादीनां पदार्थानुसमये क्रियमाणे प्रेषितः
प्रेषितोनुब्रूयादित्येवमर्थं। यूपायाज्यमानायेति यूपमज्यमानमभिधातुमेता
मृचमनुब्रूयादित्यर्थः। तस्या उत्तमेन वचनेनेति संबंधः। उछ्र्यस्व वनस्पते स
मिद्धस्य श्रयमाणः पुरस्ताद्धूर्ध्व ऊ षु ण ऊतय इति द्वे जातो जायते सुदिनत्वेअ
ह्नामित्यर्धर्चआरमेद्युवा सुवासाः परिवीत आगादिति परिदध्यात्। परिदध्या
दिति वचनं पदार्थानुसमये प्रतिपदार्थंनानुवचनस्य भेद इति ज्ञापनार्थं। ॥

श्रौ०सू०३ यत्रैकतंत्रे बहवः सपशवो ऽन्त्यं परिधायसंस्क याऽरनभिहिंकृत्य यान्योनरो देवयं
१०१ तोनिमिम्युरितिसङ्गिः। यस्मिन्कर्मणि एकस्मिन्नेव पश्चुतंत्रे बहवो ऽरूपाः सपश
वश्चतत्रांत्यमनुवचनं परिधायसंस्कयाद्यपान्। कांडानुसमयाभिप्रायेयोद
101
मुच्यते ऽंत्यमिति॥ तदानुवचनस्याभिन्नत्वात्पदार्थानुसमये त्वेकमेवानुवच
नं भवति॥ एकतंत्र इतिवचनं एककर्ममात्रनिवृत्त्यर्थं॥ बहव इति द्वयोर्निवृत्त्य
अ र्थं॥ सपशव इति पशुकबकुत्वनिवृत्त्यर्थं॥ पंचभिर्वा॥ अनभ्यासमेके॥ प्रथ
मोत्तमयोरनभ्यासमित्यर्थः। उक्तमग्निमंथनं तथा धाय्ये कृता कृता वाज्यभा
गावावाहने पशुदेवताभ्यो वनस्पतिमनंतरं॥ आवाहये दितिशेषः। १०१

आवाहनग्रहणंआवाहनादिष्वैष्टिकेष्वेवनिगमेषुनिगमनंवनस्पतेर्नपाशुकेष्वित्येव
मर्थ।अतःसूक्तवाकप्रैषेनिगमनंनकर्तव्यंभवति।संमार्गैःसंमृज्यप्रवृत्ताहुतीर्जुयात्।
संमार्गैःसंमृज्यउदकंस्पृष्ट्वाप्रवृत्ताहुतीर्जुयात्।प्रवृत्ताहुतिरितिकर्मनामनगुणविधिः
।जुष्टोवाचेभूयासं[illegible]जुष्टोवाचस्पतयेदेविवाक्।यद्वाचोमधुमत्तमंतस्मिन्माधाःस
रस्वत्यैवाचेस्वाहा।पुनरादायपंचविग्राहंस्वाहावाचेस्वाहावाचस्पतयेस्वाहासरस्वत्यै
स्वाहासरस्वतेमहोभ्यःसंमहोभ्यःस्वाहेति।सकृद्गृहीत्वैकांहुत्वापुनःसकृद्गृहीत्वापंचा
हुतीर्जुहुयात्।आहुतिसंख्याभेदाद्देवताभेदेसिद्धेविग्राहवचनंमंत्रविग्राहणार्थं।
सोमएवैके।सोमशब्देनसौत्यमहरुच्यतेसौत्यएवाहनिअयंहोमोनान्यस्मिन्नित्येके।
प्रशास्तारंतीर्थेनप्रपाद्यदंडमस्मैप्रयच्छेद्दक्षिणोत्तराभ्यांपाणिमित्रावरुणयोस्त्वाबा भ्यां

श्रौ० वृ० ३ ऊरुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामीति। विहारे प्रपदनस्य तीर्थेनैव सिद्धत्वात्तीर्थेनेति वच

नं प्रशास्त्रतीर्थेन प्रपद्यस्वेति संप्रेषलाभार्थं। प्रदानमंत्रो मित्रावरुणयोस्त्वेत्यादि। तथा

युक्ताभ्यामेवेतरो मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो वि

थुरो भूयासमिति। प्रतिगृह्णीयादिति शेषः। तथायुक्ताभ्यामिति दक्षिणोत्तराभ्यां पाणि

भ्यामित्यर्थः। प्रतिगृह्योत्तरेण होतारमतिव्रजे दक्षिणेन दंडं हरेन्न चानेन संस्पृशेदात्मानं

वान्यं वा प्रैषवचनात्। अनेन दंडेनात्मानमन्यं वा न संस्पृशेत्। आप्रैषवचनात्। याव

त्प्रैषोच्चारणं नास्ति तावदयं नियमः। आरब्धे प्रथमे प्रैषे नायं नियमः। अन्यान्यपि प

दांगान्युपयुक्तानि न विहारेण व्यवेयात्। अन्यान्यपीति वचनाद्यत्सूर्वोक्तमुत्तरेण हो

तारमतिव्रजे दक्षिणेन दंडं हरेदिति तदपि व्यवायपरिहारार्थमेवेति गम्यते। तेनैतद्

र्शितं भवति। हवींषि चाग्नयोंतरतमाः। हविष्षु च प्रधानाप्रधानविशेषोऽस्ति। ततः स्रुगा
दीनि साधनानि तेषु च विशेषोऽन्वेषणीयः। ततः कर्तारस्तेषु च स्वामी मुख्यो द्वितीयस्तृती
यचतुर्थेषु विशेष इत्येवं बुध्वा एते ऽपचारे कृते यज्ञांगानि विहारेणाव्यवेतानि भवंति।
उपयुक्तवचनमनपहृतकर्मणामेव ग्रहणार्थं। सर्वार्थं चेदं सूत्रं व्यवायप्रतिषेधप
रत्वात्। दक्षिणात होतृषदनात्सहोवरुणाय वेद्यां दंडमवष्टभ्य ब्रूयात्प्रैषांश्चादेशं। वेदि
श्रोण्यां बहिर्वेदि होतृषदनं तस्य दक्षिणतो बहिर्वेदिस्थयमवरुणायां तर्वेदि दंडमवष्ट
भ्य ब्रूयात्। प्रैषानादेशं। आप्रैषप्रेषणमित्यर्थः। यावंति प्रैषार्थानि प्रेषणानि संति
तावत्सु प्रेषणेषु प्रैषान्ब्रूयादिति। एतदुक्तं भवति। प्रैषाम्नायपरिपठितान्सर्वान्प्रैषा
न्मैत्रावरुण एव प्रेषितः प्रेषितोनु ब्रूयादित्यर्थः। चशब्दो मैत्रावरुणानुकर्षणार्थः।
= यत्र यत्र यो यः प्रैष आदिश्यते तत्र तत्र तं तं प्रैषमनुब्रूयान्न वचनादिहैव सर्वान्प्रैषान्ब्रूयादित्यादेशग्रहणं २

श्रौ० सू०

~~८४~~
१०३

103

तेन नायतेव्यवायप्रतिषेधसूत्रं सर्वार्थमिति। अनुवाक्यां च सप्रैषो ब्रूयात् प्रैषात्। अनुवाक्यां
ब्रूयादिति शेषः। पर्यग्निस्तोकमनोतानीयमानसूक्तानि च। एवं भूतं मैत्रावरुणानुकर्षणा
र्थश्च शब्दः। सोम आसीनो ऽन्यत्। उक्तेभ्यो यदन्यन्मैत्रावरुणस्य सोमे कर्मास्ति तदासीनो ब्रू
यात्। सोमे ऽप्येतानि तिष्ठन्नेव ब्रूयादित्यर्थः। १। एकादश प्रयाजाः। पशावेकादश प्रयाजा
इति नियम्यते सर्वत्र सर्वेषां। तेषां प्रैषाः। तेषां प्रयाजानां प्रैषा अपि भवंति ते चैते इत्याह।
प्रथमं प्रैषसूक्तं। उक्तं द्वितीये। यदुक्तं प्रकृतौ वसिष्ठादीनां नराशंसः इतरेषां तनूनपा
दिति। तद्वद् प्राकृतेषु प्रैषेष्वपि स्यादित्येवमर्थं सूत्रं। अध्वर्युप्रेषितो मैत्रावरुणः प्रे
ष्यति प्रैषैर्होतारं। एवं सति होत्रा नाध्वर्योः प्रैष आकांक्षणीय इत्यर्थः। होता यजत्याप्री
भिः प्रैषसलिंगाभिः। होतृग्रहणं मैत्रावरुणाधिकारात्प्रैषसलिंगाभिरित्याप्रीष्वपि तन्

~~८४~~
१०३

२

नपान्नराशंसविवेकः कर्तव्य इत्यर्थः। समिद्धो अग्निरिति शुनकानां जुषस्व नः समिधमिति
वसिष्ठानां समिद्धो अद्येति सर्वेषां। वसिष्ठशुनकानामुक्त्वा विधीयमानत्वात्तद्वर्जानां सर्वे
षामिति गम्यते। जामदग्न्यमिदं त्वाप्रीसूक्तं नागस्त्यं। आम्नायक्रमानुगुण्याद्वासिष्ठवि
ध्युत्तरकालिकत्वाच्चास्य विधेः। तत्रात्र्यादीनां नाराशंस्येव वासिष्ठी आहर्तव्या प्रैषसलिं
गाभिरित्यक्तत्वात्। एवं प्राजापत्येपि पशौ वसिष्ठादीनां नाराशंस्येव। यथर्षि वा यो
यस्यर्षिस्तद्वानुगुण्यं यथर्षिशब्देनोच्यते। तथा चाप्रीसूक्तं ग्रहीतव्यं। स्वीयर्षि
नामधेयस्यानुगुण्या आप्र्यः कर्तव्या इत्यर्थः। तत्र भगवता शौनकेन यथर्षिपक्षे आ
प्रीविवेकार्थमेव श्लोक उक्तः। कण्वोंगिरोगस्त्यः शुनको विश्वामित्रोत्रिरेव च। वसिष्ठः
कश्यपो वाध्यश्वो जमदग्निरथोत्तमः। तत्र दशानां सूक्तानां प्रथमं कण्वानां सं समिद्धो

वरुणोऽग्निर्होतानऽइति त्वं च पर्यग्नये व्याह।। कालो १ देवान् देवेभ्यः प्रेषितोऽपि ब्रूयादिति प्रेषितवचनं मैत्रा ८

श्रौ० सू० ३ नऽआवहेति। द्वितीयं तद्धर्जानामांगिरसां सामिधेनीषु अग्नऽआवहेति। तृतीयमगस्तीनां सामिधेनीषु अ
१०४ घराजसीति। चतुर्थं शुनकानां सामिधेनीषु अग्निर्निहितः पृथिव्यामिति। विश्वामित्राणां पंचमं
समिद्धं सामिधेनीष्वक्रमनाऽइति। अत्रीणां षष्ठं सामिधेनीषु धायद्योचिषऽइति। वसिष्ठानां सप्तमं जुषस्व
नः समिधमग्नेऽअद्येति। अष्टमं कश्यपानां सामिधेनीषु विश्वतस्पानिरिति। वाध्र्यश्वानां नवमामि
मां मेऽअग्ने समिधं जुषस्वेळस्पदऽइति। शुनकवाध्र्यश्ववर्जितानां भृगूणां दशमं सामिधेनीषु अ
र्यमनुषोऽडरोयाऽइति। यथार्षपक्षे विवेकोऽयं। प्राजापत्ये तु जामदग्न्यः सर्वेषां तु शब्देनात्र व
सिष्ठशुनकसहितानामिति विशेषो लभ्यते। दशसूक्तेषु प्रेषितो मैत्रावरुणग्रहणमुत्तरार्थं।
पर्यग्नयऽइति परितः क्रियमाणमग्निमभिधातुमित्यर्थः। अध्रिगवे प्रैष्य होतरिति वा क्वोऽजे ष्योपप्रे
दग्निरसनद्वाजमिति प्रेषमुक्त्वान्तर्वेदिदंडं निदध्यात्। मैत्रावरुणग्रहणं द्वितीयेऽपि संप्रैषे १०४

मैत्रावरुण एव ब्रूयादित्येवमर्थं। प्रैषपाठस्तु होतृलिंगविहितत्वात्। पूर्वस्य तु पाठः परिसंख्या
भयात्। प्रैषवचनं प्रैषमित्येकवचनं न विवक्षार्थं। तदविवक्षया प्रैषैक्यासिद्धिद्वारेणानवानमस्य
साधितं भवति। इदानीं दंडनिधानवचनान्न पूर्वं निधातव्य इति गम्यते। अध्रिगुं होतोहन्नं
गानि दैवतं पशुमिति यथार्थं। अध्रिगुरिति दैव्याः शमितार आरभध्वमित्यस्य मंत्रस्य ना
मा मैत्रावरुणाधिकारात् होतृग्रहणं। ऊहन्नित्यभिधेयवशेन वचनानि संनमयन्नित्यर्थः।
अंगानीति वचनमध्रिगोअंगादीनां शब्दा एवोह्यंते नान्ये बर्हिर्मात्रपितृशब्दादय इति ज्ञा
पनार्थं। यथार्थमिति यो यस्य शब्दस्यार्थस्तं तथोहन्ब्रूयादित्यर्थः। ऊहन्नित्यनेनैवास्मिन्नर्थे
सिद्धे यथार्थमिति वचनं संव्यवहारार्थे यमूहस्य संज्ञेति ज्ञापनार्थं। पुंवन्मिथुने। मिथुनमिति
स्त्रीपुंसयोः समाहार उच्यते। अस्मिन्समाहारे पुंलिंगेनैवोहः कर्तव्य इति नियम्यते। मेधं
भाष्यं तु यथार्थवचनं यत्र प्राकृत एव शब्दो वैकृतमर्थमभिदधाति न तत्रोह इत्येतदर्थकमित्युक्तं तन्मते उदीचीनानित्यस्य नोहः॥ २

१स्त्रीदेवतायांमेधपत्यैइत्यादिऊहंतमपिभवतीतिभाष्ये।विभक्त्यंतरेणानिर्देशः त्रिष्वपिवचनेषुपुंवदेवप्रयोगार्थइतिदेवत्रातः॥१

श्रौ॰सू॰२ पती।अयंशब्दोदेवतावाचीतस्यस्त्रीप्रत्ययांतस्यायंनिर्देशःकृतः।तेनायमपिपदार्थोदेवतावा

१०५ चिनःस्त्रीप्रत्ययसंबंधादस्मिंस्तंत्रेलभ्यते।स्त्रीदेवतेति।सचस्त्रीदेवतेतिपदार्थोऽस्मिंस्तंत्रे

पुंवद्वचनस्याविधीयमानत्वात् स्त्रीदेवतायामभिधेयायामित्यर्थात्।कल्प्यतेमेधपतिश

105 ब्दप्रातिपदिकंचपुंवद्वचनस्यविषयत्वेनेत्येवंसंप्रदायाविच्छेदादवगम्यते।अतएवंसू

त्रार्थः।स्त्रीदेवतायांमेधपतिशब्दंपुंवत् ब्रूयादिति।एवंव्याख्यायमानेस्मब्राह्मणमनुस्म

तंभवति।अथोखल्वाहुर्यस्यैवावकस्येचेत्यादि।मेधायांविकल्पः।मेधशब्दात्पशुवाचि

नःपरस्त्रीप्रत्ययःपूर्ववत् स्त्रीपशावितिनिगमयति।तेनस्त्रीपशौमेधशब्दंपुंवद्वास्त्री

वद्वाब्रूयादितिविकल्पोऽत्रविधीयते।यथार्थमूर्ध्वमाध्रिगोरन्यन्मिथुनेभ्यः।अध्रिगोरूर्ध्वं

यथार्थमूहोभवति।मिथुनेतुसर्वत्राध्रिगुवदेवएतदुक्तंभवति।अध्रिगोरूर्ध्वमंगादिशब्दा १०५

अन्ये चार्थवशेनोत्पद्यंते न नियमेनांगादिशब्दा एवेति। मिथुनं तु सर्वत्र पुंवदेवाभिधेयमिति
।सर्वेषु यजुर्निगदेषु। न केवलमयं विधिः पशावेव। कथं तर्हि सर्वेषु यजुर्निगदेषु चार्थवशे
नोहः कार्यः। यजूंष्येवोच्चैः। प्रयोगार्हा निगदा उच्यंते। प्रकृतौ समर्थनिगमेषु। प्रकृताविति
।यस्मिन्कर्मणि अर्थाभिधानार्थो यो मंत्र उत्पद्यते तस्य मंत्रस्य तत्कर्म प्रकृतिः। समर्थो नाम
यथार्थाभिधायी शब्दः। निगमा नाम मंत्राः। उत्पत्तिस्थाने ये मंत्राः यथार्थाभिधायीशब्दवंतः
तेषु विकृतिषूहो भवति। ये तु पुनः प्राकृतावेवायथार्थाभिधायिशब्दवंतः तेषु विकृतावपि
न भवत्यूह इति। प्रकृतावसमर्थनिगमसंभवानुष्ठानान्न प्रकृतावूहो विद्यत इति गम्यते।
उपपन्नमेवेदं। तदर्थाभिधानार्थमेव तस्य मंत्रस्य प्रत्यक्षाम्नानात्तत्र लक्षणया गौण्या वा
भिधानं कल्पनीयं। कस्याः कल्पनाया विकृतावप्यविशेषात्तेषां विकृतावप्यनूह एवेति॥

ऋ१

श्रो०वृ०२ युक्तमुक्तं। प्रतोसमर्थानिगमेष्विति। प्राकृतास्त्वेव मंत्राणां शब्दाः। ऊहे क्रियमाणे मंत्राणां प्राकृ

१०६ ता एव शब्दा भवेयुः। एतदुक्तं भवति। यदि प्रकृतौ छांदसं प्रातिपदिकं स्यात्तदा तस्मादेव विभ

क्त्यूहः कर्तव्यो न प्रातिपदिकसंस्कार इति। तुशब्देन न्यायविरुद्धोयमर्थ इति दर्शयति। ऊह

स्यास्मदायत्तत्वसंयोगत्वात्। भाषिकत्वमेवेति न्यायविरुद्धमपि असमर्थेष्वन्यूहवचनं

छांदसस्यापि प्राकृतस्यैव शब्दस्य ग्रहणमित्यक्रमयं ग्रहीतव्यमेवेति एवमर्थं तु शब्दं प्र

युक्तवांस्त्वयमेवाचार्यः। प्रतिनिधिष्वपि। प्राकृता एव शब्दा इति वर्तते। नाभिरूपमामे

दोहविरिस्यन्त्यानि। यथा कथंचित्साधानां प्रतिषेधोयं। उपमेत्यक्रपमार्थः। श्येनादयः

शब्दा गत्वंते॥२॥ देव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या उर आशासा

नामेधपतिभ्यां मेधं। प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु

१०६

माता सगर्भ्योनु सखा सयूथ्यः। उदीचीनां अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयतात्वातं प्राणम
न्ववसृजतादंतरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरं। एकधास्य त्वचमाछ्यतात्पुरानाभ्या
अपिशसो वपामुत्खिदतादंतरेवोष्माणं वारयध्वात्। श्येनमस्य वक्षः कृणुतात्प्रशसा बा
हू शला दोषणी कश्यपेवांसाछिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्र
यस्ता अनुष्ठ्योच्यावयताद्गात्रं गात्रमस्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्॥
अस्नारक्षः संसृजतात्। वनिष्ठुमस्य माराविष्टोरूकं मन्यमनाने द्वस्तोके तनयेरविता रव
छमितारः। अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा उ अपापा अयमध्रिगुः॥
अत्रोत्थानि पदानि वक्ष्यंते मेधपतये मेधपतिभ्यां मेधपतिभ्यः। मेधं मेधौ मेधान्। मेधां।
मेधे मेधाः। एवं वा। अस्मै। आभ्यां। एभ्यः। अस्यै। आभ्यां। आभ्यः। एनं। एनौ। एनान्। एनां। एने।

श्रो० वृ० २
१०७

एनाः। अस्य। अनयोः। एषां। अस्याः। अनयोः। आसां। शरीरं। शरीरे। शरीराणि। त्वचं। त्वचौ। त्वचः।
वपां। वपे। वपाः। वक्षः। वक्षसी। वक्षांसि। प्रशसा। प्रशसः। बाहू। बाहून्। दोषणी। दोषाणि। अंसा। अंसान्। अछिद्रे। अछिद्राः। श्रोणी। श्रोणीः। ऊरू। ऊरून्। अष्ठीवंता। अष्ठीवतः। वनिष्ठुं। वनिष्ठू। वनिष्ठून्। इत्येव मूहः। मेधं। सपूथ्यः। शरीरं। वारयध्वात्। अनूनं कृणुतात्। खनतात्। सृजतात्। शमितारः। अध्रिगाउ अपापा इत्येतान्यवसानानि। तत्र श्लोकः। मेधं सयूथ्यश्च शरीरमध्वादनूनं पूर्वं कृणुतात्खनतात्। सृजता शमितारो ध्रिगाउ अपापएते ध्रिगो मध्यविरामदेशाः। अस्नारक्षः संसृजताच्छमितारो पापे स्फपांशु। एते त्रयः शब्दाः स्वेस्वे स्थाने उपांशु प्रयोक्तव्याः। शमितार इत्येतयोर्मध्ये पाठात् तन्मध्यगत एवो पांशु भवति नान्यः। एकधा षड्विंशतिरितिद्विर्द्विबहूनां। द्विबहूनां पशूनां संबंधिनावेतौ शब्दौ द्विर्ब्रू

१०७

द्विपंचाशत्।अभ्यास सप्ततिरित्येवं प्राप्तेभ्यासो विधीयत इति देवत्रातः।१।

यात्।विभक्त्यूहसमैस्यवचननिवृत्त्यर्थं एकधा षड्विंशतिशब्दस्याभ्यासो नियम्यते।पुरांतरितिचेत्।
अध्रिगवादित्रिरुक्त्वा शमितारो यदत्र सुकृतं कृणवथास्मासु तद्यद्दुष्कृतमन्यत्र तदितिजपित्वा
दक्षिणावृदावर्तते।अध्रिगो शमीध्वमित्यादिजपापांतं त्रिरुक्त्वा शमितार इत्यादि जपित्वा
दक्षिणावृदावर्तते।दक्षिणावृद्वचनं विहाराद्व्यावृत्तिरिति प्राप्तमनूद्यते।एतं मंत्रं जपित्वे
दमेव कुर्यात्।नान्यत्किंचित् दक्षिणावृत इत्येवमर्थं।उक्तेन प्रकारेणावृत्य पृष्ठतः कृत्वा
सीत।मैत्रावरुणश्च।मैत्रावरुणश्चैवमावृत्य पृष्ठतः कुर्यात्।सव्यावृतौ ब्रह्मयजमानौ॥
संज्ञप्ते पशावावर्तेरन्।पुनरावर्तनकालोयं।तस्मादेतावंतं कालं पराञ्च एवासीरन्॥२॥
वपायां श्रप्यमाणायां प्रेषितः स्तोकेभ्योन्वाह जुषस्व सप्रथस्तममिमं नो यज्ञमिति।वपा
यां श्रप्यमाणायामिति वचनं श्रप्यमाणवपासंबंधिस्तोकाभिधानोनुवचनेन वपैवसं

श्रौ० वृ० २ स्क्रियन्त इति ज्ञापनार्थं। प्रेषितवचनं प्रैष एवास्यानुवचनस्य निमित्तं। नावसरविशेष इत्येवम

१०८ र्थं॥ उक्तमाज्ञापनं स्वाहाकृतिभ्यः। स्वाहाकृत्यर्थमत्र स्रुगाज्ञापनं कर्तव्यं। तेन माध्यंदिनेस

वने प्राजापत्येषु स्तोकानंतरं स्वाहाकृत्यभावादाज्ञापनं न कर्तव्यं भवति॥ एतदप्यत्रावग

108

म्यते स्रुगाज्ञापनं प्रयाजार्थमेवेति। तेनाज्यभागप्रभृतिषु हविराहुतिषु चैतन्न स्यात्। प्रभृति

होता यक्षदग्निं स्वाहाज्यस्य स्वाहा मेदस इति प्रैष उत्तमाप्रीयाज्या॥ दशासूक्तेष्विति वच

ना उत्तमप्रैषो विशिष्टः स्वाहाकृत्यर्थः। तदर्थमेवाप्रीचावशिष्टा॥ किमित्यत्रोभयोर्वचनं।

आप्रीवचनस्येदं प्रयोजनं। उत्तमैवाप्रीयाज्या नात्र देवतावचना स्वाहामुं स्वाहामुमिति

प्राकृताभिगंतव्येति। प्रैषवचनं विस्पष्टार्थं। वपापुरोळाशो हविरिति पशोः प्रदानानि।

प्रदानानीति यागा इत्यर्थः॥ पश्चावेतद्द्रव्यसंबंधिनस्त्रयो यागाः कर्तव्या इत्यर्थः। तेषां

प्रदानानीति संज्ञा। पश्वावित्यधिकारे पशोर्वचनं पशोः पशोरिति वीप्सार्थं। तेनैकदेवत्ये
षु बहुषु पशुषु प्रतिपशुषु प्रति पशु वपा हविर्भेदवत्पुरोडाशभेदः सिद्धो भवति। ता
नि पृथग् नानादेवतेषु। एकदेवत्ये एकस्मिन्नपि पशौ वपापुरोडाशहविषां प्रैषयाज्यानु
वाक्याभेदात्पृथक्भावः सिद्धः परस्परं। तथा नानादेवतेषु पशुषु वपायागानां पृथ
क्भावः सिद्धो याज्यानुवाक्याभेदादेव। तथा पुरोडाशानां हविषामपीति पृथक्भा
वस्याविधेयत्वादेकदेवतेषु वपानां सकृद्यागः तथा पुरोडाशानां हविषामपीति व्यति
रेक एवात्र विधातव्यः। नानीति वचनं योगविभागार्थं। तेनैकदेवतेष्वपि वपादीनां प्र
दानत्वं भवति। एकयोगत्वे नानादेवतेष्वेव तेषां पृथक्प्रचारवत्पृथक्प्रदानत्वमपि
स्यात्। योगविभागे सति पूर्वेण सर्वेषां प्रदानत्वमुत्तरेणैकदेवतेषु सहप्रचार इत्युक्तं।

मनोतां च। अवदीयमानहविरर्थत्वान्मनोताया नानादेवतेषु पृथक्प्रचारेसत्स्ववदानस्यभ्या
गमवचनान्नानापशु मनोतामंत्रमावर्तयेत्। नमनोतावर्ततेत्येके। एके आचार्या मनोता
नावर्तयितव्येत्याहुः। मनोतावेत्येतावताविकल्पोऽसिद्धेगुरुसूत्रकरणंन्यायविकल्पोयमि
ति प्रदर्शनार्थं। तत्रैके मन्यंते आग्नेयत्वान्मंत्रस्य त्वंह्यग्ने प्रथमो मनोतेति मनोताशब्दस्या
ग्नौ प्रवृत्तिदर्शनात्। अग्निर्वै देवानां मनोतेतिश्रुतेः। संप्रैषे च हविः शब्दस्य मनोताकाल
लक्षणार्थत्वेनापि संभवादनुवचनस्याग्न्यर्थत्वं। अग्न्यर्थत्वे च यागावृत्तावप्याहवनी
याख्यस्याग्नेरभेदेनानावृत्तिरेवेति। आचार्यस्तु पशोर्वा आलब्धस्य मनोपक्रामति मनो
तायै हविषोवदीयमानस्यानुब्रूहीत्याह मनएवास्यावरुंध इतिश्रुतिः। तस्या अयमर्थः।
पशोरालब्धस्य संज्ञपनकाले जीवोपक्रामति स एव मनः शब्देनोच्यते। यत्ते यमं वैवस्वतं

मनोजगामहृत्कमित्यादिषुजीवेमनःशब्ददर्शनात्।जीवेऽग्निशब्दश्चदृश्यते।अहंवैश्वा
नरोभूत्वाप्राणिनांदेहमाश्रितः॥प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधमितिभगवद्गी
तासुदर्शनात्।अग्निजीवमनसामेकार्थत्वंचदृश्यते।अयंहोताप्रथमःपश्यतेममितिह्
चेः।अतोऽवदीयमानहविषोमनोतायाअनुब्रूहीत्युक्तेअग्निजीवाख्यस्यमनसोहविःसं
बंधार्थमनुब्रूहीत्युक्तंभवति।अतोऽग्निंप्रकाशयन्अनुवचनंहविषोजीवमेवप्रकाश
यतिहविरर्थमेवेतिगम्यते।तेनयागावृत्तौअवदानस्यपदार्थांतरव्यवधानात्सतिहविर्म
नोतानुवचनावृत्तिंमन्यते।अत्रनकाचित्क्षतिरस्तीतितमेवपक्षंपरिगृहीतवानाचार्यः।
तेषांसलिंगाःप्रैषाः।तेषांप्रदानानांसमानलिंगाःप्रैषाःप्रैषसमाम्नायएवपठिताःतदर्थ
त्वेनैवसमानलिंगाःसमानदेवताइत्यर्थः।तेनैतत्साधितंभवति।यद्दैवत्यःपशुस्तद्दैवत्यः
॥

पशुपुरोडाशो भवतीति ॥ तेषामिति वचनं तेषामेव संप्रैषत्वं नाज्यभागयोरित्येवमर्थो प्रैष
समाम्नायः क्रत्वर्थत्वात्तत्र चाज्यभागयोः संप्रैषस्यानाम्नानात् अप्रैषावेवेति मन्यमानस्ते
षामित्युक्तवानाचार्यः । यद्यध्वर्यवः संप्रैषौ कुर्युः तदा होता यक्षदग्निमाज्यस्य जुषतां हवि
र्होतर्यज । होता यक्षत्सोममाज्यस्य जुषतां हविर्होतर्यजेत्येतौ प्रैषौ भवतस्तदाज्यभागयोः ॥
तेष्वग्नीषोमयोः स्थाने या या पशुदेवता । तेषु प्रदानप्रैषेषु पश्वन्तरेष्वतिदेशात्प्राप्तेषु या
स्तासु विकृतिषु देवतास्ता सामेकैकामेवाग्नीषोमस्थाने निर्दिश्य यष्टव्यं न सर्वा देवताः
सकृदेव निर्देष्टव्याः । यावत्यस्तत्र देवतास्तावत्कृत्वः प्रैषोभ्यासितव्य इत्यर्थः । एतदर्थमेव
या या पशुदेवतेति वीप्सावचनमुक्तं । अयमर्थोस्मिन्सूत्रे सम्यग्भुत्यादितो ग्नीषोमयोः स्था
न इति ब्रुवताचार्येणाग्नीषोमीयः पशूनां प्रकृतिः पाशुके विध्यंते ग्रहत्स्यमाण इति । छागस्ता

नउस्रोगोमेषोविकोहयोश्वोन्वादेशोव्यक्तचोदनां। गोमेधहयानामेकैकस्याजातेर्द्वौद्वौश
ब्दौनियम्यतेवैकल्पिकौ। एतदुक्तंभवति। गोजातिश्चेत्पशुश्छागस्थानेगोशब्दमुस्रशब्दंवा
प्रयुंजीत। एवमितरयोरपिजात्योः॥ प्राप्तिकोयंविधिः। कुतः। अन्वादेशोव्यक्तचोदनां। औप
देशिकस्यमंत्रस्यप्रकृतौप्रयोगः आदेशः तस्यैवातिदेशप्राप्तस्यविकृतौप्रयोगोन्वादेशः॥
व्यक्तचोदनाप्रकृतिप्राप्तस्यमंत्रस्यविकृतौसंस्कृत्यपुनःपाठः। यथाप्रजापतयेश्वस्यतूप
रस्यगोमृगस्येत्येवमादि॥ तत्रतामनुस्त्यैवमंत्राःप्रयोक्तव्याः। एतदुक्तंभवति। अतिदे
शिकमंत्रप्रयोगेयस्मात्विकृत्यपदेशमनुसृत्यैवमंत्रःप्रयोक्तुंयुज्यते। तस्माद्विकृत्युपदे
शेसतिसएवभवति। तदभावेगोशब्दः उस्रशब्दोवेत्येवंद्रष्टव्यं। एवंवनस्पतिस्विष्टकृत्स्व
कवाकप्रैषेषु। यथाप्रधानप्रैषेषुदेवताशब्दस्यस्थानेपशुशब्दस्यचस्थानेएकैकंदेवता

शाबंपशुशाबंचकृत्वाप्रयोगउक्तः। एवंवनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषुप्रयोगःकर्तव्यः।
तत्रायंविशेषः। नानादेवतेष्वपिपशुषुयत्राग्नेरित्यादेःप्रियाधामान्यंतस्यायाळादेस्तदंत
स्यानभन्नमुष्माअमुमित्यस्यचत्रिषुप्रैषेषुअभ्यासोनसर्वस्यप्रैषस्येति। प्राजापत्ये
त्वाग्निचित्यासंयुक्तेवायव्यंपशुपुरोळाशं। एकेवायव्यप्राजापत्ये। तेनपशुदेवतावर्धत
इत्याचार्याःपुरोळाशतत्प्रधानत्वात्। अयमभिप्रायः। प्रकृतावग्नीषोमीयपशौसमा
नदेवतत्वात्पुरोळाशयागस्यपशुदेवताप्रत्यभिज्ञानात्तत्संस्कारद्वारेणतदर्थतायुक्ता।
अत्रपुनर्भिन्नदेवतत्वात्तदर्थतानयुक्ता। ततश्चसूक्तवाकप्रैषेपुरोडाशेनपशुदेवता
वर्धनमयुक्तमित्याशंकानैवकर्तव्या। प्राजापत्येपिपशौप्राकृतकार्यार्थतयैवपुरोडाश
यागोपिप्राप्तएव। एवंपशुयागार्थतयाप्राप्तस्यदेवतांतरंविधीयमानंप्राकृतदेवताका

र्थकरणत्वेनैवविधीयते। तत्रयच्छब्दभेदाद्प्रत्यभिज्ञानमाशंक्यतेतदपिनैवाशंकनीयं।
तदर्थकएवायंशब्दःप्रयुक्तइत्यवगम्यते। ऐंद्र्यागार्हपत्यमितिवद्भविष्यतीति। तेनपशुदे
वतावर्धतइत्याचार्याःपुरोडाशनतस्यप्रधानत्वादितिवदतःसूत्रकारस्येति। अयमेवार्थःश्रु
तौचोद्योत्तरभंग्योपपादितः। तदाकुर्याद्अन्यदेवत्यउतपशुर्भवतीतिएवमादिनापवमानः
प्रजापतिरित्येवमंतेन। पुरोडाशानिगमेषुपुरोडाशवत्स्वेष्वाज्यवर्जयेषांतेनसमवत्त
होमः। यस्मिन्ननेकपशुतंत्रेपुरोडाशस्यस्थानेपुरोडाशंचवाज्यधानारंभपरिवापामिक्षा क
दयोविहिताः तत्रस्विष्टकृतितेषांसर्वेषांसमवदायप्रचारोविहितश्चतत्रपशुपुरोडाश
स्विष्टकृत्प्रैषेसूक्तवाकप्रैषेपशुपुरोडाशेनदेवतावर्धनेकर्तव्येसभ्तिप्रकृतौपुरोडाश
स्यपुरोडाशत्वात्तेनैवशब्देनवर्धनंकृतंइहतुनानारूपत्वात्एषांस्वेनस्वेनैवशब्देननि

गमने आग्नेपुरोडाशशब्देनैव चर्वादीनां निगमनं विधीयते। सवनीयानां त्विष्टकृत्प्रैषे सोमि
केसूक्तवाकप्रैषे चास्य छात्रिन्यायस्य दृष्टत्वादेवमुक्तं। आज्यस्य तु तत्राभावाददृष्टः प्रयोग
इति तस्य स्वशब्देनैव निगमनं भवति। आज्यस्य तु पुरोडाशत्वसंभावनैव संदिग्धा। यद्यसं
भवः तदाज्यवर्जमिति अयमभावानुवादः यदि संभवति तदा स्वशब्देनैव निगमनमाज्यपु
रोडाशानामाज्यपुरोडाशैरिति। मेधोरभीयानीति पश्वभिधाने। मेधोरभीयानित्येते पदे प
श्वभिधाने पशोरभिधायके इत्यर्थः। मेधपदस्य विधानं प्रथमप्रयुक्तत्वादस्मै एनमित्ये
वमादीनां प्रदर्शनार्थं। रभीयानित्यस्योपमार्थत्वशंकानिवृत्त्यर्थं। पश्वभिधाने आदद्घसत्
इति पाठः कर्तव्यः। प्रगृह्यत्वादस्य पदस्य। आदद्घसत्करज्जुषतामद्यदग्रभीदवीवृधतेति
देवतानां। एतेषां पाठो द्विवचनान्तानामाम्नायसिद्धत्वादेकवचनबहुवचनयोरिष्टलकार

परिग्रहार्थौ। आदत्त आदन्। घसत् घसन्। करत् करन्। जुषतां जुषंतां। अघत्। अघैन्। अज स्त।
ग्रभीत्। अजग्रभीषुः। अवीवृधत् अवीवृधंत॥४॥ कृतायां वपायां सब्रह्मकाश्चात्वाले मार्ज
यंते निधाय दंडं मैत्रावरुणः॥ अस्मिन्नवसरे चात्वाले मार्जयंते। बहुवचनेनैव सर्वेषां मा
र्जने सिद्धे सब्रह्मकवचनमस्मदीयाः सर्वे सह मार्जयेयुः। न पृथक् पृथगित्येवमर्थं। दंडं
निधानवचनं स्तोकानुवचनार्थमात्तस्य दंडस्यात्रैव निधानं न प्रागित्येवमर्थं। इदमापः
प्रवहत सुमित्र्यान आप ओषधयः संतु दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्म इति
इदमापः प्रवहतेत्यनयर्चा यजुषा चोभाभ्यां मार्जनं कर्तव्यं। एतावन्मार्जनं पशौ॥ एताव
देव मार्जनं। नातिदेशिकं कर्तव्यमित्यर्थः। पश्वधिकारे पुनः पशाविति वचनं पश्वंगभूता
यामिष्टौ आतिदेशिकस्य मार्जनस्य प्रवृत्त्यर्थं। तीर्थेन निष्क्रम्यासीतामा पुरोडाशश्रप

श्रौ०सू०३ ननु भोजनादीनि भावे १

११२

णात्। अस्मिन्नवसरे नियममेनैवं कर्तव्यं। तेन चरित्वा स्विष्टकृता चरेयुः। चरित्वेति प्रकृते चरे
युरिति वचनं प्रधानस्विष्टकृतोर्भेदप्रतिपत्त्यर्थं। अतोन्वायात्यानां प्रवेशे सति तयोरेव मध्ये
प्रवेशः सिद्धो भवति। यदि त्वन्वायात्यानि तैरग्रे चरेयुः। यद्यस्मिन्नवसरे आगंतवो यागा उ
त्पद्यंते तैः पशुपुरोडाशस्विष्टकृतोग्रे चरेयुः। तेषामन्वायात्यानीति संज्ञा। एतदुक्तं भवति।
यदि पुरोडाशस्विष्टकृतोग्रे यैः कैश्च न यागैश्चरेयुः तान्यन्वायात्यानीति तेषामियं संज्ञा
विधीयते। चरेयुरिति पुनर्वचनं चरणमेवैषां कर्तव्यं नान्यन्निगमनादीति सूचनार्थं। त
देवोत्तरेण सूत्रेण विस्पष्टयति। न तु तेषां निगमेष्वनुवृत्तिः। अन्वायात्यदेवतानां हविषां
च आवाहनादिषु निगमेष्वनुवृत्तिर्नास्तीत्यर्थः। नान्येषामूर्ध्वमावाहनादुत्पन्नानां। अ

न्ये

न्वायात्येभ्योन्येषामपि आवाहनकालादूर्ध्वं हविरादि सर्वमुत्पद्यते येषां तेषामपि निगमेष्व ११२

५×हविषाचरंति। तेषांसल्लिंगाः प्रैषाः इतिप्रैषपुरुकः। तत्रप्रैषेकरत एवाग्नीषोमावेवमि
त्येतरेइणः। ६

नुवृत्तिर्नास्तीत्यर्थः। इळामग्नेपुरुदंससंसनिंगोर्होतायक्षदग्निंपुरोळाशास्यस्वदस्वहव्यास
मिधोदिदीहीतिपुरोळाशस्विष्टकृतः। पुरोळाशयोः पुरोळाशानामितिहविर्भेदेप्रैषऊह्यः। ऊ
र्ध्वमिळायाः॥५॥ मनोतायैसंप्रेषितस्त्वंह्यग्नेप्रथमइत्यन्वाह। अत्रेळामुपहूयमानोता
मन्वाह। प्रेषितवचनमुक्तप्रयोजनं। तत्रहविःप्रैषेकरतएवाग्नीषोमावित्याम्नातंतस्य
एवशब्दस्यस्थानेएवमित्येतरेयिणआम्नायविवक्तव्यमित्याहुः। किमविशेषेणनेत्युच्य
ते। अन्यत्रद्विदेवतासशोरेकदेवतेबहुदेवतेचपशावित्यर्थः। द्विदेवतेचमैत्रावरुणदेव
तेएवमितिवदंति। मित्रावरुणौदेवतायस्यपशोः समैत्रावरुणः पशुः। अत्रमैत्रावरु
णशब्दस्यमुख्ययावृत्त्यादेवताप्रतिपादनासंभवाल्लक्षणयाप्रतिपादयति। अतस्ते
नशब्देनव्यंजनादिर्द्विदेवत्यःपशुर्लक्ष्यते। तस्मिंश्चेत्यर्थः। एतल्लक्षणाग्रहणंशास्त्रां

४×अन्यत्रद्विदेवतान्मैत्रावरुणदेवतेच×४

श्रौ० सू० २ ११४

तद्दर्शनाल्लभ्यत इत्युक्तं भाष्यकारेण। अत्र कारणमाह। तथा हि दृष्टत्वात्। प्रैषेष्वेकदेवतेषु ब

हुदेवतेषु च व्यंजनादिष्विद्वि देवते च तथा दर्शनात्तेमन्यंत इत्यर्थः। प्रकृत्या गायागारिः। तत्र हे

तुमाह। उत्पन्नानां स्मृत आम्नाये नर्थभेदे निरर्थो विकारः। संप्रदायाविच्छेदेनाभ्यस्यमाने

आम्नाये दृश्यमानानां पदानामर्थवशेनानुत्पन्नानां सतां विकार इत्येतं निःप्रयोजनमित्य

र्थः। उपन्यासप्रयोजनं एवंविधानां सामान्यतो दृष्ट्या भ्रांतिः क्वचिदपि न कर्तव्येति। या

ज्यायाअंतरार्धर्चे वैवसाहोमआरमेत। वसाहोमार्थं तत्रावसायनोत्तरमाददीतावसा

नस्य तदर्थत्वात्तस्मिन्कृते समापयेत्। वनस्पतिनाचरंति। प्रैषमभितो याज्यानुवाक्ये।

प्रैषसामाम्नाये यो वनस्पतिप्रैषः। तमभितो ये ऋचावाम्नाये ते ते वनस्पतेर्याज्यानुवा

क्ये भवतः। प्रैषसमाम्नायपठिते पियाज्येति समाख्यातत्वाद्धोत्रैव वक्तव्या। यत्राग्नेरा

ज्यस्य हविष इत्य त्राज्यभागौ। यद्याज्यभागौ क्रियेते तदा तस्मिन्प्रैषे प्रधानदेवतावद्देवौ नि
गमयेदित्यर्थः। एतं एतौ एतान्। एतां एते एताः। रभीयांसं। रभीयांसौ रभीयसः। रभीयसीं र
भीयस्यौ रभीयसीः। अयाड्ग्निरग्नेराज्यस्य हविष इति स्विष्टकृति। इद्धामुपहूयानुया
जैश्चरंति। इद्धामुपहूयेति वचनमानंतर्यार्थं। तेन प्रकृतिप्राप्तं दक्षिणाप्रतिग्रहाद्यत्र ना
स्तीति गम्यते। तेषां प्रैषास्तु तीयं प्रैषसूक्तमेकादशेह। इह एकादशानुयाजाः। नत्रयः॥
प्रागुत्तमाद्वावा वपेत देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु देवं बर्हिर्वारितीनां वसुवने
वसुधेयस्य वेत्विति। एकादशानुयाजा इत्युक्त्वाद्ययोरेव याज्ययोः पाठात्साकृतीभ्योन्या
वैश्वदेव्या आहर्तव्याः। अनवानं प्रेष्यति। अनवानं यजति। पुनरनवानग्रहणामुत्तरसू
त्रे प्रैषाधिकारनिवृत्त्यर्थं। उक्तमुत्तमे। यदुक्तमनवानं यजति प्रकृत्यावेति तद्याज्यायाए

श्रौ०सू०२

११५

115

वनमेषस्येत्येवमर्थं। पूर्वसूत्रे पुनरनवानग्रहणमिति व्याख्यातं। सूक्तवाकप्रैषे पूर्वस्मिन्नि
गमे गृह्णन्निति तत्राज्यभागौ। निगमाद्धित्वा पूर्वस्मिन्निति विशेषणं। अत्रेति वचनं प्रधानदे
वतावदाज्यभागयोरपि निगमनार्थं। गृह्णन्निति बध्नंश्छन्दस्य प्रत्याम्नायः। बध्नन्नमु
ष्मा अमुं बध्नन्नमुष्मा अमुमिति पशूंश्च देवताश्च। नानादेवता नानाजातीयपशुके
पशुतंत्रे पदद्वयस्याभ्यासलाभार्थं पठितस्यापि पुनरभ्यासपाठः। देवताश्चैवैकपशु
काः। एकपशुका एकजातीयपशुका इत्यर्थः। एकव्यक्तिपशुत्वे देवता इति बहुवचनं नो
पपद्यते। देवता देवता देवतेति तत्रैकशेषः। न ह्येकः पशुर्बह्वीभिर्देवताभिः संबध्यते॥
ननु वैश्वदेवो मारुत इत्यादिः पशुरस्ति॥ सत्यं अस्त्याश्रयभेदः। न तु देवताभेदः। एवं त
त्रविग्रहः। विश्वेदेवा देवता यस्य स वैश्वदेव इति। अतो जात्यभिप्राय एवैकशब्दः॥

यत्रैकजातीयपशुकाऽनेका देवतास्तत्र देवताशब्दमेवाभ्यसेत् नबभ्रन्यशुशब्दौ। पशु
शब्दस्य। यावद्द्रव्यं विभक्त्यूहः कर्तव्यः। बभ्रन्नग्नय इन्द्राग्निभ्यां छागाविति। पशुंश्चैवैकदे
वतान्। अत्र पशुशब्दानेवावर्तयेत् नान्यौ। यथा बभ्रन्प्रजापतये श्वमजं तूपरं गोमृग
मिति। उभयोरेकजातित्वे बभ्रन्प्रजापतये छागानिति नाकिंचिदभ्यसितव्यं। उत्तर आज्ये
नेत्याज्यभागावमुष्मा अमुनेति पूर्वेणोक्तं। पुरोडाशं पुरोडाशौ पुरोडाशान्। तं तौ तान्।
तां ते ताः। पुरोडाशेन पुरोडाशाभ्यां पुरोडाशैः। समाप्य प्रैषमग्नीदंडमनुप्रहरेदनव
भृथे। अवभृथरहिते कर्मणि सूक्तवाकप्रैषं समाप्यानंतरमेवाहवनीये दंडमनुप्रहरे
त्। अवभृथेन्यत्र। अन्यत्रेति सावभृथे कर्मणीत्यर्थः। तत्रावभृथेनुप्रहरेदित्यर्थः॥
कृताकृतं वेदस्तरणं। तीर्थेन निष्क्रम्याग्निपशुकेतनान्यव्यवयंतो हृदयशूलमुपोय

मानमनुमंत्रयेरं ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता। मा त्वा समुद्र उद्वधीन्मा सुपर्णो व्यथमाना पृथिवीं दृंहेति। अथ यं द्विष्यात्तमभिनिरस्येदेति। संस्थाजपान्कृत्वा कतीर्थेन
निष्क्रम्याग्निपरश्रुकेतनान्यव्यवयंतो हृदयशूलमुद्दस्यमानं ध्रुवासीत्यनेन मंत्रेणानुमं
त्रयेरंस्सर्वे कर्तारः। तस्योपरिष्टादपउपस्पृशंति द्वीपेरात्तो वरुणस्य गृहो मितो हिरण्ययः।
स नो धृतव्रतो राजा धाम्नो धाम्न इह मुंचतु। धाम्नो धाम्नो राजन्नितो वरुण नो मुंच। यदापो
अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच। मयि वा पो मोषधीर्हिंसीरतो विश्वव्यचा
भूस्त्वं ततो वरुण नो मुंच। सुमित्र्यान आप ओषधयः संत्विति च। चशब्दः सुमित्र्यान इत्य
स्य कृत्स्नस्य ग्रहणार्थः। तस्योद्दस्यमानस्योपरिष्टादपउपस्पृशंति द्वीपे रात्त इत्यादिभिर्मं
त्रैः। अस्पृष्टा अनवेक्षमाणा असंस्पृशंतः प्रत्यायंतः समिधः कुर्वतीति तिस्रस्तिस्र एकैकः।
अस्पृष्टा हृदयशूलमनवेक्षमाणास्तमेवासंस्पृशंतः परस्परं। प्रत्याव्रजंति। प्रत्याव्रजं

तः सर्वे तिस्रस्तिस्रः समिधो गृह्णीयुः। एकैक इति क्रमेण ग्रहणार्थौ तेन सर्वे न युगपद्गृ
ह्णीयुः। अग्नेः समिदसि तेजोसि तेजो मे देहीति प्रथमां मेधोस्येधिषीमहीति द्वितीयां समि
दसि समेधिषीमहीति तृतीयां। प्रथमा द्वितीया तृतीया ग्रहणानि अभ्याधाने प्रथमं गृहीतां
प्रथमम् अभ्यादध्यात्। एवं द्वितीयां तृतीयामित्येवमर्थानि। एत्योपतिष्ठंत आपो अद्यान्वचारि
षमिति। ततः समिधोभ्यादधति यथागृहीतम् अग्नेः समिदसि तेजो मे दाः स्वाहा। सोमस्य स
मिदसि उरिष्टे मा पाहि स्वाहा। पितॄणां समिदसि मृत्योर्मा पाहि स्वाहेति। तत इति सर्वे
षामुपस्थाने परिसमाप्ते पश्चादभ्याधानारंभार्थौ यथागृहीतमिति ग्रहणं यो यः पूर्वं
गृह्णीयात्स स पूर्वमभ्यादध्यान्न सर्वे युगपदभ्यादध्युरिति। ततः संस्थाजप इति पशुतं
त्रं। पशुमात्रस्यैतत्तंत्रं न पशुविशेषस्येत्यर्थः॥६॥ प्रदानानामुक्ताः प्रैषाः। सर्वत्र प्रदा

सितेजो ५

नानामुक्ता एव प्रैषा भवंति नान्य इति। अतिदेशप्राप्तानां पुनर्वचनं क्वचित्क्वचित्सम्भवविशे
षेतदर्थं तया प्रैषाम्नानं याज्यानुवाक्याम्नानं चास्ति तत्रापि प्रदान प्रैषा एत एव गृहीत
व्या इत्येवमर्थं। तेषां याज्यानुवाक्याः। याज्यानुवाक्या इत्येतावतैव प्रदानानामेवेति सि
द्धे तेषामिति वचनमिति पशव इत्यस्मिंस्तत्रे पशून्विधास्यति तेषां पशूनां याज्यानुवा
क्या वक्ष्यंत इत्येवमर्थं। सर्वेषामग्नेऽग्रेनुवाक्यास्ततो याज्याः। ततो याज्या इत्यनेनाविना
पि शिष्टा याज्या एव भवंति वचनप्रयोजनं सर्वत्र पूर्वप्रोक्ता अनुवाक्याः उत्तरा याज्या
इति ज्ञापनार्थं। तत्र याज्यायाः पूर्वनिपाल्पाच्तरत्वादित्यवगंतव्यं। दैवतेन पशुनाना
त्वं। याज्यानुवाक्यालिंगितदैवतेन वक्ष्यमाणानां पशूनां नानात्वमित्यवगंतव्यं। अग्ने
नय सुपथा राये अस्मानिति द्वे पाहि नो अग्ने पायुभिरजस्रैः प्र वः शुक्राय भानवे भरध्वं

यथाविप्रस्य मनुषोहविर्भिः प्रकारवोमननावच्यमानाः। अग्नेरेताः। अथसरस्वत्याः।
एकाचेतत्सरस्वतीनदीनाम्शुतस्यानः सरस्वतीजुषाणा सरस्वत्यभिनोनेषिवस्यः प्रक्षोद
साधायसासस्त्रएषापावीरवीकन्याचित्रायुर्यस्तेस्तनः शशयोयोमयोभूः। अथसोमस्य।
त्वंसोमप्रचिकितोमनीषेतिद्वे त्वंनः सोमविश्वतोवयोधायातेधामानिदिवियापृथिव्या
मषाहंक्युत्सुपृतनास्रूपाभिंयातेधामानिहविषायजंति। अथपूष्णः। यास्तेपूषन्नावोअं
तः समुद्रइतिद्वे पूषेमाआशाअनुवेदसर्वाः शुक्रंतेअन्यद्यजतंतेअन्यत्स्रपथेपथामज
ह्वे निपूषापथस्प[illegible]थः परिपातिवचस्या। अथबृहस्पतेः। बृहस्पतेयापरमापरावदितिद्वे बृ
हस्पतेअतियदर्योअर्हाद्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवसऋतप्रजाततदस्मासु द्रविणं धेहिचित्रं

श्री०वृ०२ सआनोविश्वआस्क्रागमंतुदेवाविश्वेदेवाः शृणुतेमंहवंमेयेकेचज्मामहिनोअहिमाया

११८

अग्नेयाहिहव्यंमारिषण्यः।अथेंद्रस्य।इंद्रंनरोनेमधिताहवंतइतितिस्रःउरुंनोलोकमनु

118

नेषिविद्वान्ससाहिषेपुरुहूतशत्रून्त्वस्तयेवाजिभिश्चप्रणेतः।अथमरुतां।शुचीवोह

व्यामरुतःशुचीनांनृष्ठिरंमरुतोवीरवंतमावोहोताजोहवीतिसत्तःप्रचित्रमर्कंगृणतेतु

रायाराइवेदचरमाअहेवयावःशर्मशशमानायसंति।अथेंद्राग्न्योः।आवृत्रहणावृत्रह

भिःशुष्मैराभरतंशिक्षतंवज्रबाहूउभावामिंद्राग्नीआहुवध्यैशुचिंनुस्तोमंनवजातम

द्यगीर्भिर्विप्रःप्रमतिमिच्छमानःप्रचर्षणिभ्यःपृतनाहवेषु।अथसवितुः।आदेवोयातु

सवितासुरत्नःसघानोदेवःसवितासहावेतिद्वे।उदीरयकवितमंकवीनांभगंधियंवाजयं

तःपुरंधिमितिद्वे।अथवरुणस्य।अवासिंधुंवरुणोद्योरिवस्थाद्यंसुतुभ्यंवरुणस्वधा

११८

वएवावंदस्वरुणंबृहंतंतत्वायामिब्रह्मणावंदमानइतिद्वेअस्तभ्नाद्यामसुरोविश्ववे
दाइत्येकादशिनाः।अग्नेनयेत्यादयोस्तभ्नाद्यामसुरोइत्येवमंताअग्न्यादिदेवत्याएका
दशषड्चाआम्नाताः।तेश्चैकादशपशवोविहिताभवंति।तेषांसमाहारएकादशि
नीत्युच्यते।तस्यांभवाएकादशिनाइत्युक्ताः।७।अग्नीषोमाविमंसुमेशृणुवमेतानिदि
विरोचनानीतित्यृचावावांमित्रावरुणाहव्यजुष्टिमायातंमित्रावरुणासुशस्त्यानोमि
त्रावरुणाहव्यजुष्टिंयुवंवस्त्राणिपीवसावसाथेप्रबाहवासिसृतंजीवसेनोयद्वंहिष्ठं
नातिविधेसुदानूहिरण्यगर्भःसमवर्तताग्रइतिषट्प्राजापत्याश्चित्रंदेवानामुदगाद
नीकमितिपंचशंनोभवचक्षसाशंनोअह्नावायोभूषशुचिपाउपनःस्रयाभिर्यासिदाश्वां
समच्छानोनियुद्भिःशतिनीभिरध्वरंपीवोअन्नांरयिवृधःसुमेधारायेनुयंजज्ञतूरोदसीमे

मवाशुमच्छा बृहतीमनीषा तव वायष्टतस्पते त्वां हि स्म सरस्तममिति द्वे कुविदंग नमसा ये वृधा
सईशाना यप्रऋतिं यस्त आनड् प्रवो वायुं रथयुजं कृणुध्वमुत त्वामदिते मह्यनेहो न उरु
व्रजेदितिर्द्यजानिष्ठ स्त्रामाणं पृथिवीं द्यामनेहसं मही मूषु मातरं स्म व्रतानामदितिर्द्यौ
रदितिरंतरिक्षं न ते विष्णो जायमानो न जातास्त्वं विष्णोस्म मतिं विश्वजन्यां विचक्रमे पृ
थिवीमेष एतां त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतं
विश्वकर्मन् हविषा वावृधान इति द्वे विश्वकर्मा विमना आद्विहाया: किंस्विदासीदधिष्ठा
नं यो नः पिता जनिता यो विधाता या ते धामानि परमाणि यावमा य इमे द्यावापृथिवी ज
नित्री तन्न स्तुरीपमध पोषयित्नु देव त्वष्टा सविता विश्वरूपो देव त्वष्टर्यद्ध चारुत्वमान
ड् पिशंगरूप: सुभरो वयोधा: प्रथमभाजं यशसं वयोधां सो मा पूषणा जननारयीणामि

तिस्रः कमादित्यानामवसा नूतनेनेमा गिर आदित्येभ्यो घृतस्नूस्त आदित्यास उरवो गभी
रा इमं स्तोमं सक्रतवो मे अद्य तिस्रो भूमीर्धारयन्त्रीँरुत द्यून्न दक्षिणा वि चिकिते न सव्या
मही द्यावापृथिवी इह ज्येष्ठे ऋतं दिवे तद्वोचं पृथिव्या इति द्वे प्र द्यावा यज्ञैः पृथिवी नमो
भिरिति द्वे प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मृळा नो रुद्रोत नो मयस्कृधीति द्वे आ ते पित
र्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीच इति तिस्र आ पश्चातान्नासत्या पुरस्तादा
गोमता नासत्या रथेनेति चतस्रो हिरण्यत्वङ्मधुवर्णो घृतस्नुरभि क्रत्वेन्द्र भूरध ज्मं त्वं
महाँ इन्द्र तुभ्यं ह क्षाः सत्राहणं दाधृषिं तुम्रमिन्द्रं सह दानुं पुरुहूत क्षियन्तं स्तुत इन्द्रो म
घवा यद्ध वृत्रैवा वस्व इन्द्रः सत्यः सम्राड्यद्वाग्वदंत्यविचेतनानि पतंगो वाचं मनसा बि
भर्ति चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवीयमायन्निति द्वे देवीं वाचमजनयं

श्री०वृ०३ १२०

120

तदेवाजनीयंतोन्वग्रवइतितिस्रोदिव्यंस्कपर्यावायसंवृहंतंसवावृधेनर्योयोषणास्कयस्य
व्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठंतआपः।यस्यव्रतेपुष्टिपतिर्निविष्टस्तंसरस्वंत
मवसेहुवेम।अत्राष्टादशपश्वश्चा।आम्नातास्तेश्चाष्टादशपशवोविहिताभवंति।तत्रा
न्यलिंगत्वात्प्राजापत्याइत्युक्तो।इतिपशवः।इत्येतद्याज्यानुवाक्यालिंगकल्पितदेवत्याः
पशवोस्मिन्सत्रेविधीयंते।एतएकोनत्रिंशत्पशवः।निर्मितऐंद्राग्नइत्यस्मिंश्चैकोवि
धास्यते।तेनचसहत्रिंशत्पशवोस्मिन्नध्यायेविहिताः।तत्रैकादशिनानांगणात्मकत्वा
द्गणएवाम्नातोनेकैकशः।पशुस्तेषामेतदुक्तंभवति।एकादशिनीगणरूपेण।आम्ना
ताअग्नीषोमीयादयश्चैकैकश।आम्नाताःनिरूढश्चाम्नातः।अन्येचकेचनास्मिंछा
स्त्रेपशवआम्नातास्तेषुसर्वेषुपौर्णमासमेवतंत्रं।असमाम्नातेष्वर्थात्कल्पनीयंतंत्रं।

१२०

सोम्याश्चनिर्मिताश्च। सोम्याः सोमांगभूता इत्यर्थः। निर्मिताः स्वतंत्रा इत्यर्थः। अस्मिन्नवं
उद्वये पशव आम्नातास्तेषां केचित्सोमांगभूताः केचित्स्वतंत्रा इत्यर्थः। निर्मित ऐंद्राग्नः।
ऐंद्राग्नो यो निरूढो नाम पशुः कर्तव्यः। अयमपि पशूनां प्रकृतिः। तेनांगभूतानामग्नी
षोमीयः प्रकृतिः। स्वतंत्राणां निरूढः प्रकृतिरिति। तेष्वेव पाश्विष्टिर्नांगभूतेष्वित्येव
मर्थं निरूढप्रकृतित्वाम्नानं। षाण्मास्यः सांवत्सरो वा। सोयं निरूढः षट्सु षट्सु मा
सेषु कर्तव्यः। संवत्सरे संवत्सरे वा। अतो वीप्सावचनान्नित्योयं पशुरिति गम्यते। प्राजा
पत्यउपांशु सावित्रसौर्यवैष्णववैश्वकर्मणाश्चैतेषां तत्रोपांशु याज विकारान्व
क्ष्यामः। ऐष्टिकेषूक्तो विकारः पाशुकेषु तंत्रेष्विदानीं विकार उच्यते। प्रैषादिरागुर
स्थाने। आगुरो यः स्वरस्थानमुच्चैष्ट्वं नाम तस्मै षादेरपि भवति। उच्चैरिति वक्तव्ये आ

गुरस्थानमितिवचनमाग्रूःपरिमाणोद्विपद एव प्रैषादिशब्दवाच्य इति ज्ञापनार्थं। आदद्बस
करदिति चैतानियथास्थानमुपांशु। एतानीतिवचनमाददादीनांसप्तानांग्रहणार्थं। यथा
स्थानवचनंसर्वप्रैषपरिग्रहार्थं। चशब्दोविकारसमुच्चयार्थः। कस्यचिदुच्चैष्ट्वविधानात्क
स्यचिदुपांशुत्वविधानादन्यस्यतंत्रस्वरत्वंभवति। तेन प्रधानोपांशुत्वआददादेरन्यदु
च्चैर्भवति। तंत्रोपांशुत्वप्रैषादेरन्यदुपांशुभवतीतिसिद्धं॥८॥ सौत्रामण्यां। सौत्रामणी
तिकर्मनाम। तस्यांविधिर्वक्ष्यत इति संबंधः। आश्विनसारस्वतैंद्राः पशवः। बार्हस्पत्योवा
चतुर्थः। ऐंद्रसावित्रवारुणाःपशुपुरोळाशाः। आश्विनसारस्वतैंद्राणामेते ऐंद्रादयःप
शुपुरोळाशायथासंख्येनभवंति। बार्हस्पत्यस्यतुस्वदैवत एव। अन्यस्याविधानात्। मा
र्जयित्वाशुवंस्करामममाश्विनेतिग्रहाणांपुरोनुवाक्याहोतायक्षदश्विनासरस्वतीमिंद्रंसु
त्रामप्रैषपक्षेएषांऐष्टिकाएवयाज्यानुवाक्याः। यद्यतेषामाहवनादर्वागुत्पत्तिस्तदाआहवायेच्चैदेवताः
पशुपुरोडाशपक्षेतुअनावाहनमेवेतिसिद्धं॥३॥

=स्वि॰भाष्ये॰ ग्रहणामिति बहुवचनात्सोमग्रहाश्च विद्यंते उत्तरत्र भक्षविधानाच्च नसुरायाभक्षोविद्यते प्रैषइति
वचनं प्रैषपाठेनाम्नातत्वात् अथवा स्विष्टकृत्प्रचारेपि स्विष्टकृतोप्ययमेव प्रैषः कथं स्यादिति केचिदध्वर्यवो

ऽत्रामाणं सोमानां सुराम्णां जुषंतां व्यंतु पिबंतु मदंतु सोमान्सुराम्णो होतर्यजेति प्रैषः पुत्रमिव
पितरावश्विनोभेति याज्या। मार्जनं चात्वाल मार्जनं। तत्कृत्वा ग्रहैः प्रचरेयुः ते चाश्विनसार
स्वतैंद्रास्तेषामेता अनुवाक्या प्रैष याज्या उक्ताः। याज्यादीनां त्रिदेवतालिंगत्वात्तैः सह प्रचारः
अग्ने वीहीत्यनुवषट्कारः सुरासुतस्याग्ने वीहीति वा। नानाहि वां देवहितं सदस्कृतं मासं
सृक्षाथां परमेव्योमनि। सुरात्वमसि शुष्मिणीति सुराम वेक्ष्याधोबाहु सोम एष इति सोमं।
अवेक्षेतेति शेषः। नानाहिवामिति कुंभीस्थां सुराम वेक्ष्य ततो बाहू अधोमुखौ कृत्वा ग्रहणा
त्रस्थां सुराम वेक्षेत सोम एष इत्यनेन मंत्रेण क्रयणा त्रिरात्रवासन। दवीकरणा। पावन॥
अथ यद्यपि ऊर्ध्वपात्रसंबंधात्सुरैव सोमशब्देनोक्ता। यदत्र रिप्तं रसिनः सुतस्य यदिंद्रो अपिब
च्छचीभिः इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामीति भक्षजपः। भक्षयेदिति
ग्रहाणां स्विष्टता पृथक् प्रचरंति॰ तत्रापि समाम्नाते याज्येसंयाज्ये। तत्र होता यक्षदग्निं सोमानां सुराणां जुषतां वे
तु पिबतु सोमान्सुराम्णो होतर्यजेति प्रैषः कर्तव्यः। अस्मिंस्तु पक्षे ग्रहाणामनुवषट्कारो न भवति। अनुवषट्

॥ कारस्य स्विष्टकृत्स्थानापन्नत्वात् =

श्रौ०सू०२

१२२

भक्ष

वक्तव्यैंजपइतिवचनंपयोग्रहेष्वपिअस्यमंत्रस्यप्रापणार्थं।प्राणाभक्षोत्र॥८॥अत्रेतिवचनं
स्फराग्रहेष्वेवप्राणभक्षोभवति।पयोग्रहेषुप्रत्यक्षभक्षएवेतिप्रदर्शनार्थं।अस्मिन्कर्मणिके
षांचित्पशुपुरोडाशानसंतिग्रहाएवतेषांपशुपुरोडाशकार्यंभवंतीति।अस्मिन्कर्मणिके
षांचित्प्रैषानसंतितत्रापिमैत्रावरुणएवानुवाक्यांब्रूयात्।यावद्वचनमपोद्यतेइतरत्सर्वप्रकृ
तिप्राप्तमेवावतिष्ठते।आदेशस्तुकर्तव्यएव।प्रैषेसतितत्रैवादेशस्यकृतत्वा[illegible]द्याज्या
यामादेशःप्रतिषेधःकृतः।असतितस्मिन्याज्यायामादेशःकर्तव्यएव।कौकिल्यांतुसौत्रा
मण्यांप्रयाजादीनां[illegible]षादीनांप्रैषादयःकेचनतदर्थंतयैवाम्नाताः।तत्रापियावदाम्नातं
ततएवग्रहीतव्यंइतरत्सर्वंप्रकृतिप्राप्तमेवेतिसिद्धं॥८॥विध्यपराधेप्रायश्चित्तिः।प्रा
यश्चित्तिरित्यधिकारोयमाध्यायपरिसमाप्तेः।विधिशब्देनविहितमुच्यते।अपराधोन्य

१२२

122

थाभावः।अभावोवा।विहितस्याकरणेअन्यथाकरणेचप्रायश्चित्तिः कर्तव्या।प्रायोवि
नाशः।चित्तिःसंधानं।प्रायश्चित्तिरित्युक्तं भवति।विध्यपराधेप्रायश्चित्तिरितिवचनाद
पराधेसतितदर्थंतयाविहितमस्तिचेत्तदेवकर्तव्यं तन्नास्तिचेद्व्याहृतिहोमः कर्तव्यः।त
स्मादेषैवयत्रेप्रायश्चित्तिः कर्तव्येतिवचनात्।विध्यपराधइतिवचनाद्विधिसंपादने
प्रायश्चित्तिर्नास्ति।यथायदिवास्याग्निहोत्रउपसन्नेइत्यादावंतरागमननिषेधावसरे
यजमानस्यांतरागमनंविहितंतस्मिन्नागमनइत्यर्थः।कालश्चप्रायश्चित्तानांनैमित्तिक
त्वान्निमित्तानंतरंकर्तव्यानीत्युत्सर्गः।शिष्टाभावेप्रतिनिधिः।शिष्टंविहितमित्यर्थः।
तस्याभावेप्रतिनिधिरुपादातव्यः।अभावइत्येतावतैवसिद्धेशिष्टग्रहणंयत्कार्यार्थ
तयायच्छिष्टंतस्यस्वरूपसत्तायामपितत्कार्याशक्तौप्रतिनिधिरुपादातव्यएवइत्येव

+ श्रीहरिभिर्यजेतयवैर्वैति।३

१अर्थः प्रयोजनं द्रव्यवदानादि १

श्रो० सू० २ मर्थो अर्थद्रव्ययोर्विरोधे अर्थो बलीयानित्ययमपिन्यायोर्थाद्द्रव्युत्पादितो भवति। इदं

१२३ चापरं कार्यसामर्थ्ये सति न गुणसंपादनार्थं उपादातव्य इति रेकाल्लभ्यते। अत्रापिन्यायां ति थ २

न्तरं व्युत्पादितं भवति। द्रव्यगुणाविरोधे द्रव्यं बलीय इति। प्रतिनिधीयत इति प्रतिनिधिः।

एतदुक्तं भवति। यत्कार्यार्थतया यद्विहितं तस्य तत्कार्यशक्तो तस्य यत्प्रतिरूपं तत्तत्का

र्यकरणायोपादातव्यमिति। अनेन प्रकारेण सदृशः प्रतिनिधिरुक्तो भवति। न्यायादे

वायमर्थोऽलिभ्यते शिष्टाभावे प्रतिनिधिरितिवचनस्येदं प्रयोजनं प्रतिनिधिप्रयोगेऽपि

विहितस्वरूपापचाराद्धिप्यशंकानिवृत्त्यर्थं। अतस्तत्र प्रायश्चित्तिर्न कर्तव्या। विधिशा

क्तिरेव तत्रैवं रूपा विपरिणामतेनात्र विध्यपराधोस्तीत्येवमर्थं सूत्रप्रणयनं। अन्वाहि

ताग्नेः प्रयाणोपपत्तो पृथगग्नीन्नयेयुः। अन्वाहिताः अग्नयो यस्य सोन्वाहिताग्निः इ १२३

ष्टिमध्यगतइत्यर्थः। तस्यप्रयाणोपपत्तौअग्नीन्पृथक्न्येयुः प्रत्यक्षंच। पृथग्ग्रहणमसं

ग सर्गार्थं। उपपत्तिवचनमनात्माधीनमनसूचनार्थं। चौरव्याघ्रादिभयात्क्षपामप्यत्रवस्तु

मशक्यमितियदिगमनमापद्येत तद्देष्टिमध्येप्यनेनप्रकारेणाग्नान्हित्वागंतव्यं॥ अन्यथा

कर्ममध्येनगंतव्यमित्येवमुपपत्तिवचनं। तुभ्यंताअंगिरस्तमेतिवाज्याहुतिंहुत्वासमारो

पयेत्। एतामाहुतिंहुत्वासमारोप्यगंतव्यमित्यर्थः। प्रत्यक्षनयनेआहुतिहोमोनास्ति॥

समारोपणस्वरूपमाह। एतामाहुतिंहुत्वासमारोप्यगंतव्यमित्यर्थः। प्रत्यक्षनयतेआहु

तिहोमोनास्ति। समारोपणास्वरूपमाह। अयंतेयोनिर्ऋत्वियइत्यरणीगार्हपत्येप्रतितपे

त्। पूर्वएवद्वे अरणीगार्हपत्येप्रतितपेत्। नाग्न्यंतरे। यदिदक्षिणाग्निर्भिन्नयोनिस्तदात

स्यारण्यंतरे तेनैवमंत्रेणसमारोपणंभवति। पाणीवायातेअग्नेयज्ञियातनूस्तयेह्या

श्रो० १२० ३ रोहात्मात्मानमच्छा वसूनि कृण्वन्नर्यापुरूणि। यत्तोभूत्वा यत्तमासीद् योनिं जातवेदो भुव

१२४ आजायमान इति। द्वौ पाणी गार्हपत्ये सकृदेव प्रतितपेत्। द्वयोरपि समारोपणं यजमान

एव कुर्यात्। पूर्वमंत्रस्य प्रत्यगाशीष्ट्वात्। उत्तरस्य चात्मानमिति लिंगात्। कर्त्रंतरविधा

नाभावाच्च। एवमनन्वाहिताग्निरकृत्वा समाप्यैरोंगमनप्राप्तोगच्छेदिति शेषः। अतोन

न्वाहिताग्नेः प्रत्यक्षनयनं नास्ति प्रयाणकाले॥ विहारदेशेऽपि यत्र क्वापि संचारयितव्ये

अनुष्ठसता संचारयितव्यः। अविहृतस्य गार्हपत्यस्यैष नियमो। विहृतानामपि सर्वे

षां युगपन्नयनेऽपि भवति। नैकैकस्य नयने। अनसानयने क्वचिदप्यनुष्ठासनियमो

नास्ति। अनेनैव प्रकारेणाग्नीन्सर्वदा नयेत्। अन्यथा नयनेऽग्नीनां लौकिकत्वाशंकास्या

त्। यदि पाण्योररण्योः संस्पृश्य मंथये तत्सत्यव रोहन्जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः प्र १२४

१ अयं मंथन मंत्र इति सिद्धांत भाष्ये ४

जानन्न् । प्रजां पुष्टिं रयिमस्मासु धेहि । यथा भव यजमानाय शंयोरिति । अरण्योर्हस्तयोर्वा स
मारोपणमुक्तं । तत्रावरोहणकाले यजमानः प्रत्यवरोह जातवेद इत्येतं मंत्रमुक्त्वा मंत्रां
तेन तयोररण्योरग्निं मंथयेत् । स्वयं वा मंथेत् । एवमरणीसमारोपणे । यदि हस्तयोः समारो
पणं स्यात्तदैतेन मंत्रेणारणी संस्पृश्य मंथयेत् । यजमानो मंथनकाले यावदग्नेर्जन्म ता
वदरणी संस्पृशन्नेवास्ते । मथ्यमानेऽग्नौ यद्युत्पादनसमर्थः प्रयत्नो निष्फलः स्यात्तदा पु
नरारंभावसरे मंत्र आवर्तयितव्यः । एवं व्यर्थे व्यर्थे पुनः पुनरावर्तयेत् । प्रत्यवरोहणा
र्थमरणीमंथयेदित्ययेकोऽर्थः । आहवनीयमवदीप्यमानमर्वाक्शम्यापरासादिदं त एकं प
र ऊ त एकमिति संवपेत् । आहवनीयस्यैकदेशः समस्तो वा यथायतनाद् उत्सृप्यार्वाक्शम्या
परासाद्देवबहिर्गच्छेन्नदा तमिदं त एकमित्यायतने संवपेत् । ततः समस्ताभिर्व्याहृतिभि

शम्यापरिमितदेशादिति प्रयोगरत्ने ।

यदि पाण्योः समारोपणं तदैवमवरोहयेत् । पाणिभ्याम
रणी अनेन मंत्रेण संस्पृश्य मंथयेदित्यपरोऽर्थः । २

होमः कर्तव्यः। अग्नीनां सर्ववेदसंबंधित्वात्। सर्वत्र विनष्टसंधानं द्विविधं। आयतनादपगत
स्य पुनः प्रक्षेपात्सेंद्रियसंधानं। तत्रैव व्याहृतिभिर्होमा घृतौ द्रियं। अतो यत्र यागो होमो ज
पो दानं दक्षिणारूपं चास्ति तत्र तैरेवातींद्रियसंधानांशः सिध्यति। यत्र त्वेषामन्यतमो
नास्ति तत्र व्याहृतिहोमेनातींद्रियांशसंधानं कर्तव्यं। आहवनीयग्रहणादग्न्यंतरेनैत
त्प्रायश्चित्तं। तत्र तूष्णीं प्रक्षिप्य व्याहृतिहोमः कर्तव्यः। तस्य चाविध्यपराधत्वात्। दीप्यमा
नव चनं यावत्प्रायश्चित्तकालं जीवत एवैतत्प्रायश्चित्तं भवति न विस्फुलिंगमात्रस्येत्येव
मर्थं। यदि त्वतीयाद्यद्य मावास्यां पौर्णमासीं वातीयाद्यदि वान्यस्याग्निषु यजेत यदि वा
स्यान्योग्निषु यजेत यदि वास्यान्योग्निरग्नीन्व्यवेयाद्यदि वास्याग्निहोत्र उपसन्ने हविषि
वानिरुप्ते च क्रीवघ्राधुरुषो वा विहारमंतरियाद्यदि वाध्वे प्रमीयेतोष्टिः। उक्तं शम्यापरास

ग्नि

देशमनतिक्रांतस्य। अतिक्रांतस्येदमुच्यते। यदि त्वतीयाच्छम्या परासं देशमित्यर्थः। यद्य
मावास्यां पौर्णमासीं वा स्वकाले कृत्वातीयात्। अन्यस्याग्निषु यागं कुर्यात्। अस्याग्निषु अ
न्यो वा यजेत। अस्याग्नीनन्यो वा निर्वपेयात्। यद्यग्निहोत्रद्रव्ये कुशोषूपसादिते दर्शपूर्ण
मासादिषु वा हविषि निरुप्ते चक्रीवत् रथशकटादि। श्वा वा पुरुषो मनुष्यजातिः स वाग्नी
नां मध्ये नातिक्रामेत्। यदि वा यजमानो ध्वनि प्रमीयेत यस्मिन्ग्रामे अग्नय आसते तस्मा
द्ग्रामांतरे म्रियेतेत्यर्थः। एतेषु निमित्तेष्विष्टिं कुर्यात्। अग्निः पथिकृत्। तस्यामियं देवता
ग्निः पथिकृद्गुणः। वेत्था हि वेधो अध्वन आ देवानामपि पंथामगन्मेति। अनड्वांदक्षिणा।
शकटवहनसमर्थो बलीवर्दो निड्वांदक्षिणा। व्यवाये त्वनग्निनौ प्रागिष्टेर्ग्रामंतरेणाति
क्रमयेत्। अग्निचक्रीवच्छ्वपुरुषैर्व्यवाये इष्टिरुक्ता तत्राग्निवर्जितैरन्यैर्व्यवाये गवाति
अग्निव्यवाये तु पाथिकृतीष्टिरेव। नगवादिक्रमणादित्युपरुष्णानां तं २

क्रमणं भस्मराज्युदकराजिभ्यां संतानमनुगमयित्वा प्रणयनमुपस्थानमिति विशेषः। श्ववय
वायेत्वयमप्यपरो विशेषः। भस्मनाश्वुनः पदं प्रतिवपेदिति। एते पदार्था निमित्तानंतरमेवक
र्तव्याः। ततो वर्तमानं कर्मसमाप्येष्टिः कर्तव्या॥ दर्विहोममध्ये एष विधिः। इष्टिहोममध्ये तु
तद्देवतंत्रमुपजीव्य तत्रैव पाथिकृती कार्या। प्रागिष्टेरिति वचनं पूर्वोक्ता या अपीष्टेः प्रागे
वैते पदार्थाः कार्या इत्येवमर्थं। भस्मनाश्वुनः पदं प्रतिवपेदिदं विष्णुर्विचक्रम इति। श्वुनो यानि
पदानि भस्मना प्रतिवपेत्। पूरयेदित्यर्थः। प्रतिपदं मंत्रावृत्तिः। गार्हपत्याहवनीययोरंत
रं भस्मराज्योदकराज्या च संतनुयात् तंतुं तन्वन्रजसो भानुमन्विहीति। प्रतिराजि मंत्रावृत्तिः।
अनुगमयित्वा चाहवनीयं पुनः प्रणीयोपतिष्ठेत। यदग्ने पूर्वं प्रहितं पदं हि ते सूर्यस्य रश्मी
नन्वाततान। तत्र रयिष्ठामनु संभवैतां सं नः सृज सुमत्या वाजवत्या। त्वमग्ने सप्रथा असी

तिच। राजि[illegible]भ्यां संतानं कृत्वाहवनीयमनुगमयेत्। ततः प्रणीयोपतिष्ठेत। यदग्ने पूर्वं त्व
मग्ने सप्रथाअसीति च द्वाभ्यां॥ चशब्दः पूर्वोक्ते इति राकाभावात्वमग्ने सप्रथाअसीत्यस्य
पूर्वमंत्रशेषाशंकानिवृत्त्यर्थः। इष्टेरपि स एव विहारः। प्रायश्चित्तउत्पन्ने पूर्वप्रवृत्ताअ
ग्नयो नापवृज्यंत इति। अस्यार्थस्य साधनार्थमुत्तरत्र वक्ष्यति। अनुगमयित्वा चाहवनी
यं पुनः प्रणयेदिति। अध्वे प्रमीतस्याभिवान्यवत्सायाः पयसाग्निहोत्रं तूष्णीं सर्वहुतं
जुहुयुरासमवायात्। पथिकृतं कृत्वा तस्मिन्नेव विहारे तूष्णीं धर्मकमग्निहोत्रं नामक
मंतिरमनेन विधीयते। तत्सर्वमग्निहोत्रवत्कर्तव्यं। सर्वहुतत्वं तु विशेषः। अतो नात्र
भक्षोस्ति। कालश्च सायंप्रातरेव। सांगं प्रधानं तूष्णीं। प्रधाने प्रजापतिध्यानं कर्तव्यं॥
अभिवान्यवत्सा नामान्यवत्सेन दोहनीया। अभिवान्यो वत्सो यस्याः सा अभिवान्यवत्सा।
अभिपूर्वस्य वा गतिगंधनयोरित्यस्य अभिवा इति रूपं। अभि प्राप्तः अन्यवत्सो यस्याः सा इत्यर्थः इति ब्रौ

अध्वे प्रमीतस्यानध्वे प्रमीतस्य चेदं भवति पुनराहिताग्निग्रहणादिति सिद्धांतभाष्ये =२८ स्मार्त इदं न भवतीति देवत्रातः =४ ब्राह्मणेन्यदपि पक्षद्वयं तत एवावगंतव्यं =४

श्रौ० सू० ३

१२७

अभिवान्योभियाननीय इत्यर्थः। आसमवायादिति। आशरीरस्याग्निसंबंधादित्यर्थः। यथाहिताग्निरपरपक्षे म्रियेताहुतिभिरेनं पूर्वपक्षं हरेयुः। यथाहिताग्नेरपरपक्षे मरणाशंकास्यात्तदा तस्य पक्षस्यावशिष्टा आहुतीः पक्षहोमन्यायेन हुत्वामावास्यां च कृत्वा कर्मभिरेनं पूर्वपक्षं नयेयुः। आहिताग्निग्रहणमन्याअध्यनाहिताग्नेरपरपक्षाश्रितायानि त्याहुतयस्ताः स वा होतेत्येवमर्थं। एष पूर्वाधिकृतानां कालापकर्षो विधीयते तेन जीवत एव मरणाशंकायामेतदिति गम्यते। मृतस्यानधिकारात्। अत एव पूर्वसूत्रे अग्निहोत्रं नामकं कर्मांतरमित्युक्तं। हविषां व्यापत्तावोह्णास्कदेवतास्त्वाज्येनेष्टिं समापयेत्। पुनरिज्या। आवाहनादूर्ध्वं प्रधानयागादर्वाग्यदि हविर्व्यापद्येत तस्य प्रधानयागादि सर्वमाज्येन समापयेत्। अव्यापन्नानि च यथापूर्वं समापयेत्। एवं समाप्य ततो व्यापन्नह

व्या

१२७

१२७

तदाकुर्यस्यसर्वाण्येवहवींषिदुष्येयुर्वाप॰ तन्वीतयत्तोयज्ञस्यप्रायश्चित्तिरिति=२

विमोक्षस्यैवाग्न्यन्वाधानादिपुनर्यागः कर्तव्यः। एवंद्वयोर्बहूनांव्यापत्तौकर्तव्यं। हविषा
मितिबहुवचनमविवक्षितं। श्रौतलणेचसर्वशब्दोस्यप्रायश्चित्तस्यसर्वेहविःसुप्रापणा
र्थः। नैकस्मिंद्वयोर्वाप्रतिषेधार्थः। इष्टिग्रहणंप्रधानयागेकृतेशेषकार्येचाकृतेहवि
षिव्यापन्नेआज्येनसमापनंकुर्यादित्येवमर्थं। तत्रपुनर्यागोनभवति। व्यापन्नानिह
वींषिकेशनखकीटपतंगैरन्यैर्वाबीभत्सैः। अन्यैर्वाबीभत्सैरितिवचनात्केशादिभिरपि
बीभत्सैरेवेतिगम्यते। तेनाच्युतकेशनखसंसर्गोनदोषायभवति। तथाकीटपतंगैरे
वाप्यमेध्यनिवासिभिःसंसर्गः। अन्यैर्वाबीभत्सैरित्यनेनैवमनादीन्युच्यंते। एतैःसं
सर्गेहवींषिव्यापन्नानीत्यर्थः। बीभत्सैरित्येतावतैवास्मिन्नर्थेसिद्धेकेशादीनांपृथग्ग्र
हणंकेशादिसंसर्गेस्मिन्स्कन्नः शुध्युपायोयःसहविषिनभवतीत्येवमर्थं। भिन्नसिक्तौ

सिक्तं। स्कन्नं। स्खलनेनअधःपतितं=१

चरु

=विशेषेणाहाहाधिक्येनस्पंदमानं=५ बीभत्सैः=२

श्रौ०सू०३

१२८

निच।भिन्नानि च सिक्तानि च हवींषि दुष्टानि भवंति। कठिनेष्वभेदनं द्रवेष्वक्षरणमिति। अपो भ्यवहरेयुः। दुष्टानि हवींषि अप्सु प्रक्षिपेदित्यर्थः। एवंषां प्रतिपत्तिः। प्रजापते न त्वदेतान्यन्य इति च वल्मीकवपायां वा सान्नाय्यं मध्यमेन पलाशपर्णेन जुहुयात्। सान्नाय्यं दुष्टं मध्यमेन पलाशपर्णेन प्रजापत इत्यृचा स्वाहाकारांतया वल्मीकद्वारे प्रासिंचेत्। अप्सु वा त्यागमिति विकल्पः। मध्यमग्रहणं द्विपर्णस्य माभूदित्येवमर्थं। विष्यंदमानं मही द्यौः पृथिवी च न इत्यंततः परिधिदेशे निनयेयुः। द्विविधं विष्यंदनं सिक्तमसिक्तं च। सिक्तं दुष्टं भवति। अन्यददुष्टं। यद्विष्यंदनं कुंभीमतीत्याग्निं पृथिवीं वा प्राप्नुयात्। तत्सिक्तं भवति दुष्टं च। तदेव यत्कुंभ्यां बहिर्गमनमात्रेण विष्यंदते तदसिक्तमदुष्टं च। यद्विष्यंदनेन दुष्टं तदेवं प्रतिपादयेत्। मही द्यौरित्यनयर्चांततः परिधिदेशे निषिंचेत्। देशग्रहणं परिध्यभावेपि तस्मिन्

२ मा

१२८

३६

देशे निनयनार्थं। अन्यतरादोषे। व्यासिच्य प्रचरेयुः। अदुष्टे प्रातर्दोहे एतद्भवति। तस्मात्
दोहं व्यासिच्य द्वयोः पात्रयोः कृत्वा तयोरन्यतरत्। दधिभावायातं च्युताभ्यां दधिपयोभ्यां
प्रचरेयुरित्यर्थः। अत एवादुष्टे प्रातर्दोहे इत्युक्तं। पुरोडाशं वा तत्स्थाने। पयसि दुष्टे एतदे
व भवति पूर्वोक्तस्यासंभवात्। तेन व्यवस्थितविभाषेयं। उभयदोषे ऐन्द्राग्नं पंचशरावमो
दनं। सान्नाय्यद्वये दुष्टे पंचशरावपरिमितान्व्रीहीन्निर्वपेत्। इन्द्राग्निदेवत्योदनसिध्यर्थं।
तयोः पृथक्प्रचर्या। तयोरिन्द्राग्न्योर्हविरुत्पत्तौ सहोद्दिष्टयोरपि प्रचारकाले तस्मादेव ह
विषस्तयोः पृथगेव यागः कर्तव्य इत्यर्थः। तत्राग्निं देवतानां प्रथमं यजेदिति श्रुतेः। अग्नि
मिष्ट्वेन्द्रं यजेत्। ऐन्द्रमेवेत्येके। एके ऐन्द्रमेव पंचमुत्पाद्य प्रचारे इन्द्राग्न्योः पृथक्प्रचारमाहुः।
अत्राप्यग्निरेव प्रथमं यष्टव्यः। अस्य पक्षस्येयं श्रुतिर्मूलं। यस्योभयं हविरार्तिमार्छेत्।

शराव

श्रौ०१४०२ ऐंद्रं पंचशरावमोदनं निर्वपेत्। अग्निं देवतानां प्रथमं यजेदिति। अस्यां श्रुतावग्नियागस्यानु

१२८ वादत्वेनापि संभवादैंद्रमेव निरूप्य इंद्रायैव यष्टव्यमिति केचित्सूत्रार्थं वर्णयंति। वत्सानां

धानेवायवे यवागूं। सान्नाय्यार्थमपाकृतानां वत्सानां पाने वायुदेवत्यां यवागूं निरूप्य तथा

यष्टव्यमित्यर्थः। सर्वपाने एतत्प्रायश्चित्तं। पीतशिष्टमेव हविषः पर्याप्तं चेद्व्याहृतिहोम एव।

न यवागूः। यवाग्वा यागं कृत्वा पुनर्यागः कर्तव्यः। अग्निहोत्रमधिश्रितं स्रवदभिमंत्रयेत

गर्भं स्रवंतमगदमकर्माग्निर्होता पृथिव्यंतरिक्षं। यतश्चुदग्नावेव तन्नाभिप्राप्नोतीति नि

र्ऋतिं परस्तादिति। अधिश्रितमग्निहोत्रद्रव्यं स्थालीमूलेन यदि स्रवति। तदनेनाभिमंत्र

येद्गर्भमिति॥१०॥ यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत्तामभिमंत्रयेत यस्माद्भी

नो. षानिषीदासि ततो अभयं कृधि। पशून्नः सर्वान्गोपाय नमो रुद्राय मीढुष इति। उपावसृ १२९

=स्थालीगतस्याभिमंत्रणं भवतीति सिद्धांतभाष्ये=२ अभिमंत्र्य उत्थाप्य सुप्रक्षिपेत्। शेषेण होमः। अशेषे

पुनर्दुग्ध्वा जुहुयात्=२

९५८

स्थाउत्थमानेत्युभयविशेषणं संसर्गाधादोहनपरिसमाप्तेरेतस्य प्रापणार्थं। यस्येति ब्रा
ह्मणानुवादः। अथैनामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्। इन्द्राय रुद्रवती
भागं मित्राय वरुणाय चेति। अथेति संबन्धार्थं। योभिमंत्रयते स एवोत्थापनमपि कुर्यात्।
यजमान एवोभयं कुर्यात्। होमकर्ता वेत्येवमर्थं। अथास्याऊधसि च मुखे चोदपात्रमुपो
ह्य दुग्ध्वा ब्राह्मणं पाययेद्यस्याभोक्ष्यं स्याद्यावज्जीवं संवत्सरं वा। ऊधः स्तनप्रदेशः।
अग्निहोत्र्या ऊधसि मुखे च समीप उदपात्रमुह्य ततस्तां दुग्ध्वा तत्पयो ब्राह्मणं पा
ययेत्। यस्यान्नं यावज्जीवं न भोक्ष्यमाणो भवेत्। एतत्पयः पिबति तस्यान्नं यावज्जीवं सं य
वत्सरं वा नाश्नीयादित्यर्थः। संवत्सरं वा नाश्नीयात्। अत्र कालानाम्नानाद्यावज्जीवमित्यु
क्तवानाचार्यः। संवत्सरं व्रतं नात्येतीति सामान्यानुवादात्संवत्सरवचनं। अथ शब्दः पूर्ववत्।
द्वेउदपात्रे आदोहनपरिसमाप्ते रूपोढ्गात्येइत्यर्थः = ४

गार्हपत्ये पात्रमध्ये दुग्धं कृत्वा दाहयित्वा यावन्निरवशेषं=३ यस्याग्निहोत्र्युपावसृष्टा दुह्यमाने स्यन्दते तां गाम् अन्यां चेत्यर्थः=४

श्रौ०सू०३ वाश्यमानायै एवं संप्रयच्छेत् यवसाग्रगवतीहि भूयाः इति। एतदप्युपावसर्गादि दोहनपर्यन्तमेव। वाश्यमानायै शब्दायंत्यै। यवसो भक्षः। शोणितं दुग्धं गार्हपत्ये संक्षाप्यान्येन जुहुयात्। संक्षाप्येति यावत्तं निरवशेषं भवति तावद्दाहयित्वान्येन द्रव्येण जुहुयात्। अत्रान्यवचनात्पूर्वेत्र ताम् अन्यां वा पुनर्दुग्ध्वा पयसैव जुहुयात्। तत्रैवं ब्राह्मणं। अथैनां ब्राह्मणाय दद्यादिति। तद्दानं पूर्वसूत्रोक्तेन पयसः पानेन विकल्प्यते। दानपक्षेन्यामेव दुग्ध्वा जुहुयात्। भिन्नं सिक्तं वाभिमंत्रयेत समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत। अरिष्टा अस्माकं वीरा मयि गावः संतु गोपताविति। स्थालीभेदेनाविशिष्टं द्रव्यं भिन्नमित्युच्यते। विक्षेपात्तन्नष्टं भवति। सिक्तमिति स्कन्नमुच्यते। स्कंदनेच यावत्स्कन्नं तावन्मात्रं दुष्टं भवति न पात्रगतं। भिन्नसिक्तानि चेति वचनात्। तद्भिन्नं सि

११३०

१३०

अग्निहोत्रद्रव्यं=१

कंचसमुद्रमित्यनेनाभिमंत्रयेत। ततआपोभ्यवहरेयुः। अपोभ्यवहरेयुरित्यस्यवचन
स्यप्रकरणविशेषाभावाद्व्यापन्नहविर्मात्रमेवास्याविषयइति। भेदनेइदमेवास्मिन्प्र
करणेसर्वविरुद्धेपयसि। अन्येषुचद्रव्येषुच॥ स्कंदनेपुनःपयसिवक्ष्यमाणत्वादिद
मभिमंत्रणंद्रव्यांतरेष्ववेतिस्थितं। यस्याग्निहोत्रमुपावसृष्टादुत्समानास्पंदेतसाय
तत्रस्कंदयेत्तदभिमृश्यजपेद्यदद्यदुग्धंपृथिवीमसृप्तयदोषधीरत्यसृपद्यदापः॥
पयोगृहेषुपयोअघ्न्यासुपयोवत्सेषुपयोअस्तुतन्मयीति। दोहनावस्थायांपयसि
स्कंनेयदद्येत्यनेनअभिमृशन्स्कंनमभिमंत्रयेत॥ दोहनाद्यवस्थायांस्कंनेएतद्भवती
त्येतावदत्रविवक्षितं। इतरत्ब्राह्मणानुवादः॥ पयोलिंगत्वात्पयस्येवेदंभवति। तत्र
यत्परिशिष्टंस्यात्तेनजुहुयात्। अर्थप्राप्तस्यविधानंशेषकार्यस्यापर्याप्तावपितेनै

समुद्रंवइत्यनेनास्यतुल्यकार्यत्वात्। अतएवसमुद्रंवइत्यत्राप्यभिमृशन्स्कन्नमभिमंत्रयेत॥२

श्रौ०सू०द्वि० १३१

वहोमः कर्तव्यः। शेषकार्यस्यभक्षादेर्लोप एवस्यात्। अप्रयोजकत्वाद्द्रव्यस्येति। अन्यें नवाभ्यानीय। जुहुयादितिशेषः। होमापर्याप्तावितिदं भवति। एतद्दोहनाद्याप्राचीनहरणात्। मर्यादायामयमाकारः। उत्तरत्र तत्रेतिवचनात्। दोहनवचनं पूर्वसूत्रे स्कंदेनिमित्तविशेषस्याविवक्षितत्वसूचनार्थं। आदिग्रहणमधिश्रिते पयसि स्कंने एतदेवप्रायश्चित्तं न ब्राह्मणोक्तं। अधिश्रितं स्कंदति वा विष्यंदते वेति। इदं तु द्रव्यांतरे भुभवति। विष्यंदनेतु पयस एव पादमेव भवति। विष्यंदने अधिश्रिते अन्यस्यानाम्नानात्॥ तत्र यत्परिशिष्टमित्यादि द्रव्यांतरेष्वपि साधारणं। अन्यस्यानाम्नानात्। उन्नीयाहवनीयं प्रतिहरणं प्राचीनहरणमित्युच्यते। प्रजापतेर्विश्वभृति तन्वं हुतमसीति तत्र स्कंनाभिमर्शनं। इदमपि पयस एव पूर्वेण संबंधित्वात्। तत्रेति प्राचीनहरणे इत्यर्थः॥

पयसा। न १३१

द्रव्यांतरेसभुद्रवहति=१

शेषेणजुहुयात्। अंतरेणापिवचनंसर्वस्यवाप्रधानमात्रस्यैववापर्याप्तेशेषेपोवहो
मोयुक्तः। उक्तत्वाद्वयस्यवचनमिदानींकिमर्थं। अयमभिप्रायः। अस्तिचेत्शेषःसर्व
होमद्वयस्यापर्याप्तः। तथापिशेषेणैवमात्रागृहीतेनापिजुहुयादितिवचनं। पुनरु
न्नीयाशेषे। स्रुगातस्याःशेषेपुनरुन्नीयजुहुयात्। पुनरुन्नयनेअयंविशेषः। आप्रा
चीनहरणेयावतिगतेस्कन्नंभवतितावत्स्वेवाध्वनिउपविश्यस्थाल्यामन्येनप्राचीनीत्वा
त[illegible]एवउपविष्टउन्नयेत्। नस्वयंस्रुग्वाप्रत्यग्गच्छेत्। आज्यमशेषे। स्थाल्या
मपियदानास्तितदाज्यंगृहीत्वातस्ययथासंभवंसंस्कारंकृत्वोन्नीयतेनजुहुयात्। ए
तदाहोमात्। द्वयोरपिहोमयोःप्रधानत्वात्होमद्वयपर्यंतमेतदेवप्रायश्चित्तंभवति।।
वारुणींजपित्वावारुण्याजुहुयात्। विशेषाभावाद्येकेचनवारुण्योभवतः। पूर्वहोमेप्रा

पत्न्या अपि न। उत्तरत्र अनशनविधाने पत्नीग्रहणात्॥ = १

श्रौ० सू० ३ कृतमंत्रस्यापवादो वारुणी। अनशनमान्यस्मात् होमकालात्। यजमानस्येदं न होमक
१३२ र्तुः। वारुणीजपो वारुणीहोमो नशनमिति एतत्रे यंशेषे याजुकुर्यादित्यत्र मात्रापचार
च होमे पुनरुन्नीयहोमे आज्यहोमे भवति। पुनर्होमं च गायागारिः। एते ष्वेवात्रिषु पक्षे
षु गायागारिः पुनर्होमं चेच्छति। आचार्यग्रहणं विकल्पार्थं। पुनर्होमे पूर्वं समाप्य पुन
र्विहरणादि सर्वं क्रियते। निमित्ते प्रयोगावृत्तिविधानात्। अग्निहोत्रं शरशरायत्स
मो षामुमिति द्वेष्टारमुदाहरेत्। अधिश्रितमाग्निहोत्रद्रव्यं यदि शब्दायेत्। तदा तद्द्र
व्यं समो षामुमिति अभिमंत्रयेत अमुमित्यस्य स्थाने यजमानद्वेष्टुर्नाम निर्दिशेत्।
अधिश्रितविशेषणं तत्रैवास्य संभवाच्छास्त्रांतरदर्शनाच्च। विष्यंदमानं महाद्यौः १३२
पृथिवी च न इत्याहवनीयस्य भस्मांते निनयेत्। उद्वासिते विष्यंदिते तु एतद्भवति। ॥

अधिश्रितेतुब्राह्मणोक्तमेवा सांनाय्यवद्भीमत्से। प्रजापतइत्यनयामध्यमेनपला
पर्येनवल्मीकेजुहुयात्‌द्रित्यर्थः। अभिदृष्टेमित्रोजनान्यातयतिश्रुवाणइतिसमि
दाधानं। अधिकेयंसमित्‌। उत्तराहुत्यर्थस्याप्यभिवर्षणसंभवात्‌। अतःपूर्वाहु
त्याःप्रागपिअस्मिन्निमित्तेसतिनिमित्तानंतरंसमिदंतरमाधेयमेव। यत्रवेत्थवन
स्पतइत्युत्तरस्याआहुत्यास्कंदने। समिदाधानमितिशेषः। ११ प्रदोषांतोहोमकालः।
प्रदोषोनामरात्रेःपूर्वश्चतुर्थोभागः। प्रदोषस्यांतःप्रदोषांतः। प्रदोषांतोंतोयस्यसः
प्रदोषांतः। प्रदोषांतांतइत्यर्थः। ससायंहोमस्यकालः। केषांचित्तंचमीषड्योनाडि
केप्रदोषशब्देनोच्यते। तदंतोवायंहोमकालः। संगवांतःप्रातः। यस्मिन्कालेगावो
वत्सैःसहआसतेससंगवःकालः। तावत्पर्यंतंप्रातर्होमसमयः। केचिदहस्तुती

श्रौ०सू०२ योभागः संगव इत्याहुः। तदंतः संगवांतः। दशनाडिका इत्यर्थः। अस्तमितउदिते चविहि

१३२ तोहोम एतावति काले क्रियमाणोतीतकालो न भवतीति पुनः कालविधिः। तमति

नीयचतुर्गृहीतमाज्यं जुहुयात्। कस्मिन्काले केन मंत्रेणेत्यत आह। यदि सायं दोषा

प्रातः वस्तर्नमः स्वाहेति। यदि प्रातर्वस्तर्नमः स्वाहेति। अग्निहोत्रमुपसाद्य भूर्भुवः स्वरिति

जपित्वा वरं दत्वा जुहुयात्। उपसादनवचनं क्रमार्थं। उपसाद्य जपं वरदानं च कृत्वा स

मिदाधानादि पूर्ववत्। वरदानं यजमानं। वरशब्देन गोजातिरुच्यते। तं वरं दत्वा जुहु

यादिति पूर्वकालतामात्रं विवक्षितं। नात्र्यवधानं कर्त्तव्यं। इष्टिश्च वारुणी। कर्त

व्येत्यर्थः। समासेग्निहोत्रहोमे तेष्वेवाग्निषु वियमिष्टिः कार्या। उत्तरत्रानुगमनविधा १३२

नात्। कृत्वा प्रातर्वरदानं। प्रातःकालातिपत्तौ विशेषो वक्ष्यते। होमोत्तरकालं इष्यते

तेन वारुण्याः पूर्णाहुतिं हुत्वा होमः कार्यः। इष्टिपक्षे तु पश्चादेव=१ एतत्सायंकालातिपत्तौ=२

 कृत्वा वरदानमिति सिद्धांतः=१

२ हो० ग्र

वरदानं कर्तव्यं। अनुगमयित्वा चाहवनीयं पुनः प्रणयेदिहैव क्षेम्य एधि मा प्रहासीर

मुं मामुष्यायणमिति। समाप्तेऽग्निहोमे आहवनीयस्यानुगमनं कृत्वा पुनस्तमेवोद्धरे

दिहैव क्षेम्य इति मंत्रेण॥ मा प्रहासीरमुं मामुष्यायणमिति पाठः कर्तव्यः। अमुमित्य

स्य स्थाने यजमाननामद्वितीयया निर्दिशेत्। आमुष्यायणशब्दस्य स्थाने गोत्रनाम।

मा प्रहासीर्देवदत्तं माभारद्वाजमिति। पित्रादौ जीवति भारद्वाजायनमिति वदेत्॥

दक्षिणाग्निश्चाग्निहोत्रिक एव। आहवनीयस्यैति न विग्रहः। अग्निहोत्रकस्येति चेत्।

न समाप्तेऽग्निहोत्रे तस्य लौकिकत्वादनाहवनीयत्वं। होमे कृते असमाप्ते च प्रयोगे

अनुगमनमिति चेत्। तथा सति पुनः प्रणयनमदृष्टार्थं स्यात्। अथायमभिप्रायः।

इष्ट्यर्थं विहतस्येति। तदा पुनः प्रणयेत्तत इष्टिरिति समन्वयो नोपपद्यते। अथाय

४ वानुगमनविधानात्। इदमनुगमनं कस्याहवनीयस्ये ४

मभिप्रायः। [illegible] समाप्तेग्निहोत्रे लौकिकस्य सतो नुगमनमेव कर्तव्यं नायतनाद्बहिस्त्याग इति। तदाहवनीयमिति शब्दो नोपपद्यते। अत एवं वदतः सूत्रकारस्यायमभिप्रायः इति वर्णनीयं। यस्य कस्यचित्कर्मणोर्थाय विहृतेष्वग्निषु यत्किंचिदग्निसाध्यं नैमित्तिकमुत्पद्यते तस्य नैमित्तिकसहितस्य त एवाग्नयो भवेयुः। न पुनर्विहर्तव्य इति। ततश्चेष्टिर्मित्रः सूर्यः। एते देवते। अभियो महिना दिवं प्रसमित्र मर्तोस्तु प्रयस्वानिति। संस्थितायां पत्न्या सह वाग्यतोग्नीज्वलतो हरन्नभ्यंनुपासीत। समाप्तायामिष्टौ पत्नीयजमानौ यतवाचौ भूत्वा तानेवाग्नीज्वलयंतावनस्तमितावहः शेषमुपासीयातां। उपासीत पत्न्या सहैवं कुर्वन्नग्नीनां समीप आसीतेत्यर्थः। द्वयोर्दुग्धेन वासेग्निहोत्रं जुहुयात्। वासो रात्रेः पूर्वश्चतुर्थो भागः द्वयोर्गवोर्दुग्धेन पयसा सायमग्निहोत्रं स्वकाले जुहुयादित्यर्थः।

अधिश्रितेन्यास्मिं द्वितीयमवनयेत्। अयमत्र विशेषः। एकस्या गोर्दुग्धं पयोधिश्रित्यत
स्मिन्नेव पयसि द्वितीयं गोर्दुग्धमवनयेत्। तेन पयसा होमः। ततोग्न्योरपवर्गः। प्रातरिष्टिः।
ततः श्वोभूते पूर्वाह्णे इष्टिः कार्या। इयमपि प्रातःकालातिपत्तिनिमित्तेव। प्रातरिति काल
विधानात् प्रयोगभेदः। ततो विहरणाभेदोपराग्न्योरपि भवति। अग्निर्व्रतभृत्। व्रतभृद्ध
णोग्निर्देवता। त्वमग्ने व्रतभृच्छुचिरग्ने देवां इहावह। उपयज्ञं हविश्च नः। व्रतानि बिभ्रद्व्रत
पा अदब्धो यजा नो देवाँ अजरः सुवीरः। दधद्रत्नानि सुमृळीको अग्ने गोपाय नो जीवसे
जातवेद इति। एतत्प्रायश्चित्तं स्वकाल एव प्रणीतेष्वग्निषु होमकालातिपत्तौ भवति॥
अ[illegible]प्रणीतेषु उक्तकालातिपत्तावलंतापदि अनुध्यत प्रायश्चित्तं कृत्वा होमं कुर्यात्।
अनापदि मनस्वती होमेनानुध्यत प्रायश्चित्तेन च सहितो होमः कार्यः। विहृतेष्वेवाग्नि

षुआकुतेषु होमांतरकालप्राप्तावुपक्रांतमेव होमं कालातिपत्तिप्रायश्चित्तसहितं कृत्वा
वर्तमानकालीनमनुष्ठेयप्रायश्चित्तसहितं कुर्यात्। अविहृतेषु कालांतरप्राप्तौ मनस्व
तीहोमं कृत्वातिपन्नस्य प्रतिहोमं च कृत्वा अनुष्ठेयप्रायश्चित्तादि पूर्ववत्। एवमनेक
कालातिपत्तावपि द्रष्टव्यं। विहृतेष्वविहृतेषु चानेककालातिपत्तौ मनस्वतीहोमं प्र
तिहोमं चावश्यं कुर्यात्। विहृतेषु तेष्वेवाग्निषु अविहृतेषु तु मनस्वत्यादि कृत्वा प्राप्तका
लस्य विहरणादि क्रियेत। एवमत्र विचार्य यद्युक्तं तत्कर्तव्यं। विचारस्यास्य दिङ्मात्रं लिखि
तमिति मंतव्यं। एवमेवार्त्याश्रुपाते। आर्त्याश्रुपाते दुःखेनाश्रुपाते। न धूमादिनेत्यर्थः॥
एतद्दर्शपूर्णमासयोस्तत्प्रकृतिषु च भवति॥ ब्राह्मणेऽउपवसथेऽश्रु कुर्वीतेति दर्शनात्।

यद्याहवनीयमप्रणीतमभ्यस्तमियात्कुविद्ब्राह्मणोऽग्निं प्रणयेद्दर्भैर्हिरण्येनाग्रतो कि

यमायो। अग्निहोत्रार्थं विधिनानुद्धृतमाहवनीयं यद्यस्तमियात्तदा तदानीमेवानेतुं शक्ये
सुब्राह्मणे सुयोबहुवेत्तितमानीयते नोद्धरणादिनिधानां तं आहवनीयस्य कारयेत्।
अग्नेः प्रणीयमानस्याग्रतो हिरण्यं दर्भैरेवनयेत्। ब्राह्मणग्रहणं बहुविद्यत्वेपिजा
त्यंतरनिवृत्त्यर्थं। अभ्युदिते चतुर्गृहीतमाज्यं रजतं चाहिरण्यवदग्रतो हरेयुः। अनुद्धृ
तमभ्युदिते सति बहुविदग्निं प्रणयेत्। तस्याग्रतश्चतुर्गृहीतमाज्यं नेतव्यं। रजतं च।
यद्धि हिरण्यवद्वचनेन रजतस्याग्रतो हरणं प्राप्येत तदा दर्भैर्हरणमपि प्राप्नुयादाज्य
स्याग्रतो हरणं च न प्राप्नुयात्। अतो दर्भनिवृत्त्यर्थमाज्यस्य प्रापणार्थं चाग्रत इति वच
नं। एवं चेद्धिरण्यवच्चनं पूर्वोक्तस्य बहुविद्ब्राह्मणाग्न्युद्धरणस्य प्रापणार्थं। अथैत
दाज्यं जुहुयात्पुरस्तात्सस्यभ्नु रवउपविश्योषाः केतुनाजुषतां स्वाहेति। हिरण्यरजत

दुघ

श्रौ०द०२ योरग्नतोहरणमेवकार्यं।आज्यस्यकार्यांतरमुच्यते।निहितेग्नावाहवनीयस्यपुर
१३६ स्तात्स्यस्रुस्वउपविश्यउषाःकेतुनेतितदाज्यंजुहुयात्।कालात्ययेनशेषः।उभ
136 योःकालयोरनुस्थल्यप्रायश्चित्तशेषःकालात्ययप्रायश्चित्ताभ्यामेवोक्तः।स्वेनस्वे
नकालात्ययप्रायश्चित्तेनअग्निहोत्रमुपसाद्येत्यादिवारुणीष्ट्यंतंसायंकालेभवति।
प्रातःकालोपितदाद्येवप्रातभ्यंतीष्ट्यंतंभवति।नत्विहाग्निरनुगम्यः।प्रातःकालेअ
यंविशेषः।अनुगमयित्वाचाहवनीयमित्येतंनभवति।तेनाग्निहोत्रार्थेष्वेवाग्निषु
सायंहोमांतंभवति।आहवनीयेचेध्रियमाणेगार्हपत्योनुगच्छेत्स्वेभ्यएनमवक्षामे
भ्योमंथेयुरनुगमयेत्त्वितरं।विद्यमानआहवनीयेगार्हपत्ये।यद्यनुगच्छेत्तदास्वेभ्यो १३६
वक्षामेभ्यएनंगार्हपत्यंमंथेयुः।ततइतरमनुगमयेत्।आहवनीयंइत्यर्थः।गार्ह

मंथनात्पूर्वमनुगमयेदितिसिद्धांतभाष्ये=१

पत्यशब्दादेव गार्हपत्यप्रत्यये सिद्धे तत्प्रत्ययार्थमेनमिति वचनं सर्वावस्थस्य गार्हप
त्यानुगमने मंथने नैवोत्पत्तिः । एवंरूपा च सेति ज्ञापनार्थं । तुशब्दादप्ययमर्थो यतो
तो गार्हपत्यमनुगतं मंथनेनैवोत्पादयेत् । ध्रियमाणआहवनीये यं विशेषः तं चानु
गमयेदिति । अवक्षामाणि मंथनसमर्थानि काष्ठानि । क्षामाभावे भस्मना रणीसंस्प
र्श्य मंथयेदितो जज्ञे प्रथममेभ्यो योनिभ्यो अधिजातवेदाः । स गायत्र्या त्रिष्टुभा जग
त्यानुष्टुभा च देवेभ्यो हव्यं वहन्नः प्रजानन्निति । मंथनसमर्थक्षामाभावे भस्मनार
णीसंस्पृश्य लेपयित्वा ततो मंथयेत् । इतो जज्ञ इति मंत्रेण । मंथयेदिति णिच्प्र
योगात्स्वकृते कर्मणि यः कर्ता स एव मंत्रं ब्रूयात् । ये केचन समर्था मंथयेयुरित्येव
मवगम्यते । अरणीमंथन एवायं मंत्रो नावक्षाममंथने । यद्युभयोरभिप्रेतः स्यात्
उभयत्रापि इतो जज्ञ इति मंथनमंत्रो भवतीति सिद्धांतभाष्ये = २

श्रौ०सू०३ मथित्वा प्रणीयाहवनीयमुपतिष्ठेताग्ने सम्राळिषे राये रमस्व सहसे द्युम्नायोर्जेपत्याय॥
१२७ सम्राळसि स्वराळसि स्वारस्त्वतो त्वो सोम्यावतामन्नाद्यं त्वा न पत्यायादधे इति। मथित्वेति
वचनं इतो जत्त इत्यस्य प्रणयनं मंत्रत्वशंकानिवृत्त्यर्थं। अत एव केचित्प्रणायं त्यन्वाहार्यसद
क्षिणं। अत्रैव विषये अयं द्वितीयः कल्पः। ध्रियमाण आहवनीये गार्हपत्यानुगमने स
ति अत एवाहवनीयाद्गार्हपत्यमुद्धृतादन्यमाहवनीयं प्रणायंत्येके। तथा सति दक्षिणाग्नि
रप्यनुहर्तव्यः। सह भस्मानं वा गार्हपत्यायतने निधायाथ प्रांचमाहवनीयमुद्धरेत्। इदम
पि कल्पांतरं। आहवनीयमुद्धरेदित्येतावतैव सिद्धे प्रांचमिति वचनं आहवनीयात्प्रत्यंचं
गार्हपत्यं प्रणीयापि विहारसिद्धिरिति इदमपि कल्पांतरमिति ज्ञापनार्थं। एते चत्वारः पक्षाः १२७
ब्राह्मणे समुद्दिष्टाः। तत्र निंदा विध्यंतरस्तुत्यर्था। अतः सर्वेषां क्वचिच्छाखांतरे विधानम

प्रथमं। पृष्ठ्यंछंदोमांश्चांतरासर्वस्तोमोतिरात्रः। दशरात्रस्य यः पृष्ठ्यः तस्मादूर्ध्वंछंदोमे
भ्यः पुरस्तात्सर्वस्तोमोतिरात्र भवंति। तेन तानि त्रयोदशाहानि भवंति। न्यायकॢप्तं व्रतवंतं
प्रतिष्ठाकामाद्द्वितीयं उपेयुरिति शेषः। पूर्वोक्तंन्यायेन कॢप्तं महाव्रतवंतमित्यर्थः। त्रीणि
चतुर्दशरात्राणि सार्वकामिकं प्रथमं। सर्वेकामा अस्य प्रयोजनमिति सार्वकामिकं। द्वौ पृ
ष्ठ्यावावृत्त उत्तरः। आवृत्तो विपर्यस्त इत्यर्थः। प्रायणीयोदयनीभ्यां चतुर्दश संपद्येते। त
ल्पे वोदके वा विवाहे वा मीमांस्यमानाद्द्वितीयं। तल्पः शयनं। उदकं उदकक्रियादिदानादि
कार्यं विवाहो योनादि संबंधः। एवमादिषु कार्येषु ये योग्याः योग्यतया शक्यं तेते द्वितीयं
चतुर्दशरात्रमुपेयुः। पृष्ठ्यमभितस्त्रिककुद्का। अनावृत्त इत्यनुवर्तते। नोत्तरेत्रिककु
का आवृता इति गम्यते। प्रायणीयोदयनीयौ चतुर्दशत्वं। न्यायकॢप्तं ब्रह्मोपजननं प्रतिष्ठा

भ्यां

स०वृ०उ४ मास्तृतीयं। न्यायकॢप्तं द्व्यहोपजननमिति दशरात्रस्त्वानुरसज्ञो आसुषीभवत इत्यर्थः। चत्वारि पं
१३६ चदशरात्राणि। देवत्वमीसतां प्रथमं। प्रथमस्य चतुर्दशरात्रस्य षष्ठ्यमध्ये महाव्रतं। अत्रा
136 हः कल्पनं प्रथमे चतुर्दशरात्रे योन्यहानि तान्येव। विशेषस्तु षष्ठ्ययोर्मध्ये महाव्रतमधि
कं भवति। ब्रह्मवर्चसकामाद्द्वितीयं। द्वितीयस्य चतुर्दशरात्रस्याग्निष्टुत्सायणीयादनंतरः।
द्वितीयस्य द्वितीयाहान्येवाविशेषश्चाग्निष्टुद्द्वितीयेस्य महर्भवति। यात्राहीनिकाउभौ लो
कावास्यंतां तृतीयं। सत्रेण प्राप्यः सात्रः। अहीनेन प्राप्य आहैनिकः ताउभौ लोको प्राप्नु
मिच्छतां तृतीयं पंचदशरात्रं भवति। उभयोर्लोकयोः सर्वान्कामानुपयुज्यत तो ब्रह्माणि
प्रविलयमिच्छतीत्यर्थः। तृतीयस्य चतुर्दशरात्रस्याग्निष्टुत्सायणीयस्थाने न्यायकॢप्तस्त्र्य १३६
होपजननः शेषः। तृतीयस्य चतुर्दशरात्रस्यैत्येवावृतः प्रयोजनं नाविभ्रमः। अग्निष्टुत्सायणी

यस्त्वानेन्यायक्लृप्तं त्र्यहोपजनं शोभ इत्येतावतैवाहः क्लृप्तेः पर्याप्तत्वात्। अत्राहानि अग्निष्टु
त्त्रिकद्रुकद्रुकाद्दशरात्रोतिरात्र इति। न्यायक्लृप्तं त्र्यहोपजनं प्रतिष्ठाकामाश्चतुर्थं प्रायणी
यस्त्रिकद्रुकाद्दशरात्र उदयनीय इति। षोळशरात्रं चतूरात्रोपजननमन्नाद्यकामाः। प्रायणीय
स्त्रिकद्रुकाद्दशरात्रो महाव्रत उदयनीय इति। सप्तदशरात्रं पंचरात्रोपजनं पशुकामाः। अ
तिरात्रोभिप्लवपंचाहो दशरात्रोतिरात्र उत्तमस्य तु षष्ठ्यास्तृतीयसवनमिति एवं पंचाहो भ
वति। अष्टादशरात्रमायुष्कामाः। अतिरात्रोभिप्लवः षळहो दशरात्रोतिरात्रः। षळहस्था
न पूर्यते। सतंत्रस्योपजननं वक्ष्यामः। अष्टादशरात्रं प्रकृतिकत्वा उत्तरेष्वावापः कर्तव्य
इत्यर्थः। एकान्नविंशतिरात्रमेकरात्रोपजनं ग्राम्यानारण्यान्पशूनवरुरुत्स्यमानाः। ग्रा
म्यान्पशूनारण्यांश्च पशूनवरोद्धुमिच्छंत इत्यर्थः। विंशतिरात्रं प्रतिष्ठाकामा अग्निष्टुच्च

जितावभिप्लवादूर्ध्वं। अस्मिन्नेव स्थाने अभिजिद्विश्वजितो गो आयुषोर पवादः। षळह
दूर्ध्वमित्यत्र वचनाद सति वचने प्रायणीयादतिरात्रादूर्ध्वं आवापस्थानं भवति। प्रायणी
योदयनीयो तावत्सत्राणां प्रत्येकं तंत्रीभूतो नेतरेतरयुक्तौ द्वादशाहाहीनयोर्दशरात्र सं
घातरूपेपो वतंत्रीभूतौ नैकैकशो न षळहानामपि तंत्रीभावे दशरात्रेणासहैवेति कृत्वा
प्रायणीयोदयनीययोरेव ऊर्ध्वमधस्ताच्चावापस्थानमसति वचन इति सिद्धं॥२॥ द्वावेक
विंशतिरात्रौ। प्रतिष्ठाकामानां प्रथमं। त्रयाणामभिप्लवानां प्रथमावंतरातिरात्रः। प्राय
णीयस्त्रयोभिप्लवाः षळहा उदयनीयः प्रथमयोः षळहयोर्मध्ये ज्योतिष्टोमोतिरात्रः इत्ये
कविंशतिरहानि। ब्रह्मवर्चसकामाद्द्वितीयं नवरात्रस्याभिजिद्विश्वजितास्थाने द्वौ दृष्ट्या

वावृत्त उत्तरः। नवरात्रे यावभिजिद्विश्वजितौ यास्थाने द्वौ दृष्ट्या भवतः। तयोरुत्तर आवृ

तोभवति। अतिरात्रः पृष्ठ्यः स्वरसामो विषुवानावृताः स्वरसामान आवृत्तः पृष्ठ्य उदयनी

यइति। संवत्सरसंमिता इत्याचक्षते। विषुवन्मध्यत्वादिना संवत्सरसाम्यादेवता रात्रीः

संवत्सरसंमिता इत्याचक्षते सर्वे यतिकाः। द्वाविंशतिरात्रं चतूरात्रो पजनमन्नाद्यकामाः॥

प्रायणीयस्त्रिकद्रुका अभिप्लवो दशरात्रो महाव्रतमुदयनीयः। त्रयोविंशतिरात्रं पंचरा

त्रोपजनं पशु[illegible] कामाः। प्रायणीयो [illegible] भिप्लव पंचाहो भिप्लवो

दशरात्र उदयनीयः। द्वौ चतुर्विंशतिरात्रौ प्रजातिकामाः पशुकामा वा प्रथमं। प्रायणीयो

द्वावभिप्लवौ दशरात्र उदयनीयः। षळहश्चात्र पर्यते। स तं च स्योपजनं वक्ष्यामः। स्वर्गे लोके

सत्स्यंतो ब्रध्नस्य विष्टपं रोक्ष्यंतो द्वितीयं। सत्स्यंत इति पदे रिदं स्वत्वं तस्य रूपं। स्वर्गे प्राप्ति

प्राप्ति मिच्छंत इत्यर्थः। ब्रध्नस्य विष्टपं रोक्ष्यंतः। आदित्यस्य मंडलमारोढु मिच्छंत इत्यर्थः।

स०वृ०उ४ इदं वा इदं वा इछतां द्वितीयं चतुर्विंशतिरात्रं भवति। वाशब्दस्याभावेपि इष्यमाणभेदात्॥
१३८ पृष्ठ्यस्तोमस्त्रयस्त्रिंशो निरुक्तो विशालः पृष्ठ्यस्तोमा एकविंशास्त्रिणव[illegible]त्रयस्त्रिंशाः
138 प्रतिलोमाः पूर्वस्मिंस्त्र्यहेनुलोमा उत्तरस्मिन् स विशालोपि वोत्तर एव त्र्यहः प्रतिलोमो
नुलोमश्चानिरुक्तमहराहृत्तः पृष्ठ्यस्तोमः। तस्येदमहः कल्पनं। पृष्ठ्यस्तोमो नाम वैरू
पादीनामभावे पृष्ठ्यस्तोम इत्युक्तं। पृष्ठ्याविशेषस्त्रयस्त्रिंशो निरुक्त एकाहस्त्रयस्त्रिंशो
निरुक्त एकाहस्त्रयस्त्रिंशस्तोमः कर्तव्य इत्यर्थः। विशालः पृष्ठ्य इति पृष्ठ्य एव विशाल
गुणः कर्तव्य इत्यर्थः। विशालस्वरूपप्रदर्शनार्थोयं ग्रंथः। स्तोमा एकविंशास्त्रिणवत्रय
यर्हे स्त्रिंशा इत्यादि स विशाल इत्येतत्सर्यं ततः। पृष्ठ्यस्योत्तरे ये स्तोमा एकविंशास्त्रिणवत्रयस्त्रिं १३८
शास्ते पूर्वस्मिंस्त्र्यहे प्रतिलोमाः कर्तव्याः त्रयस्त्रिंशास्त्रिणवैकविंशा इति। एत एवोत्तरेत्र्य

हनुलोमाः कर्तव्या। एकविंशास्त्रिणवत्रयस्त्रिंशा इति सपृष्ठ्य एवं कृते विशालो भवतीत्यर्थः।
एवं विशालः पृष्ठ्यस्योत्तर एव त्र्यहः प्रतिलोमाश्चानुलोमाश्च कर्तव्य इत्यर्थः। न पूर्वत्र्यहः क
र्तव्य इति। यः पुनरप्यनिरुक्त एकाहस्त्रयस्त्रिंशस्तोमा एव। पृष्ठ्यस्तोमश्चावृत्तः पुनरपि
कर्तव्यः। त्रिवृदनिरुक्तः। स एवानिरुक्त एकाहः पुनस्त्रिंशस्तोम एव। पृष्ठ्यस्तोमश्चावृत्तः
पुनरपि कर्तव्यस्त्रिवृदनिरुक्तः स एवानिरुक्त एकाहः पुनस्त्रिवृत स्तोमः कर्तव्यः। ज्यो
तिरुभयसाम। ज्योतिष्टोमोग्निष्टोम उभयसामा कर्तव्यः। तत उदयनीयोतिरात्रः। प्रा
यणीयः पृष्ठ्यस्तोमस्त्रयस्त्रिंशो निरुक्तो विशालः पृष्ठ्यो निरुक्तस्त्रयस्त्रिंशा आवृत्तः
पृष्ठ्यस्तोमास्त्रिवृदनिरुक्तो ज्योतिष्टोमोग्निष्टोमोतिरात्र इति। संसदामयनमित्येतदु
च्यते। पंचविंशतिरात्रमेकरात्रोपजननं नाद्यकामाः। षाड्विंशतिरात्रं द्विरात्रोपजननं

स०ब्रा०३ ४
१३६
139

प्रतिष्ठाकामाः सप्तविंशतिरात्रं त्रिरात्रोपजनमृद्धिकामाः। अष्टाविंशतिरात्रं चतूरात्रोप
जनं ब्रह्मवर्चसकामाः। एकान्नत्रिंशद्रात्रं पंचरात्रोपजनं परमां विजितिं विजिगीषमाणाः।
त्रिंशद्रात्रमन्नाद्यकामाः षळहश्चात्र पूर्यते स तत्र स्योपजनं वक्ष्यामः। एकत्रिंशद्रात्र
मेकरात्रोपजनमन्नाद्यकामाः। द्वात्रिंशद्रात्रं द्विरात्रोपजनं प्रतिष्ठाकामाः॥३॥ त्रीणि
त्रयस्त्रिंशद्रात्राणि। प्रतिष्ठाकामानां प्रथमं। त्रयाणामभिप्लवानामुपरिष्टादुपरिष्टाद
तिरात्रः। येत्र योभिदशरात्रेण सह तंत्रीभूताः तेषामेकैकस्योपरिष्टात्सकृतोतिरात्रः
कर्तव्यः। ब्रह्मवर्चसकामा द्वितीयं। चतुर्णां पंचरात्राणामावृत्तमः। उत्तमो चांतरास
र्वस्तोमोतिरात्रः। षळहा पर्वाः। पंचाहश्चत्वारः। तेषां चतुर्थ आवृत्तः। अंत्ययोर्मध्ये स
र्वस्तोमोतिरात्रः प्रायणीयोदयनीयो दशरात्रश्चेति। उभौ लोकावास्य नांतृतीयं। ष

६ १३६

ष्णां पंचरात्राणां मध्ये विश्वजिदतिरात्रः। न्यायापवादः। षट् पंचाहास्तेषां मध्ये विश्वजि
दतिरात्रः। आवृत्तास्तूत्तरे त्रयः। तेषां पंचाहानामुत्तरे त्रयः पंचाहा आवृत्ता भवेयुः। प्राय
णीयोदयनीयो चेति। चतुस्त्रिंशद्रात्रं चतूरात्रोपजननं मनाद्यकामाः। अतिरात्रस्त्रिककु
कास्त्रयोभिप्लवा दशरात्रो महाव्रतमतिरात्रः। पशुकामानामुत्तराणि चत्वारि पंचत्रिं
शद्रात्रः पंचरात्रोपजननः। अतिरात्रोभिप्लवं पंचाहस्त्रयोभिप्लवा दशरात्रोतिरात्रः। ष
ड्विंशद्रात्रे षडहउपजायते। सतंत्रस्योपजननं वक्ष्यामः। सप्तत्रिंशद्रात्र एकरात्रोपजननः।
अतिरात्रश्चत्वारोभिप्लवा दशरात्रो महाव्रतमतिरात्रः। अष्टात्रिंशद्रात्रो द्विरात्रोपजननः।
एकान्नचत्वारिंशद्रात्रं त्रिरात्रोपजननमनं तां श्रियमिच्छतः। चत्वारिंशद्रात्रं चतूरात्रोपजननं
रमायां विराजि प्रतितिष्ठंतः। एकचत्वारिंशद्रात्र प्रभृतीन्युत्तराणि न्यायेनाष्टाचत्वारिं

सू०वृ०उ४
१४०

शद्रात्रात् । पंचाशद्रात्रप्रभृतीनि चाषष्टिरात्रात् । द्विषष्टिरात्रप्रभृतीनि चैकोनशतरात्रात् ।
एतानि सूक्तत्रयोक्तानि न्यायकॢप्तान्येव । तत्रैकरात्रचतूरात्रोपजनानि भवंति ॥ ४३ ॥ इ
दमपि न्यायप्राप्तमेव वचनं प्रयोजनं शास्त्रांतरे महाव्रतापवाद उक्तः । तथाप्यस्माकं महा
व्रतमेवेति प्र[illegible]दर्शनार्थं । एकान्नपंचाशद्रात्राणि एकषष्टिरात्रं शतरा
त्रं शतरात्रं च विशेषेण वक्ष्यति । शतरात्रपर्यंते न्यायकल्पनेनैव कल्पयितव्यं ॥ ४४ ॥ स
र्वैकान्नपंचाशद्रात्राणि विपाप्मनावत्स्यंतः प्रथमं पाप्मना व्यावृत्तमिच्छंत इत्यर्थः ।
त्रि अतिरात्रस्त्रीणि चृंत्यहान्यतिरात्रो दश पंचदशान्यतिरात्रो द्वादश सप्तदशान्यतिरा
त्रः । पृष्ठ्योऽतिरात्रो द्वादशैकविंशान्यतिरात्रः । षट्त्रिंशत्स्याहृता एव । अन्यानि त्रिचत्वा १४०
रिंशदहानि तेष्वेकोऽग्निष्टोमसंस्थः एकः षोडशिसंस्थः । उक्थ्या इतर इति तदर्थमिदमा

हा॥ त्रिवृतां प्रथमोऽग्निष्टोमः। षोळशस्तुत्तमः पंचदशानां। उक्थ्या इतरे विधृतय इत्याचक्षते।
एता रात्री विधृतय इत्याचक्षते वैदिकाः। यमातिरात्रं यमां द्विगुणामिवाश्रियमिछंतः॥
यमातिरात्रं नाम एकान्नपंचाशद्रात्रं तत्त उपेयुर्ये द्विगुणीकृतां यममिवाश्रिय मिछंतः।
अतिरात्रौ द्वावभिप्लवावभिजिद्विश्वजितावतिरात्रावेकाभिप्लवः सर्वस्तोम नवसप्त
दशावतिरात्रौ महाव्रतं। पंचाभिप्लवाः षड्ढातिरात्रा उक्थाः। महाव्रतं चाप्रायणीयो द्वाव
भिप्लवावतिरात्रौ द्वावभिप्लवावतिरात्रौ एकोभिप्लवो द्वावतिरात्रौ दशरात्रो महाव्रतमु
दयनीय इति। सत्रानां श्रैष्ठ्यकामास्तु तीयं चतुर्णां पृष्ठ्यानामेकैकं नवकृत्वः। पृष्ठ्यस्या
ऽतिश्चत्वार्यहानि गृहीत्वा तेषामेकैकं नवकृत्वः कर्तव्यं। तानि षट्त्रिंशदहानि भवंति।
नववर्गाणां प्रथम षष्ठ सप्तमोत्तमान्यहान्यग्निष्टोमाः। एकैकस्य नववर्गस्य प्रथमष

सं०वृ०उ४
१४१

ष्टसप्तमोत्तमान्यहान्यग्निष्टोमाः।अग्निष्टोमसंस्थाइत्यर्थः।उक्थ्याइतरेमहाव्रतं।महाव्र
तंचभवंति।प्रायणीयोदयनीयाभ्यांदशरात्रेणचपूर्यते।सवितुःककुभइत्याचक्षते।एता
रात्रीःसवितुःककुभइत्याचक्षते॥५॥त्रयाणामुत्तरेषांन्यायक्लृप्ताअभिप्लवाःसप्तक्ल
प्तयोगताः।चतुर्थपंचमषष्ठानांन्यायक्लृप्ताअभिप्लवावेदितव्याः।न्यायक्लृप्तवचनंप्रा
यणीयोदयनीयदशरात्राणामबाधनार्थं।अतःषडहाभिप्लवावेदितव्याः।प्रथमस्य
तूर्ध्वंचतुर्थात्सर्वस्तोमोतिरात्रः।प्रथमस्येतित्रयाणांप्रथमस्येत्यर्थः।तस्याचतुर्थाद
भिप्लवादूर्ध्वंसर्वस्तोमोतिरात्रःकर्तव्यः।तेनचाहःसंख्यापूर्यते।तुशब्दादयस्तत्रविशे
षइतिगम्यते।उपसत्सुगार्हपत्येगुग्गुलुसुगंधितेजनपैतुदारुभिः।पृथक्सर्पिर्भिवि
पच्यानुसवनंसन्नेषुनाराशंसेष्वांजीरंनभ्यंजीरंश्च।उपसत्कालेयस्मिन्कस्मिंश्चित्

प्त

जनीया इति संज्ञा। एता एव प्रतिष्ठाकामानामांजनाभ्यंजनवर्जं। त्रयाणां प्रथममुच्यते प्रतिष्ठाकामानामांजनाभ्यं

अहनि गार्हपत्ये गुग्गुलादिभिस्त्रिभिस्त्रीणि सर्पींषि एकैकेन एकैकं सर्पिः पृथक् पृथक्
कृत्वा तदनु सवनं संनेशुनाराशंसेषु आंजीरन्नभ्यंजीरंश्च। गोलालवे प्रातःसवने। सौ
गंधिकेन माध्यंदिने पैतुदारणे तृतीयसवन इति। येवर्चसा न भायुर्ये वात्मनं नैव जानी
रंस्त एता उपेयुः॥ न भायुर्न दीप्येरन्नित्यर्थः। आत्मानं न व्यजानीरन् कस्यान्वये वयमुत्प
न्ना इति। तदुभयो[illegible]रेता रात्रीउपेयुः। आंजनाभ्यंजनीया इत्याचक्षते। एतासामांज
नाभ्यंजने च वर्चयित्वा एता एवेति वचनमहरहताकृतं नान्यत्। एतासामेव सर्वस्थाने स्तोम
महाव्रतं। अयमेवात्र विशेषः। अत ऊर्ध्वं चतुर्थादभिप्लवान्महाव्रतं भवति। ऐंद्रमत्य
न्याः प्रजा बुभूषंतः। उपेयुरिति शेषः। एतासामेव सर्वस्तोममुत्कृत्य यथास्थानं महाव्र
तं। यथास्थानमिति दशरात्रादूर्ध्वमित्यर्थः। संवत्सरकामानां स्मृत उत्तमां इदानीं सप्तम

सू० ह० उ४ मुच्यते। संवत्सरकामा गवामयनकामा इत्यर्थः। अतिरात्रश्चतुर्विंशं त्रयोभिप्लवा नवरात्रो
१४२ भिप्लवो गो आयुषी दशरात्रो व्रतमतिरात्रः। सर्वं प्रत्यक्षोक्तं। संवत्सरसंमिता इत्याचक्षते।
142 विषुवन्मध्यत्वादिना संज्ञाप्रवृत्तिः। एकषष्टिरात्रं प्रतिष्ठाकामाः। एतासामेव षट्ष्याव
भितो नवरात्रं। अनंतरोक्तो यो नवरात्रः तमभितः षट्ष्यो कर्तव्यो। तयोरावृत्तउत्तरः। त
योरुत्तर आवृत्तो भवति। शतरात्रमायुष्कामाश्चतुर्दशाभिप्लवाश्चतुरहो पजनाः प्राय
णीयस्त्रिकद्रुकाश्चतुर्दशाभिप्लवा दशरात्रो महाव्रतमुदयनीय इति। इति रात्रिसत्रा
णि। इत्येवंप्रकाराणि रात्रिसत्राणि समाम्नातानि च बहूनि संतीत्यर्थः। ६॥ अथ गवाम
यनं सर्वकामाः। अथशब्दः प्रकरणविच्छेदार्थः। रात्रिसत्राण्युक्तानि। अथेदानीं सांवत्स १४२
रिकाणां प्रकृतिभूतं गवामयनमुच्यत इति। सर्वे कामा येषां ते सर्वकामाः। ते गवामयन

२ मुपेयुः। प्रायणीय चतुर्विंशे उपेत्य चतुरोभिप्लवान्पृष्ठ्यं पंचमान्यं च मासानुपयंति उपेत्ये
ति वचनं प्रायणीय चतुर्विंशयोः प्रथम एव मासे प्रयोगसिध्यर्थं इतरथा आद्याभ्यां पूर्य
ते हो भ्यामिति पृष्ठस्याद्याभ्यां पूरणवचनात्पृष्ठ एवानयोः प्रयोगोपि स्यात्। तन्मासावयव
ता च। तथा सति हतिवातवतोरयने प्रायणीय चतुर्विंशयोस्त्रयस्त्रिंशत्स्तोमता स्यात् तन्
मा भूदिति उपेत्येति वचनं। तेन प्रथम एव मासे आदित एव प्रयोक्तव्ये। प्रथमावय
वत्वाय। अतो हतिवातवतोरयने त्रिवृत्स्तोमता तयोः सिद्धा भवति। अथ षष्ठं संभरंति।
चतुर्भिरभिप्लवैः पृष्ठ्येन चैवोन पंचमासान्कृत्वा अनंतरं षष्ठं मासं संभरंति नानाहो
भिः। त्रीनभिप्लवान्पृष्ठ्यमभिजितं स्वरसाम्न इति। अतोष्टाविंशतिरहानि भवंति। आ
द्याभ्यां पूर्यते हो भ्यां। एतदुक्तं भवति। आद्याभ्यां प्रथमान्मासादुत्कृष्य निर्णयः। त्रिणव

सू०वृ०३४ १८३ 143

त्रयस्त्रिंशेऽह्नि अहनी द्वितीयं मासं प्राप्नुतः। ताभ्यां ततो द्वे ताभ्यां ततो द्वे इत्येवं परंपरया षष्ठं
मासं प्राप्नुतः। एवं ताभ्यां तस्य पूरणमिति। इति नु पूर्वपक्षः। अयं पक्षः शब्दः सकारान्तो नपुं
सकलिंगः। पक्ष इव पक्षः यथा शालायां द्वे पक्षसी एवं गवामयनस्य पक्षसी यथा शाला
यां मध्यमो वंशः। एवमस्य विषुवान्निश्रूयते। अथ विषुवानेकविंशः। एकविंशस्तोम
इत्यर्थः। न पूर्वस्य पक्षसो नोत्तरस्य। सोयं विषुवान्न पूर्वस्य पक्षसो हरिति गण्यते। नो
त्तरस्यापीत्यर्थः। अथोत्तरं पक्षः। वक्ष्य इति शेषः। इदमपि सूत्रमत्रास्तीति तत्र पठित

स्य
स्ये

व्यं। आवृत्ताः स्वरसामानः षडहाश्चोत्तरं पक्षः। आवृत्तिः अत्रैवं भवति। स्वरसाम सू स
त्रमादि प्रथम त्र्यंषडहेषु त्र्यादिरभिप्लवां तेष्वहरावृत्तिरपि भवति। षष्ठादि प्रथमाता १८३
हरावृत्तिः समुच्चयार्थश्च शब्दः। स्वरसाम्नो विश्वजितं पृष्ठ्यं त्रीनभिप्लवानिति सप्त मं द्विरा

त्रोनं कृत्वाथ पृष्ठ्यमुखांश्चतुरभिप्लवांश्चतुरो मासानुपयंति। सप्तमस्याद्विरात्रोनत्वेसि
द्धेपि द्विरात्रोनत्ववचनमष्टमादिषु पंचसु मासेषु येअग्र्येअहनीत्वह्नेत्वे पूर्वस्यपूरणत्व
मपिकुरुत इत्येतस्य सिध्यर्थं। अथोत्तमं संभरंति। त्रीनभिप्लवान्गोआयुषी दशरात्रं प्र
तोदयनीयाभ्यां सप्तमः पूर्यते। वीचीतरंगन्यायेनेत्युक्तं। अतो प्रतोदयनीउत्तमां गमे ये
वेतिसिद्धं। इतिन्वेकसंभार्यमुत्तरं पक्षः। एकोमासो यस्मिन्पक्षास्ति संभार्यते तदेकसंभा
र्यपक्षः। तुशब्दः सर्वत्रोत्तरविवक्षार्थः। अथ[illegible]द्विसंभार्यं। अथद्विसंभार्यपक्षउच्य
ते। प्रथमस्य। प्रतोदयनीये एवोत्तमस्य। गोआयुषी सप्तमस्य। प्रतोदयनीये उत्तमसां
ते भवत इति सिद्धमेतत्। तस्य वचनमुत्तमविवक्षार्थं। गोआयुषोः। सप्तमसंबंधवि
धानार्थं। ते च गोआयुषी सप्तमस्यांत एव भवतः। तस्याद्विरात्रोनत्वात्। प्रतसंबंधात्।

स॰ सू॰ उ५ १४४

144

गोसंबंधान्गो आयुषोः संबंधाच्च संभार्यत्वं द्वयोर्मासयोः। गोआयुषी वा विहरेयुः। एवं वाद्वि
संभार्यमुत्तरं पक्षः। गोआयुषोर्विहरेण द्वयोर्मासयोर्विहारपक्षे तयोस्स्थानमाह। गां विश्व
जितोनंतरं। सप्तमे मासे विश्वजितोनंतरं गामुपेयुः। आयुषं पूर्वं दशरात्रात्। उत्तमेमा
से दशरात्रात्पूर्वमायुषमुपेयुः। अपि वोर्ध्वं विश्वजितः सप्तमं सवनमासं कृत्वोद्धरेयु
र्गोआयुषी दशरात्रं वा। अथवायमन्यः प्रकरथोत्तरस्य पक्षस्य: स्वरसाम विश्वजितमु
पेत्य ततऊर्ध्वं सप्तममपि सवनमासमुपेयुः। पृष्ठ्याभिप्लवाहोभिः कृतो मास सवन
मास उच्यते। विश्वजितऊर्ध्वं सप्तममपि। मासं पृष्ठ्यमुखैश्चतुरभिप्लवैः कुर्वतीत्यर्थः।
पूर्वमेवाष्टमाद्यश्चत्वारो मासाः। षडहैरेव सिध्या आसते। एवं स्थिते सप्तमे मासे चत्वा
र्यहान्यतिरिक्तानि तानि वीचीतरं गंन्यायेन उत्तमं मासं गमयितव्यानि। तेष्वागच्छेत्तम ते

मासेषष्ठहान्यतिरिच्यंते। तत्र गो आयुषीषष्ठहंचोत्सरेयुः। एवमयंमासः षष्ठहोनोभ
वति। तत्रषष्ठहार्थेभिप्लवः षष्ठह इति आवापेक्ते पूर्वोभवति। अपिवोत्तरस्यपक्षस्यो
हान्येवावर्तेरन्ननुलोमाः षष्ठहास्युः षष्ठहावावर्तेरन्ननुलोमान्यहानि। आवृत्तास्वरसा
मानइत्येतस्मिन्सूत्रेउभयावृत्तिरुक्ता। इदानींषष्ठहावृत्तिर्वोभयवृत्तिर्वेतिविकल्पउच्य
ते। तेनोभयावृत्तिः पूर्वोक्ता॥ इतिगवामयनं। एवंप्रकारंगवामयनंभवत्यस्माकं। अन्येषा
मन्येप्रकाराः संति। सर्वेवाषष्ठहा अभिप्लवास्युरभिप्लवास्युः। येत्रषष्ठहाः सर्वेतेअभि
प्लवाएवभवंति। नपृष्ठ्याइत्यर्थः। सर्वग्रहणं पूर्वपक्षस्यापिप्रापणार्थं॥ ७॥ ॥
इत्याश्वलायनश्रौतसूत्रवृत्तौनारायणीयायामेकादशोध्यायः॥ ११॥ हरिः ॐ ॐ म्॥ ॥
गवामयनेनादित्यानामयनंव्याख्यातं। गवामयनंनामसांवत्सरिकंसत्रमुक्तं। इदानीमा

स्०सू०उ ६
१८५

145

दित्यानामयनंनामसत्रमुच्यते। तद्गवामयनेनव्याख्यातं। गवामयनेनादित्यानामयनमित्ये
तावतैव अतिदेशेसिद्धे। यद्व्याख्यातवचनंकरोतितज्ज्ञापयति आचार्यः गवामयनेयावंते
गवामयनविकल्पाउक्तास्तेषामत्राविरोधिनांप्राप्तिरस्तीतिविविधमाख्यातंव्याख्यात
मित्यर्थः। सर्वेत्वभिप्लवास्त्रिवृत्पंचदशाः। अत्रविशेषाउच्यंतेयेत्राभिप्लवास्तेसर्वेत्रिवृ
त्पंचदशस्तोमाः कर्तव्याः प्रथमंत्रिवृत्स्तोमंद्वितीयंपंचदशस्तोमंतृतीयंत्रिवृत्स्तो
ममित्येवमहरहरनुक्रमेणसर्वेष्वभिप्लवेष्वेतेस्तोमौकर्तव्यौ। एवंकृतेसर्वेभिप्लवास्त्रि
वृत्पंचदशस्तोमाःकृताभवंति। मासाश्चपृष्ठ्यमध्यमानव। षष्ठसप्तमोत्तमान्वर्जयि
त्वावशिष्टायेनवमासास्तेसर्वेपृष्ठ्यमध्यमाःकर्तव्याः। गवामयनेतावत्पूर्वस्मिन्पक्ष   १८५
सिपृष्ठ्यांताःपंचमासउत्तरस्मिन्पक्षसिपृष्ठ्यादयश्चत्वारोमासास्तेसर्वेस्मिन्सत्रेपृष्ठ्य

मध्यमाः कर्तव्या इत्यर्थः। नवग्रहणं षष्ठसप्तमान्वर्जयित्वेति वचनं तन्मासत्वकारितं नु
नुसावनत्वकारितमित्येवमर्थं। तेनापि वोर्ध्वं विश्वजित इत्यस्मिन्पक्षे सप्तमस्य सावनत्वे
पि पृष्ठ्यमध्यत्वं तस्य न भवति। बृहस्पतिसवेन्द्रस्तुतौ चाभिजिद्विश्वजितौ स्थाने। अयं च
विशेषो भवति। सप्तमस्य च मासस्योत्तमयोरभिप्लवयोः स्थाने त्रिवृद्व्यूढो दशरात्र उ
द्भिद्वलभिदौ च। सप्तमस्य च मासस्य ये त्र्योभिप्लवास्तेषां यावुत्तमाभिप्लवौ तयोः स्था
ने त्रिवृत्स्तोमको व्यूढो दशरात्र उद्भिद्वलभिदौ च द्वे अहनी इत्येतानि द्वादशाहानि भवं
ति। उत्तमस्य च मासस्यादौ येऽभिप्लवास्त्रय उक्त्वा तेषां मध्यममथ स्युः पृष्ठ्यमध्यमाः।
उत्तमस्य मासस्यादौ ये त्र्योभिप्लवास्तेषां मध्यममभिप्लवमुक्त्वा तस्य स्थाने पृष्ठ्यः क
र्तव्यः एवं कृते पृष्ठ्यमध्यमा भवंति एवं कर्तव्यमित्यर्थः। समूढो दशरात्रः। उत्तमएव

मासयोर्व्यूढोदशरात्रः सत्राणां प्रकृतित्वेन प्रविशाति तस्य स्थाने समूढोदशरात्रः कर्तव्य
मित्यर्थः ॥१॥ आदित्यानामयनेनांगिरसामयनं व्याख्यातं । अंगिरसामयनमिति सत्रना
म । अन्यत्सर्वमुक्तं । त्रिवृत स्त्वभिप्लवाः सर्वे । अग्निये भिप्लवास्ते सर्वे त्रिवृत्स्तोमाः । कर्त
व्या इत्यर्थः सर्वग्रहणं पक्षद्वयवत्त्मास संग्रहार्थं । पृष्ठ्यादयश्चाद्या मासाः पंच पूर्वस्य
पक्षस्य । पूर्वपक्षसोय आद्याः पंच मासास्ते पृष्ठ्यादयः कर्तव्याः । चत्वारस्तूत्तरस्य पृ
ष्ठ्यांताः । अष्टमादयः । उत्तरस्य पक्षे सोये ष्टमादयश्चत्वारो मासास्ते पृष्ठ्यांताः कर्त
व्याः । उत्तमस्य च मासस्यादौ ये षळहास्त्रयः पृष्ठ्यांता एव तेपि स्युः । उत्तरस्य पक्षस
उत्तमो यो मासस्तस्यादौ ये त्रयः षळहास्तेषामंत्यः षळहः पृष्ठ्यः कर्तव्यः । एवं कृते ते

षड्ढ्यूहाः पृष्ठ्यांतास्युरित्यर्थः । पूर्वौ स्यातामभिप्लवौ । यावत्र व्यूढो षडहो आदित्या

नामयने अभिप्लवश्च पृष्ठ्यश्चैतौ चात्राभिप्लवौ च भवतः। न तयोरन्यतरः पृष्ठ्यः षडह
इत्यर्थः॥ २॥ इति वातवतोरयनं। एतन्नामकं सत्रमिदानीमुच्यत इत्यर्थः। व्रतं विषुवत्स्था
नेइत्यनेन गवामयनं प्रति तत्सिद्धे प्रायणीयोपि सिद्ध एव पुनर्वचनस्येदं प्रयोजनं प्राय
णीयस्य स्वस्तोमासिद्धिर्यत्पुनरिदमुक्तं। प्रायणीयश्चतुर्विंशे उपेत्येत्यपेत्यवचनसा
मर्थ्यात्प्रायणीयचतुर्विंशयोस्त्रिवृत्स्तोमत्वमिति तस्यास्य चानिवेशः कर्तव्यः यदा प्रा
यणीयस्य समासाद्बहिर्भावस्तदा स्वस्तोमत्वं भवति। यदा पुनर्मासांतर्भावस्तदा त्रि
वृत्स्तोमत्वं भवति। चतुर्विंशस्य तु सर्वदा मासांतर्भावात्त्रिवृत्स्तोमत्वमेवेति सिद्धं। त्रि
वृता मासं पंचदशेन मासं सप्तदशेन मासमेकविंशेन मासं त्रिणवेन मासं त्रयस्त्रिंशे
न मासं। षण्मासानेवं कुर्युः। व्रतं विषु वत्स्थाने। ततोनंतरं विषुवत्स्थाने महाव्रतमुपे

स्०ह०उ४ युः। तच्च स्वस्तोममेव भवति। मासानंतर्भावाद्विषुवतः। विषुवत्स्थान इति ब्रुवता गवाम
१८७ यनस्य प्रकृतिरिति दर्शयति। एतैरेव मासैः प्रतिलोमैः पक्ष उत्तरं। उत्तरस्य पक्षसोये
147 मासास्तानप्येतैरेव स्तोमैरुपेयुः। त्रयस्त्रिंशाद्येस्त्रिवृदंतैरित्यर्थः। उदयनीयोतिरा
त्रः। एवं षण्मासाननुपेत्य तत उदयनीयं स्वस्तोममुपेयुः। उदयनीयग्रहणमपि स्व
स्तोमार्थमेव। अत्र ये मासा विषयास्तोमविधयस्ते गवामयनिकाहर्युक्तमासेव मास्युः
पार्ष्ठिकानामेव त्रिवृदादीनामह्नामावृत्तविषया वास्युः। उभयथापि प्रायणीयोदय
नीयावतिरिक्तावेव भवत इत्ययमेकः पक्षः। अपरः पक्ष उच्यते। एतेषामेवा [illegible]
ह्नामतिरात्राविति। अपरमन्यत्राप्यादिष्टैः कालपूरणेन चेत्संख्यानियमः। प्रायणी
योदयनीये भवत इत्यत्रोक्तं तदन्यत्रापि भवति। अत्रादिष्टैव कालपूरणं सत्राहोभिर्भ १८७

वति। आदिष्टानामेवोद्योतमयोः संख्यानियमश्च नास्ति। तत्र सर्वत्रादिष्टानामाद्योत्तमे
प्रायणीयोदयनीयो भवत इति सिद्धं। त्रयस्त्रिंवृतः संवत्सरा इत्येवमादीन्युदाहरणानि।
ति॥३॥ कुंडपायिनामयनं। एतन्नामकमिदं सत्रमधिकृतं वेदितव्यं। मासं दीक्षिता
भवंति। अयं मासशब्द एकान्नविंशतिरात्र उपचरितः एकान्नविंशतिरात्रादिकं नाव
ह्नवतीत्यर्थः। ते मासि सोमं क्रीणंति। अयमप्युपचार एव। दीक्षाकाले मास्यतीते दीक्षि
ताः सोमं क्रीणंतीत्यर्थः। तेषां द्वादशोपसदो भवंति। सात्त्विकानां उपसदामपवादः। दी
क्षाविधिः। सोममुपनत्य प्रवर्ग्यपात्राण्युत्साद्योपनत्य वा मासमग्निहोत्रं जुह्वति। उ
पसत्स्वतीतासु प्रवर्ग्यउपसद्युत्साद्योपयेन त्वा वा तानिने एकं मासमग्निहोत्रं जुह्वति।
सायंप्रातः। प्रातरुपक्रमः सायमपवर्गः। प्रातःकालस्य प्रथमप्राप्तत्वात्। उपसत्काले

सू० वृ० ३६ १४८

द्वादशाहे तेग्निहोत्रस्यप्रातरारंभान्नैमित्तिकादग्निहोत्रात्कर्मांतरमेतदिति न्यायविदांप्र सिद्धं। मासंदर्शपूर्णमासाभ्यांयजंते। कृष्णपक्षेहरहः पौर्णमास्याशुक्लपक्षेहरहरमावा स्यायामित्रावरुणयोरयनेतथादृष्टत्वादेवमंत्रसंपादनीयं। यथाकृष्णपक्षादौपौर्णमा सयागः संभवति तत्रदीक्षारंभः कर्तव्यइति। मासंवैश्वदेवेन। अहरहरनेनयष्टव्यं। वैश्वानरपार्जन्यातुनभवति। आरंभार्थत्वात्तस्याः। सचारंभेयाप्रसक्तइति। मासंवरुण प्रघासैः। मासंसाकमेधैः। एतैरहरहर्यजेरन्नैकाहेनापवृज्यंप्रकृतेद्व्यहसमापनीयत्वा द्व्यहेनवाकुर्यादध्वर्युप्रत्ययात्समापनमितिस्थितिः। मासंशुनासीरीयेण। अनेनाप्यह रहरेव। यदहर्मासः पूर्यतेतदहरिष्टिंसमाप्याग्निप्रणयनादिघर्मोत्सादनादिवोपसथि कंकर्मकृत्वाश्वोभूतेप्रसुनुयुः। यस्मिन्नहनिमासः पूर्यते तस्मिन्नहनिशुनासीरीयेष्टिं व १४८

समाप्य तदनंतरं यद्दिपूर्वमेव प्रवर्ग्यपात्राण्युत्सादितानि तदाग्निप्रणयनादौपवसथि
कं कर्म कृत्वा स्कत्वारंभः। तद्वै कउपसद्य एवानंतरं कुर्वंति तथादृष्टत्वात्सौत्यान्मासानग्नि
होत्रादीन्वदंतः। तदिदमग्निप्रणयनादिऔपवसथिकं कर्म कुंडपायिनामयने अग्निहो
त्रादिमासेभ्यऊर्ध्वं कर्तव्यं इत्यक्तं तत्रैकआहुस्तत्कर्माग्निहोत्रादिमासेभ्यः प्रागुपसद्यो
नंतरं कर्तव्यमिति तत्र हेतुमाहुः प्रकृतौ तथादृष्टत्वामिति ननु अग्निहोत्रादिमासेभ्यउ
परिष्टात्क्रियमाणे चौपवसथिके सुत्यानंतरस्य विद्यमानत्वादिति तथादृष्टत्वात्साधारण
मिति तत्परिहारार्थं अग्निहोत्रादिमासान्सौत्यानिति। कथमस्य सत्रस्य गवामयनप्रकृ
तिकत्वात्तस्य सांवत्सरिकत्वात्कुंडपायिनामयने त्रिवृदादयः षण्मासा एकं पक्षः। अ
ग्निहोत्रादयः षण्मासा अपरं पक्ष इति मन्यमाना एव चौपसदां च सुत्यानां च मध्ये औप

सू०टी०३६
१४९
149

वसथिकस्यकृतत्वान्नकश्चिद्धेतुदोषइतिवदंतोग्निहोत्रादिमासेभ्यःप्रागुपसद्भ्यऊर्ध्वंऔ
पवसथिकंकुर्वंतिएतदुक्तंभवति।अग्निहोत्रादिमासान्सौत्यानितिमन्यमान्यास्तेभ्यःपुर
स्तादुपसद्भ्यउर्ध्वमौपवसथिकंकर्मकेचित्कुर्वंतिप्रकृतौतथादृष्टत्वादिति।तदनुपप
न्नं।यदेतदग्निहोत्रादिमासान्सौत्यानितिवदंतितदनुपपन्नंकुतःसोमयागःस्वरूप
त्वात्सौत्यानांअग्निहोत्रादीनांतुहविर्यज्ञस्यस्वरूपत्वादसुत्यतदयुक्तत्वमिति।यत्तुन
रिदमुक्तंगवामयनप्रकृतित्वादग्निहोत्रादिमासैःपूर्वपक्षसिद्धिरितितदयुक्तं।सो
मयागानामेवगवामयनप्रकृतित्वंपूर्वपक्षत्वमुत्तरपक्षत्वंचेति।अग्निहोत्रादयो
स्मिन्सत्रेअप्राकृताआगंतवः।अतस्तेषांतत्त्वणापन्नत्वमपिनसंभवति।अतस्तेषां
सौत्यत्वंनसंभवति।सुत्यत्वासंभवेतथादृष्टत्वादित्यस्यहेतोःसाधारण्यादसाधकत्वा

१४९

ता

दित्यनेनाभिप्रायेणोक्तं भगवॉ आचार्येण तदनुपपन्नमिति। पश्वर्थत्वाग्निप्रणयनं त
स्य च श्वःसुत्यानिमित्तं। परोक्तस्य हेतोरसाधकत्वमुक्त्वा स्वस्वपक्षं समर्थयति। औप
वसथेषु कर्मसु यः पशुभागः स श्वःसुत्यानिमित्तमिति प्रत्यक्षं श्रूयते। अग्नीषोमाभ्या
वामिंद्रो वृत्रमहंस्तावेनमब्रूतामित्यादिनाऽतो वचनात्पशोः सुत्यानंतर्यमेव संपाद
नीयं। तत्र यदग्निप्रणयनं तत्सोमयागार्थमेव। पशोरप्युपावाकरोति प्रसंगादिति प
श्वर्थमित्युक्तं। अतोऽग्निप्रणयनस्य पशोश्च सुत्यानंतर्यमेव संपादनीयं। अतिप्र
णीतचार्यायां च वैगुण्यं दर्शपूर्णमासयोः। तथाग्निहोत्रस्य। एवं तावदौपवसथिक
स्याग्निप्रणयनादेरग्निहोत्रादिमासेभ्यः। ऊर्ध्वमेककर्तव्यतां प्रतिपाद्येदानीमग्निप्र
णयनस्याग्निहोत्रादिमासेभ्यः पुरस्तात्क्रियायां दर्शपूर्णमासयोरग्निहोत्रस्य च वै

स्मृ० ह० ३ ४
१५०
150

गुण्यं भवतीति प्रतिपादयति कुत इति चेत्। प्रकृतौ नैयमेके नाग्निप्रणीते उत्तरवेद्यां तयोर्यो
गादर्शनात्। अतो वैगुण्यकरत्वादग्निप्रणयनं तावत्पुरस्तान्न कर्तव्यमित्ययं विशेषोऽभ्य
उक्तः। सदोहविर्धानान्याग्नीध्रीयाग्नीषोमप्रणयनं वसतीवरीग्रहणानि पश्वर्थानि भवंति
सुत्यार्थान्येके। एवं तावद्दोपवसथिके पशुयः पशुः सवः सुत्यानिमित्तत्वादग्निहोत्रादिमा
सेभ्य ऊर्ध्वं कर्तव्यमित्युक्तं अग्निप्रणयनं च सुत्यार्थत्वात्पशोरप्युपकारत्वात् पुरस्तात्क्रि
यायां चाग्निहोत्रादीनां वैगुण्यकरत्वात्तद्वदित्युक्तमिदानीं येषां श्वः सुत्यावचनं नास्ति श्रु
त्यादिभिस्तु सुत्यांगभावे त्वेव। अगवश्च संनिपत्योपकारकद्वारेण तेषां सुत्याकर्मणो
देशादिसाधनद्रव्यकल्परूपाणां सदस आदीनामग्निहोत्रादिमासेभ्यः पुरस्तात्करणे किं
चिददृष्टं दृष्टं प्रयोजनं नास्ति। एतेषां पुरस्तात्करणे प्रमाणं च नास्ति। कुतः। तत्कालाश्चै

वतद्गुणाः।यस्यप्रसाधनस्ययःकालःसएवकालस्तद्गुणानांप्रधानकालएवांगानांमुख्य
कालइत्यर्थः।तदेतन्न्यायविदांप्रसिद्धं।अतएवप्रसिद्धवदुपदिष्टवानाचार्यःतत्कालाश्चै
वतद्गुणाइति।एतदुक्तंभवति।यस्मात्प्रधानकालाएवप्रधानगुणास्तस्मात्सद्आदिनामा

ला ग्निहोत्रादिमासेभ्यःपूर्वमक्रियैवतत्कालाश्चैवतद्गुणाइतिचशब्दोत्रपठितःप्रधानकालेच
गुणाःकर्तव्याइत्यर्थः।सद्आदीनांपश्वर्थतावचनमभ्युपगम्ययागःपश्वर्थानिवाभवंतु
सुत्यार्थानिवासर्वथातावदग्निहोत्रादिभ्यःपुरस्तात्क्रियानस्यादित्ययमभिप्रायः।अंगा
नांप्रधानकालत्वमुक्तंत त्कालाश्चैवतद्गुणाइतियानिपुनरंगानिप्रधानकालाद्विप्रकृ
ष्टानियथाग्निमारुतादूर्ध्वमनुयाजैश्चरं तीतितेषांपश्वर्थतानास्ति।सौमिकैःपदार्थैःव्य
वधानादिति।अतोनुयाजसदृशानिकर्मांतराणिसोमांगत्वेनैवविधीयंतप्राप्तउच्यते।सिद्ध

स्वभावानां नव्यवधानादन्यत्वं यथा पृष्ठ्याभिप्लवयोः। प्रकृतौ सिद्धस्वभावानां पदार्थानां वि

कृतौ पदार्थांतरव्यवधानमात्रेण तेषामन्यत्वं न स्यात्। अनन्यत्वे च प्राकृतौ उपकारत्वेनाग

त्वमपि स्यात्। प्राकृतानां हि पदार्थानां विकृतौ उपकारद्वारे या प्राप्तानामनुपकारकत्वमि

त्युक्तं। यदि परं व्यवधानादन्यत्वं भवति। अतो विप्रकृष्टकाला अपि पदार्थास्तत्क्रतुणा

एव भवंति तत्क्रतुध्यनपगमादिति। कर्मांतरत्वपक्षे वाक्यभेदादि प्रसज्येत यथा पृष्ठ्याभि

प्लवयोरिति व्यवधानादन्यत्वाभावे दृष्टांतः। यथा पृष्ठ्यस्याभिप्लवान्यस्य वा संघातरूप

विशेषस्य मध्ये यजमानमरणस्य निमित्तेन नैमित्तिकमहरंतरमुपजायेत। तत्र तेन व्य

वधानमस्ति तथापि पृष्ठ्यादिसंघातविशेषबुद्धिर्नापैति तद्वदत्रापीति। यस्माद्व्यवधाना

त्पदार्थादन्यत्वं नास्ति। अत एवौपवसथिकस्याग्निहोत्रदिमासेभ्यः पुरस्तात्क्रियाशंकानिरा

करणार्थमिदं। प्रकर्णे रेमारब्धं कानि चिदंगानि तत्काला नि कानि चिद्विप्रकृष्टकाला नि द्

म०ह०उ ६
१५१
151

स्वभावानां न व्यवधानादन्यत्वं यथा पृष्ठ्याभिप्लवयोः। प्रकृतौ सिद्धस्वभावानां पदार्थानां वि
कृतौ पदार्थान्तरव्यवधानमात्रेण तेषामन्यत्वं न स्यात्। अनन्यत्वे च प्राकृतौ उपकारत्वेनांग
त्वमपि स्यात्। प्राकृतानां हि पदार्थानां विकृतौ उपकारद्वारेण प्राप्तानामनुपकारकत्वमि
त्ययुक्तं। यदपि परं व्यवधानादन्यत्वं भवति। अतो विप्रकृष्टकाला अपि पदार्थास्तद्गुणा
एव भवंतीति तद्बुध्यनपगमादिति। कर्मान्तरत्वपक्षे वाक्यभेदादि प्रसज्येत यथा पृष्ठ्याभि
प्लवयोरिति व्यवधानादन्यत्वाभावे दृष्टांतः। यथा पृष्ठ्यस्याभिप्लवान्यस्य वा संघातरूप
विशेषस्य मध्ये यजमानमरणस्य निमित्तेन नैमित्तिकमहरंतरमुपजायेत। तत्र तेन व्य
वधानमस्ति तथापि पृष्ठ्यादिसंघातविशेषबुद्धिर्नापैति तद्वदत्रापीति। यस्माद्व्यवधाना
त्पदार्थादन्यत्वं नास्ति। अत एवौपवसथिकस्याग्निहोत्रादिमासेभ्यः पुरस्तात्क्रियाशंकानिरा
करणार्थमिदं। प्रकरणे रेमारब्धं कानिचिदंगानि तत्कालानि कानिचिद्विप्रकृष्टकालानि द्

१५१

त्येवमुभयथाव्यवहारोमिदमस्तिसर्वथातावदग्निहोत्रादिमासेभ्यःपुरस्तादौपवसथिकं
नकर्तव्यमिप्रकरणार्थः।सगुणानांत्वेवकर्मणामुद्धारउपजनोवा।अयमप्यग्निहोत्रादि
मासेभ्यःपुरस्तादौपवसथिक्रियायांहेतुःयस्मात्प्रधानकर्मणामुद्धारउपजनेउत्कर्षेच
सगुणानामेवसर्वत्रोद्धारादिर्दृष्टव्यथास्नानभोजनविहाराणामहरहःकार्याणांकस्य
चिदुद्धारेसगुणस्यैवउद्धारोदृष्टः।उत्कर्षेचसगुणएवोत्कृष्यते।एतेषांनित्यकार्याणा
मंतकालेअन्यन्नैमित्तिकमुपजायमानंसगुणमेवोपजायते।एवमत्रापिवैशेषिके ना
रग्निहोत्रादिभिरुत्कृष्यणंसोत्यंकर्मआत्मनोगुणस्तेनौपवसथिकेनसहोत्कृष्यते।
हिशब्दःप्रसिद्धौयस्मात्सर्वत्रोद्धारोपजनोत्कर्षाःसगुणानामेवदृष्टास्तस्मादत्रापिस
गुणस्यासोत्यस्योत्कर्षोयुक्तइतिसूत्रार्थः।सुब्रह्मण्यात्वसंतं।प्रासंगिकार्यंसुब्रह्मण्या

विचारः। प्रकृतावुपसत्कृत्याकालत्वात्सुब्रह्मण्यायां अग्निहोत्रमासानां च सुत्योपसज्ञावा दि
भावात्सुब्रह्मण्याया अभावशंकास्यात् तत इदमुच्यते। सुब्रह्मण्यायाः अयं विशेषः अत्यंतानि
त्यं कर्तव्या अग्निहोत्रादिद्व मासेष्वपि अप्राकृतोयं काल इति नो त्सृष्टव्या। अनवधृते ह
कालसंशयत्वात्। प्रकृतावुपसत्कृत्याकालासतौ सुब्रह्मण्या तत्कालविशेषविशिष्टाह
यते इह पुनर प्राकृतत्वात्कालस्यतेनोपलक्षणं प्रकृत्यास्सुब्रह्मण्यायाः प्रयुक्तमिति म
न्यमाने नोनवधृता कालसंख्याविशेषणा ज्ञातव्या। सुत्यामागच्छेदिति कालसंशयत्वा
दित्यस्यायमर्थः। प्रकृतौ द्वादशाहे सुत्यामित्यादयः संख्याविशेषाः किमुपसदहः संख्या
विशेषप्रयुक्ता आहोस्वित्साग्यावंस्महानि तदहः संख्याप्रयुक्ता इत्येवं कालसंशयत्वादि
त्यर्थः। उत्सर्गमेके सुत्योपसद्गुणत्वात्। सुब्रह्मण्या उत्सर्गमेक इच्छंति सुत्योपसद्गुणो

त्वात्। किमिदं सुत्योपसद्गुण

त्वादिति। कस्मान्नामेवायं गुणोनोपसदां क्रमालिंगं बलीयइति। अतोयमुपसदां गुणाउ
पसत्कालवर्तित्वादुपसद्गुणत्वोपचारः अग्निहोत्रादिमासानामकृत्यत्वादनुपसत्काल
त्वात्कब्रह्मण्योत्सर्गमेकआहुरित्यर्थः। क्रियात्वेवप्रवृत्तेन्यंतमगत्वावस्थानेदोषः। अ
स्याः क्रियेवनिश्चीयते सोमयागसाधनसंस्कारत्वान्मंत्रस्यप्रकृतौसोमयागात्पूर्वंयाव
त्कृत्याकालस्तावदाहूयते। तद्वदत्राप्याक्रातव्या। तावतः कालस्योपसत्त्वेवैतत्संबंधा
दस्याउपसत्संबंधात्तदभावान्नास्यात्सांगोगुक्तः। अत्रायमपिविशेषोस्तिऔचित्या
दपिनत्याज्या। आदितआरभ्यसर्वेष्वेवाहःस्वाक्रयंतिकथमिदानीनाक्रयंतिन्नूनमयं
सोमोस्मभ्यंनदातस्यइतिदेवतायाःशंकास्यात्तन्निवृत्त्यर्थमाक्रातव्याप्रारब्धस्यमध्ये
त्यागस्यकारणाभावेत्यागेदोषएवस्यादित्यभिप्रायः परपदार्थंचापदार्थंचारोत्रस्वपदा

सं० ह० ३६
१५३

र्थपरिज्ञानार्थएव आतिप्रेषश्च ः क्रत्वयोरूपोत्पत इति। त्रिवृता मासं। पंचदशेन मासं। सप्तद
शेन मासं। एकविंशेन मासं। त्रिणवेन मासं। अष्टादशरात्र ... त्रयस्त्रिंशानि। महाव्रतं चाति
रात्रश्च। अत्र पृष्ठ्यस्य पंचभिरहोभिः पंच मासाः कर्तव्याः षष्ठेनाष्टादशाहानि दशरात्रो म
हाव्रतं उदयनीयः कृत्स्नोक्तत्वान्नात्र प्रायणीयः। सर्वेणायज्ञेन यजंते य एतदुपयंति। स्त्र
तिवादोयं। बहूनामत्र संभवात्। कलिक समासोनेन सूत्रकारेण न सूचितः सत्कर्तव्य
श्चेपरप्रत्ययादेव कर्तव्यः॥ ४॥ सर्पाणामयनं। इदमपि संवत्सरसत्रं। गो आयुषी दश
स्तोमे। एते अहनी इदशी स्तोमे अभ्यस्याभ्यस्य कृत्स्नं संवत्सरस्याभुतः। अनुलोमेषण्मा
सान्। प्रतिलोमेषट्। अयमेवात्र विशेषो नुलोमत्वमेव। ज्योतिर्द्वादशीस्तोमो विषुवत्स्था
ने। ज्योतिरेकाहो विषुवत्स्थाने भवति। सप्तदशी स्तोमश्च भवति। प्रकाशकामा उपेयुः॥

प्रतिलोम २

१५३

विद्ययाधनेनचप्रकाश्यकामाःसर्पाणामयनमुपेयुः।अत्रप्रायणीयोदयनीयोपूर्वोक्ते
नंन्यायेनभिन्नावभिन्नोभवतः।त्रैवर्षिकंप्रजाकामाः।त्रैवर्षिकमितिसत्रनाम।गवामय
नंप्रथमःसंवत्सरः।थादित्यानां।अथांगिरसां।त्रिसंवत्सरसुत्यइतितस्यैतेत्रयःसंवत्सराः।
चत्वारितापश्चितानि।चत्वारितापश्चितानिवक्ष्यंतइत्यर्थः।उपदेशादेवचतुष्ट्यासिद्धे।च
तुर्ग्रहणंसर्वेषांतापश्चितानांतुल्यत्वज्ञापनार्थं।कथमनेनतुल्यत्वमितिचेत्।तापश्चि
तानीत्यस्याविशेषणत्वात्।तापश्चितानीत्येकशेषात्।एतत्त्रयंसिद्धं।एकशेषश्चसरू
पाणामितिसमासिद्धः।तेनसामानाधिकरण्याच्चतुर्णांतुल्यत्वमध्यवसितं।तुल्यत्व
सिद्धोप्रयोजनंयथानयथाप्रथमेसौत्येषण्मासेष्वहराधिक्यंनास्ति।एवंसर्वेषुतापश्चि
तेषुसौत्येषुसंवत्सरचतुःसंवत्सरद्वादशसंवत्सरेष्वहराधिक्यंविषुवतानेकर्तव्यमि

त्यर्थः। क्षुल्लकतापश्चितं प्रथमं संवत्सरं सदीक्षोपसत्कं। क्षुल्लकतापश्चित्तमिति प्रथमं व्याख्या
तं दीक्षोपसद्भिः सह संवत्सरकालमित्यर्थः। तस्य चत्वारः सौत्यामासाः। गवामयनस्य प्रथम
षष्ठसप्तमोत्तमाः। अतो महाव्रतवदेतत्सत्रं। महाव्रतेपि संवत्सरदीक्षानि वृत्यर्थो। संवत्स
रदीक्षोपसत्कमित्युक्तं। अत्र मासाति देशाद्विषुवान्न भवति। त्रैवार्षिकं तापश्चितं। तस्य

सौत्याः

सोत्यः संवत्सरः। तापश्चितानां यथासु त्योपसद इति सत्यानां त्रिभागत्वेसिद्धे चत्वारः सौ

सौत्याः

त्यामासाः संवत्सराः द्वादश सौत्याः। संवत्सरा इत्येतानि वचनानि विषुवन्निवृत्त्यर्थानि।
उक्तो गवामयनेन ज्योतिर्गौरायुरभिजिद्विश्वजिन्महाव्रतं चतुर्विंशानां वैकैकं। गवाम
यनस्यायमपवादः। एतेषां सप्तानामहामेनामेके -- व्र -- तुर्विंशानां वैकैकं। गवाम

१५४

य

यनस्यायमपवादः। एतेषां सप्तानामह्नाम् एकैकेनाह्ना संवत्सरः। पूरयितव्योभ्यस्याभ्यस्येत्य

र्थः। द्वादशवार्षिकं तापश्चितं। तस्य चत्वारः सौत्याः संवत्सराः। गवामयनशस्याः पूर्वेयौव
न्यायेन। पूर्वन्यायशब्दे नैकसंभार्योत्तरपक्ष उच्यते। अपि वोत्तरस्य पक्षस्य सोद्वाविंशतिः
सवनमासा भवेयुः। त्रयोविंशतिः पूर्वस्य। सवनमासा उभयोः पक्षयोः षष्ट्याभिप्लवसंभ
वास्त्रिंशिन्यस्ते द्वाविंशतिं उत्तरे पक्षासित्रयोविंशतिः पूर्वपक्षासि षट्सप्तमोत्तमास्त्रयः
स्वरूपेणैव। एवमष्टाचत्वारिंशन्मासा भवति। चतुर्णां संवत्सराणां पर्यायाः अत एतत्॥
कूप्तश्चीयते। किमेतद्युक्रमेण प्रणीतं भगवता सूत्रकारेणेति। अयमभिप्रायः मास
वृद्धौ सवनमासानामेव वृद्धिः इतरेषां त्रयाणां स्वरूपेणैव सत्यस्य न्यायस्य सर्वार्थत्वा
येवं प्रणीतं। अतः षट्त्रिंशद्वार्षिकेपि एकसप्ततिः पूर्वपक्षासि सवनमासाः सप्तरुत्त ति
रेपक्षेसित्रयश्च षट्सप्तमोत्तमाश्च भवंतीति गम्यते। षट्त्रिंशद्वार्षिकं महातापश्चितं।

स०श्रौ०ड ६ श्रौ तस्य द्वादशैतस्याः संवत्सराः गवामयनशस्याः पूर्वेणैवन्यायेन। प्रजापतेर्द्वादशसंवत्सरं इदं
१५५
सत्रनाम। तस्याहान्युच्यंते। त्रयस्त्रिवृतः संवत्सरास्त्रयः पंचदशास्त्रयः सप्तदशास्त्रय
एकविंशाः। एतैरेव स्तोमैः शाकल्यानां षट्त्रिंशद्वार्षिकं। स्तोमैरितिसोमविशिष्टैरहोभिरित्य
र्थः। शाक्त्यानमयनमितिसत्रनाम। तस्याहान्युच्यंते। अयनशब्दोध्याहर्तव्यः। एवमुत्त
रेष्वपिसाध्यानांविश्वसृजामानेरित्येतेषु षट्त्रिंशद्वार्षिकमित्यादयः शब्दाः सत्रकाल
वचनाः। एकैकेननवनववर्षाणि। पूर्वस्येषमहः कल्पना। एतैरेवस्तोमैः साध्यानांश
तसंवत्सरं। एकैकेनार्धतृतीयान्यर्धतृतीयानि। विश्वसृजामयनस्याहः कल्पना।
सहस्रसंवत्सरं तदायुषामसंभवादिति। विचारितोसंभवासंभवो। तत्रयथासंभवति १५५
तथाप्रतिपत्तव्यं अग्नेः अयनशब्द एतेषुशेषस्त्वस्मक्के। तस्याहः क्लृप्तिरुच्यते। वर्षशता
एकैकेनपंचविंशतिः पंचविंशतिर्वर्षाण्येतैरेवस्तोमैविश्वसृजांसहस्रसंवत्सरं। ३

न्यग्नेरग्निष्टोमसहस्रं। अत्रबहिरेवप्रायणीयोदयनं सहस्रसाध्यमित्यनेन नाम्ना वक्ष्यते
॥५॥ अथ सारस्वतानि। अनंतरं सारस्वतानि सत्राण्युच्यंते इत्यर्थः। सरस्वत्याः पश्चिमउ
दकांते दीक्षेरन्। पश्चिमउदकांते इत्यनेन सरस्वत्याविनशनमिति प्रसिद्धो देशउच्यते।
तस्मिं दीक्षेरन्नित्यर्थः। ते तत्रैव दीक्षोपसदः कृत्वा प्रायणीयं च सरस्वती दक्षिणेन तीरे
ण शम्याप्रासे शम्याप्रासे हरहर्यजमाना अनुव्रजेयुः। ते सत्रिणस्तत्र दीक्षोपसदश्च स
माप्योपवसथिकं च कृत्वा प्रायणीयमतिरात्रं च तत्रैव कुर्युः एवं तत्रैव कृत्वा सरस्वती
दक्षिणेन तीरेणानुव्रजेयुः शम्याप्रासे हरहर्वसिता ते तत्रैवेति वचनं सर्वेषु सारस्वते
षु प्रायणीयांतं कर्म विनशनप्रदेश एव कर्तव्यमित्येवमर्थं। संहार्य उलूखल बुध्नो यूपः
। संहार्यः वामनकाले संहृत्य गंतुयोग्यः स मो देशस्तत्र गच्छेयुरित्यर्थः उलूखलस्येव बुध्नो

स्०ह्०३ ६
१५६

मूलं यस्य स उलूखलमूलबुध्नः समे देशे स्थापयितुयोग्य इत्यर्थः। उलूखलस्येव बुध्नो मूलं।
चक्रीवंति सदो हविर्धानानि। हविर्धानयोर्विशालाभिप्रायेण बहुवचनं। आग्नीध्रीयं पत्नी
शालं च। चक्रवदित्यर्थः। दक्षिणपुरस्तादाहवनीयस्यावस्थाय प्रत्नाशम्यां प्रहरेत्। सा यत्र त
निपतेत्तत्र गार्हपत्यस्यायतनं। ततोधिविहारः। गार्हपत्यादारभ्य पुरस्ताद्यथायोगं पुनर्विहा
रः कल्पनीयः। विषमे चेन्निपतेदुद्धृत्य समे विहरेयुः। समे विहर्तुमशक्येपि विषमे देशेश
म्यायदि पतेत् उद्धृत्य तां शम्यां पुनः समे देशे तां प्रहृत्य विहारः कर्तव्यस्तत्रैव। अप्सु चेद्वा
रुणं पुरोळाशं निर्वपेयुः। अपां नप्त्रे चरुं। अपां नपादात्यं स्थानमुपस्थं समन्यायं त्युपयंत्यन्या
इति। अतः समानं सर्वेषां। एवमंतं सर्वेषां सारस्वतानां समानं। मित्रावरुणयोरयनं। मि १५६
त्रावरुणयोरयनं नाम सारस्वतं सत्रं इदानीमधिक्रियते। कुंडपायिनामयनस्यानुषण्मा द्या

सानावर्तयंतोऽभिव्रजेयुः। अग्निहोत्रादीनित्यर्थः। अत्र दंडचक्रवदावृत्तिरपेक्ष्यते परावधेरनि
यतत्वात्। मासिमासि च गोआयुषी उपेयुः। आयुरयुग्मेषु। गोर्युग्मेषु। यथापरपक्षस्य
चतुर्दश्यामेोपवसथिकं कर्म तथादीक्षेरन्। ततोमावास्यायां प्रायणीयमतिरात्रं कृत्वा
अग्निहोत्रादीनां मासानां यजनं ततः पौर्णमास्यां पौर्णमास्यां गामुपेयुः एवमुत्तरस्यां पौ
र्णमास्यामायुषमुपेयुः। एवमेव गोआयुषी पौर्णमास्यां पौर्णमास्यां क्रमेणोपेयुः। हविर्य
ज्ञमासाक्रमेणावर्तयंतः। प्लाक्षं प्रस्रवणं सरस्वत्या दक्षिणेन तीरेणाभिव्रजेयुः। एवं कृ
ते आयुरयुग्मेषु मासेषु गोर्युग्मेषु कृतो भवतः। मासानां युग्मात्वं सत्रारंभकालावधि
कं। अत्र दीक्षोपसदो द्वादश द्वादशैव अत एव तद्युक्तं। इति नु प्रथमकल्पः॥ मित्रावरुण
स्यायनस्यायं प्रथमः कल्पः। अथ द्वितीयः। यथामावास्यायामतिरात्रः स्यात्तथा दीक्षे

पौर्णमासेनोत्तरं व्रजित्वामावास्यायामायुपमुपेयुः। ४

रन्। कल्पश्रतिशेषः। यथामावास्यायां अतिरात्रं प्रायणीयं कुर्युः। तेमावास्यायामतिरात्रं सं
स्थाप्य तदहरेवामावास्यस्य सान्नाय्यवत्सानपाकुर्युः। तेमावास्यायामेकस्मिन्नेवाहनि
अतिरात्रमाश्विनं तं समाप्य तदहरेमावास्यस्य वत्सापाकरणादि कृत्वाश्वोभूतो यजे
रन्। तं पक्षमामावास्येन व्रजित्वा पौर्णमास्यां गामुपेयुः। तं पूर्वपक्षमावास्यायामायु
षमुपेयुः। एवमावर्तयंतो व्रजेयुः। यावल्लाक्षंप्राप्यते। इंद्राग्न्योरयनं। इदमप्युन्यत्सार
स्वतं। गोआयुषीभ्यां। अस्मिन्सारस्वते गोआयुषीभ्यामेवांते कलमभ्यस्यां तो व्रजंति।
अर्यम्णोयनं त्रिकद्रुकैः। इदमपि सारस्वतां तरं त्रिकद्रुकैर्ईउ कलितवदभ्यस्यां तं व्रजे
युः। सरस्वतीपरिसर्पणस्य शस्यमुक्तं गवामयनेन। सरस्वतीपरिसर्पणं नाम सारस्वतं।
तस्य शस्ये गवामयनेनोक्तं। शस्यग्रहणं शस्यमात्रग्रहणमेव गवामयनस्य उत्थानादि

सारस्वतमेवेति ज्ञापनार्थं। एकपातीनि। त्र्यहान्यतिरात्राः। अयमत्रविशेषश्चतुर्विंशामि
जिद्विषुवन्महाव्रतादीन्येकपातीन्यहानि तानि अतिरात्रसंस्थानि भवेयुः। इष्ट्याश्चतुर्थे।
अतिरात्रसंस्थामित्यर्थः। इति नुगतयः। एवंप्रकारा गतयः सर्वेषु सारस्वतेषूक्ताः। अस्मा
भिः। शास्त्रांतरेष्वन्येपि प्रकाराः संति। अथोत्थानानि। उत्थानान्यपि सर्वेषां वक्ष्यंते। प्लाक्षं
प्रस्रवणं। प्राप्योत्थानं। इमं देशं प्राप्योत्थानमेव कर्तव्यं। न क्रमप्राप्तं कर्मारब्धव्यं। तेयमु
नायां कारपचवे वभृथमभ्युपेयुः। ये प्लाक्षं प्रस्रवणं प्राप्योत्तिष्ठंति ते स्मिन्देशे वभृथं
कुर्युः। उदेत्याग्नये कामायेष्टिर्वैराजतंत्राः। अवभृथमुदेत्य यमिष्टिः कार्या। तस्याम
श्वां च पुरुषीं च धेनुके दद्युः। अश्वजातो स्त्री अश्वा पुरुषजातो स्त्री पुरुषी उच्यते।
ते धेन्ववरुद्धे दद्युः। एतद्वोत्थानं। एतद्वोत्थानं वक्ष्यमाणानि वा उक्तस्य पुनर्वचनं वक्ष्यमा

स्तु० वृ० ३६
१५८

योऽस्तीति भवतीत्येवमर्थः। ऋषभैकशतानां वा गवां सहस्रभावे। ऋषभैकशतसंख्या आसां गवामित्यृषभैकशताः सत्रारंभकाले तु उत्सृज्यंते। आसां सहस्रभावे उत्थापनमित्यर्थः। सर्वस्वज्यान्यां। चौरादिभिः सर्वस्वापहारे अथवोत्सृष्टानां गवां सर्वनाशे। गृहपतिमरणे वा। ज्यान्यां त्वत्तिष्ठंतो विश्वजितातिरात्रेण यजेरन्निति शेषः। गृहपतिमरण आसु वा। गवां गवां सहस्रभावे। इतानि पंचोत्थानानि श्लाघ्यप्राप्तेः प्रागेव निमित्तानि भवंति। श्लाघ्यप्राप्तनिमित्ते गवां नाशनिमित्ते चोत्थाननिमित्तस्य क्रतोरविधानाद्दयनीय एवातिरात्रस्तयोः कर्तव्यः। इति शास्त्रं। इत्येवं ज्योतिष्टोमादितः सारस्वतानुक्ते। इति शास्त्रमित्युक्तं तस्यायमर्थः। एतेषु सारस्वतांतेषु सर्वशास्त्रमुक्तमित्यर्थः। ६॥ अथ सवनीयाः क्रतुपशवो वाल्यंतोप- शवो वक्ष्यंत इति शेषः। आग्नेयोऽग्निष्टोम इत्यादयः पशवस्तेषां संख्यावशेन प्रयोग उक्त

१५८

स्तएव गवामयनेहन्यहनि संस्थावशेनैवा सत्रपरिसमाप्तेरालब्धव्याः। आग्नेयो वैंद्राग्नो वा।
आग्नेयं वा रथंतरपृष्ठेषु। अयमपि तङ्गक्तिष्वपि वैरूपशाक्करयोः परोक्षरथंतरेनोधसेच।
ऐंद्रं बृहत्पृष्ठेषु। अत्रापि तङ्गक्तिष्वपि वैराजरैवते। एकादशिनान्वा। अहमेकादशिनान्वा
समस्तानालभेरन्। अत्रापि तङ्गक्तिष्वपि वैराजरैवते। प्रकादस्त्वंतमित्येवमंतमनुवर्तते।
प्रायणीयोदयनीययोरतिरात्रयोः समस्तानालभेरन्। ऐंद्राग्नमंतर्धौ वा। अयमपरः क
ल्पः संनियोगविष्टः प्रायणीये चातिरात्रे उदयनीये चातिरात्रे एकादशिनान् समस्ताना
लभेरन्। अंतर्धौ मिध्यवर्तिषु अन्येष्वहःस्वित्यर्थः। तेष्वैंद्राग्नमालभेरन्। प्रायणीयोदय
नीयातिरात्रग्रहणमग्निष्टुत्प्रायणीयस्थानइत्येवमादिष्वयं कल्पो माभूदित्येवमर्थं। अ
न्वहं वैकैकशः एकादशिनात्। अयं चापरः कल्पः। एकादशिनानामेवैकैकमादित आरभ्या

स॰ द॰ ३६
१५९
159

हन्यहनि क्रमेणालभेरन्। [illegible] अस्मिन्पक्षे दंउकाले तवद्रा वृत्तिस्तदेत
न्निरूपितं वचनाद्यसारि वृत्तिनैकादशिनेषु लिंगदर्शनात्। नत्वेवैकादशिनीन्यूनामाल
भेरन्। एकादशिन्यामेवान्वाहमेकैकालंभे क्रियमाणे त्या एकादशिनी। अपरिसमाप्ता
न्यून वर्त्तिष्यते तथा न कर्तव्यमिति प्रतिकृष्यते। एतेन चैत्यश्वयनेनेषु स्मृतीयेहनिद
शरात्रस्य द्वात्रिंशतमेकादशिन्यः संतिष्ठंते त एतस्मिन्नवरात्रे तिरिक्तपश्वनालभेरन्।
न्यूनालंभप्रतिषेधादेकैकालंभे एवं कर्तव्यमित्युच्यते। एकैकालंभपक्षे एकादशिन्या
द्वात्रिंशत्सारि वृत्तिषु गतास्क नवाहानि परिशिष्यंते तेष्वहःस्वतिरिक्तपश्वनालभेरन्।
अतिरिक्तपशव इति वक्ष्यमाणानां नामधेयं। वैष्णवं वामनमेकविंशो दशरात्रस्य चतु
र्थप्रभृतीष्वहःसु एते पशवः संभवंति। तान्येकविंशादीनि तेन तेन स्तोमेन तानतानि कस्यं

१५९

ते। ऐंद्राग्नं त्रिणवे। वैश्वदेवं त्रयस्त्रिंशे। द्यावापृथिवीयां धेनुं चतुर्विंशे। तस्या एव व
त्सं वायव्यं चतुश्चत्वारिंशे। आदित्यां वशामष्टाचत्वारिंशे। मैत्रावरुणीमविवाक्येऽह्य
मपि वशैव। वैश्वकर्मणामृषभं महाव्रते। आग्नेयमुदयनीये तिरात्रे। एते सर्वे गोपश
वः। अत्र स्तोमग्रहणमहरुपलक्षणार्थं न तु स्तोमविवक्षार्थं। अपि वैकादशिनीमेव
त्रयस्त्रिंशीं पूरयेयुः। अभिजिद्विश्वजिद्विषुवंति द्विपशूनि स्युः। गवामयने त्रयस्त्रिंशा
त्स एकादशिन्याः पूरणोपाय उच्यते। अभिजिति सप्तदशास्यैकादशिन्या आरभ्य ते त
स्मिन्नहन्यादितो द्वौ पशू आलभ्येते। विश्वजिति। ततो द्वौ पशू आलभ्येते ततः सप्ताव
शिष्यंते आहानि च सप्तैव विषुवतो द्विपशूनि त्वं पूर्वमेव प्राप्तं तत्किमित्यत्र गृह्यते प
रिसंख्याभयात्। एवं कृते त्रयस्त्रिंशस्यैकादशिनी पूर्णा भवंति। अयं च पक्षोऽतिरिक्तप

श्चुर्विकल्प्यते ॥७॥ अथ सत्रिधर्माः ॥ सत्राण्युक्तानि । अथेदानीयमाउच्यंते । दीक्षणा
दिपित्र्याणां दैवानां च धर्माणां प्राकृतानां निवृत्तिः । दीक्षणीप्रभृति आकर्मपरिसमा या
प्तेः । पित्र्याणां पिंडपितृयज्ञादीनां दैवानां अग्निहोत्रादीनां निवृत्तिः प्राकृतानां नित्याना
मित्यर्थः । सत्रिग्रहणं यजमानोपलक्षणार्थं । तेनैकाहाहीनेष्वपि यजमानानां धर्मा
भवंति । सर्वशश्च वर्जयेयुर्ग्रामचर्यां । ग्रामचर्यायां स्त्रीसंभोगः सर्वशश्च वर्जयेयुः
मनोवाक्कायैरित्यर्थः । दैवपित्र्याण्यपि सर्वशो वर्जयेयुः श्रौतानि स्मार्तानि च । सरणं ।
अद्भुतगतिर्धावनमित्यर्थः । विवृतस्मयनं । दंतान्प्रकाश्य हसनं आगतं चेद्दंतानाच्छा
द्य स्मयं अभिहासं । स्त्रीभिः सहाभिहासमात्रमपि वर्जयेयुः । अनार्यभिभाषणं । अनार्याः
प्रतिलोमाश्च दृष्टदोषिणाश्च तैर्न संभाषेरन् । अन्ृतं क्रोधं । अपां प्रगाहणं । स्नानानि ।

अनुलोमा

160

म

अभिवर्षणं। आत्मानः शरीरे वर्षाबिंदुपतनं। आरोहणं वृक्षस्य। नावो वा। वाशब्दः
समुच्चयार्थः। अन्यस्याप्येवंप्रकारस्य हस्त्यादेः। रथस्य वा। अयमपि निषेधो नस्तादीना
मुपलक्षणार्थो। दीक्षिताभिवादनं। एतानि सर्वशो वर्जयेयुरिति संबध्यते। दीक्षितस्त्वो
पसदं। तु शब्दोभिवादनविधायकेषु पंचसु सूत्रेषु वर्जयेयुरित्यस्य व्यावृत्त्यर्थः। दीक्षा
वरुद्ध उपसदवरुद्धोभिवादयेत्। उभौ सुन्वंतौ। दीक्षावरुद्धश्चोपसदवरुद्धश्च सुन्वंतं सुत्या
वरुद्धं अभिवादयेतां। समासिद्धांताः पूर्वारंभिणं। समावरुद्धयोर्यः पूर्वमारभते तमितरो
भिवादयेत्। पश्चादारंभी। अभितप्ततरं वा। समासिद्धांतयोरभितप्ततरमितरोभिवादयेत्।
अभितप्ततरो नाम पूर्वं बहुभिः क्रतुभिः इष्टवान् इदानीं च प्रवर्तमानः। सर्वसाम्ये यथा
वयः। सर्वत्र समत्वे वयोधिकमितरोभिवादयेत्। एतावानभिवादनविधिः। नृत्यगीत

अभिवर्षणं। आत्मानः शरीरे वर्षाबिंदुपतनं। आरोहणं चवृक्षस्य। नावो वा। वाशब्दः
समुच्चयार्थः। अन्यस्याप्येवंप्रकारस्य हस्त्यादेः। रथस्य वा। अयमपि निषेधो नस्त्रादीना
मुपलक्षणार्थः। दीक्षिताभिवादनं। एतानि सर्वशो वर्जयेयुरिति संबध्यते। दीक्षितस्त्वो
पसदं। तुशब्दोभिवादनविधायकेषु पंचसु सूत्रेषु वर्जयेयुरित्यस्य व्यावृत्त्यर्थः। दीक्षा
वरुद्धउपसदवरुद्धोभिवादयेत्। उभौ सुत्वंतौ। दीक्षावरुद्धश्चोपसदवरुद्धश्च सुत्वंतं सुत्या
वरुद्धं अभिवादयेतां। समसिद्धांताः पूर्वारंभिणं। समावरुद्धयोर्यः पूर्वमारभते तमितरो
भिवादयेत्। पश्चादारंभी। अभितप्ततरं वा। समसिद्धांतयोरभितप्ततरमितरोभिवादयेत्।
अभितप्ततरो नाम पूर्वं बहुभिः क्रतुभिः इष्टवान् इदानीं च प्रवर्तमानः। सर्वसाम्ये यथा
वयः। सर्वत्र समत्वे वयोधिकमितरोभिवादयेत्। एतावानभिवादनविधिः। नृत्यगीत

म

वादितानि।तुशब्देनाभिवादनविधेर्व्यावृत्तौवर्जयेदितिशब्दः पुनरप्यागच्छतीतिसूत्रद्द
योपपादितंउदुभ्याहृननादि।अन्यांश्चाव्रत्योपाचारान्।वर्जयेयुरित्यर्थः।उक्तेभ्योन्येये
शास्त्रांतरोक्ताः व्रतविरोधिनउपचारास्तानपिवर्जयेयुरित्यर्थः।नचैनान्बहिर्वेदिस
दोभ्या[illegible]श्रावयेयुः।यद्यासत्रिणोबहिर्वेदिस्थिताःतदाश्रावणंनर्तव्यं।आश्रावणश
ब्देनयागहोमालक्ष्यंते।नोदक्यात्।उदक्याआचमनार्हास्तान्बहिर्वेदिस्थितान्नाभ्याश्रा
वयेयुः।नोएवाभ्युदियान्नाभ्यस्तमियात्।यद्यासत्रिणःएतान्बहिर्वेदिस्थितानात्मनोनो
भयंकुर्यादित्यर्थः।नयागहोमकालेउदयास्तमयकालेचबहिर्वेदितिष्ठेयुः।अशुच्चयो
वानभवेयुः।तेषांचेत्किंचिदापद्दोपनमेत्वमग्नेव्रतपाअसीतिजपेत्।तेषांग्रामचर्यादी
नांयत्किंचिदाप[illegible]दाअकामतउपनमेत्तदात्वमग्नेव्रतपाअसीत्येतामृचंचजपेत्॥

तेष्वपह्नवं याचेतवेत्यर्थः।

आख्यायवेतरेष्वपह्नवल्लीसेत। विध्यतिक्रमं कृतवान्। स[illegible]स्तरेषु सत्रिषु मम अतिक्रम इत्या
[illegible]ख्यायाः। तेष्वपह्नवं यां। तेनायमर्थः सर्वेष्वतिक्रमेषु जपो नित्यः। जपानंतरमिदं वा कर्तव्यं।
व्रतातिपत्तौ व्रतव्रतपतय इति शास्त्रांतरविहितमन्यव्रतविशिष्टमिति चेत्तद्वा कर्तव्यमित्य
र्थः। अवकीर्णिनं तैरेव दीक्षितद्रव्यैरपर्युप्यषु न दीक्षयेयुः। योऽध्यवाय पर्यंतं ग्राम ब्रह्मचर्यं क
रोति सोऽवकीर्णिनमित्युच्यते। शास्त्रांतरोक्तं स्वशास्त्रोक्तं च कारयित्वा प्रायश्चित्तं पुनरपि
दीक्षितैरेव दीक्षितद्रव्यैर्इडाभिर्दक्षयेयुः अपर्युप्य परिवापनमकृत्वेत्यर्थः। आग्रयणका
लेन वानां सवनीयां निर्वपेयुः। आग्रयणकाले कृत्यास्वागतासु नवानां व्रीहियवानां सव
नीयां निर्वपेयुः शरदि व्रीहीणां वसंते यवानामिति विध्यंतरानुरोधेन तु श्यामाकानां प्रकृतौ
दर्शपूर्णमासयोस्तेषामपि विधानात्। दीक्षोपसत्सु व्रतदुघ आदयेयुः। तत्र श्यामाकाना

स०वृ०उ६
१६२
162

मप्यादनं भवति विरोधाभावात्। तेषां व्रत्यानि। व्रतानि भवानि व्रत्यमित्युच्यते। दर्शपूर्णमास
योर्यद्दौपसथ्यमहस्तद्व्रताहस्तत्र यानि पत्नीयजमानयोर्भोजनार्थान्युक्तानि व्रताहानि तानि
तेषां सत्रिणां पत्नीयजमानानामेकाहाहीनस्थां च पत्नीयजमानानां भोजनार्थे भवंतीति
सूत्रार्थः। दीक्षोपसत्सु त्वासु भोजनार्थे विहितत्वात्कुंडपायिनामयनादिष्वग्निहोत्रादिमा
सप्रकारा अस्याविधेरवकाशं हविरुच्छिष्टभक्षाविषये पत्न्यश्च तासां हविरुच्छिष्टभक्षाविरो
धात्। पयो दीक्षासु। दीक्षासु भोजनार्थे पयो विधीयते। व्यतिनीय कालमुपसदां चतुर्थमे
कस्या उग्धेन। उपसदामाद्योत्तमलक्षणं व्यतिनीयापोत्याद्दीक्षानुपसत्कालांश्चतुर्धा
विभज्याद्यभागं चतुस्तनं व्रतं कुर्यात्। तत्राद्यकालः प्रथमेहनि प्रातः सद्दीक्षाव्रतेन व्या
ख्यातत्वादपोद्यते। उत्तमस्तु काल औपवसथ्येहनि सायंतनस्य तत्र निवृत्तत्वात्तस्यवि

१६२

रुच्छिष्टत्वमेवअतो व्यतिनीयकालमतिकालद्वयाभिप्रायेणोक्तं। तावदेवत्रिभिस्तैः। ता
वद्भ्यामेकेन तावदेव। उपसद्दामेकैकं चतुर्भागं व्रतयितव्यं एवमुपसत्समष्ट्यो यथायोगं
भागाः कल्पनीयाः। तुल्याः स्युः हविरुच्छिष्टभक्षा एव स्युः॥ भवेयुः नोपवसथिकं च तत्र व्रतस्य
निवृत्तत्वादित्युक्तं। अवधारणं यजमानायाते तदेवव्रतं न सामान्यं तदेषां व्रत्यानीत्येतत्पत्नी
नां तु सामान्यमेव तासां हविरुच्छिष्टभक्षाविरोधादित्युक्तं। धानाः करम्भः परिवापः पुरोडा
शः पयस्येति तेषां यद्यत्कामयीरंस्तत्तदुपविगुल्फयेयुः। यदि यथाप्राप्तेन हविरुच्छिष्टभ
क्षणेन प्राणान्न धियेरन्। तदा धानादीनां मध्ये यस्मिंस्तेषामभिरुचिस्तद्द्रव्यमुपविगुल्फ
येयुः। अभिवर्धयेयुः। आशिरं दुघोदध्यर्थं। यदि व्यंजनरहितं हविरुच्छिष्टमुपभोक्तुमशा
क्तः स्यात्तदा आशिरं दुघो गा वर्धयेयुः दध्यर्थं तेन दध्नाशिरार्थं गृहीतशेषेण यात्रेतेनोपभुं

जीरन्। सौम्यं वा विगुल्फं निर्वपेयुरिति शौनको यावच्छरावं मन्येरन्। यद्विधानादीनां हविरुच्छिष्टेन
प्राणान्नध्रियेरन्। तद्वायः प्राकृतः सौम्यश्चरुस्तं प्रवृत्तं निर्वपेयुः। यावद्भिः शरावैर्निरुप्तैः।
सत्रिणां प्राणधारणाय पर्याप्तिः संभवति तावन्निर्वपेयुरित्यर्थः। वैश्वदेवमेके बार्हस्पत्यमे
के। अथवा एतौ पक्षौ भवतः सौम्यो यथाप्रकृति पक्तव्यः यथाप्रकृत्येव प्रतिपादनीयश्च
सत्रिणां प्राणरक्षणार्थमेव वैश्वदेवं चरुं विगुल्फं निरुप्य तेभ्यो यागं कृत्वा तच्छेषमुपभुंजी
रन् फलचमसन्यायेन बार्हस्पत्येन चैवमेव कुर्युः। द्वावेतौ पक्षौ। सर्वान्वानुसवनं। सर्वा
नेतान्सौम्यादींश्चरूननुसवनं निर्वपेयुः। एकैकश्चेन्न तत्र सौम्यः प्रकृतिस्वरूपेण तृती
यसवने भवति। इतरयोः सवनयोरितरौ चरू ओषध्यापनं तयोर्णाभवतः। अपि वान्य
न्नसिद्धं गार्हपत्ये पुनरधिश्रित्योपप्रवर्तयेरन्। गार्हपत्येऽधिश्रयणधर्ममात्रं कृत्वोपप्रवर्त

येरन्।नन्वाव्रतेन संहत्यवा। अन्यान्वापथ्यान् भक्ष्यानामूलफलेभ्यः। उपव्रतयेरन्नित्यर्थः।
एतेन वर्तयेयुः पशुनाच। एतेन सवनीयेन च पशुना वर्तयेयुः। न केवलं धानादिभिरेवं। स्क
साधिकारात्सवनीय एव पशुरत्र संन्निहितः किमर्थमेतेनेत्युच्यते वक्ष्यमाणे यि विभा
गे सवनीयस्यैव प्रापणार्थं। नाग्नीषोमीयस्य अतोग्नीषोमपशोर्हविरुच्छिष्टभक्षणार्थं।
विभागे प्राप्ते समं स्याद् श्रुतत्वादिति सममेव विभागः स्याद्वचनादिति। ६। तस्य विभागं व
क्ष्यामः। तस्य सवनीयस्य पशोर्विभागं वक्ष्याम इति प्रतिज्ञासूत्रमिदं। हनू सजिह्वे प्रस्तो
तुः। जिह्वया सह हनू प्रस्तोतुर्भवति त्रीण्येतानि। श्येनं वक्ष उद्गातुः। श्येन सदृशं वक्षः इत्य
र्थः। कंठः काकुद्रः ककुदित्यर्थः द्वे एते। दक्षिणा श्रोणिर्होतुः। सव्या ब्रह्मणः। दक्षिणं सक्थि
मैत्रावरुणस्य। सव्यं ब्राह्मणाच्छंसिनः। दक्षिणं पार्श्वं सांसमध्वर्योः। अंसेन सह पार्श्वे द्विए
काकुद्रः प्रतिहर्तुः।

स०ह०उ६
१६४
164

ते। सव्यमुपगात्दृणां। सव्यो ंसः। प्रतिप्रस्थातुः। दक्षिणं श्रोणिर्नेष्टुः। सव्यं पोतुः। श्रोणिरित्यर्थः। दक्षिणऊरुरच्छावाकस्य। सव्य आग्नीध्रस्य। दक्षिणो बाहुरात्रेयस्य। सव्यः सदस्यस्य। सदं चानूकं च गृहपतेः। द्वे सते। दक्षिणो पादौ गृहपतेर्व्रतप्रदस्य। द्वे एते। सव्यो पादौ गृहपतेर्भार्यायै व्रतप्रदस्यो ष्ठ एनयोः साधारणो भवति तं गृहपतिरेव प्रशिंष्यात्। एतयोर्व्रतप्रदयोरोष्ठः साधारणो भवति तं गृहपति ताभ्यां विभज्य दद्यादित्यर्थः। जाघनीं पत्नीभ्यो हरंति तां ब्राह्मणाय दद्युः। तां जाघनीं पत्न्यः कस्मै चिद्ब्राह्मणाय दद्युः। स्कंध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतः। स्कंधजा मणिकाः कीकसाश्च एते द्वे। तिस्रश्चैव कीकसा अर्धं च वैकर्तस्योन्नेतुः। अर्धं चैव वैकर्तस्य क्लोमा च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः स्यात्। द्वयोः स्कंधयोः स्त्रीणि त्रीणि तद्ब्राह्मणस्य। शमिता वद्यद्यब्राह्मणः स्यात्तदा स्वभागं ब्राह्मणा

व १६४

यद्द्यात्। शिरःस्कन्नसण्यायेयः श्वः सुत्वां प्राह तस्याजिनमिक्का सर्वेषां। होतुर्वा ताव एताः
षट्त्रिंशतमेकपदायस्तं वहंति। यान्येतानि षट्त्रिंशदंगानि तान्येकपदाउच्यंते। ताश्चयत्तं
भवहंति। भस्त्रापितॄणां बलवर्धनद्वारेण। षट्त्रिंशदक्षरा वै बृहती बार्हताः स्वर्गलोकास्त
त्प्राणेषु च स्वर्गेषु च लोकेषु प्रतितिष्ठंतो यंते। संख्यासामान्यात्स्वाबृहतीत्युच्यते। स्वर्गा
श्च प्राणाश्च बार्हता इति क्वचित्। संस्तुतिरिति। तस्मात्प्राणेषु च स्वर्गेषु च प्रतितिष्ठं तोयं
ति। येंगानि बृहती संमितानि जानंति। स एषः स्वर्ग्यः पशुर्य एनमेवं विभजंत्यथ येतोन्यथा
तद्यथा सेलगा वा पापकृतो वा पशुं विमथ्नीरं स्तादृक्तत्। स एष पशुरान्यस्यायस्कस्वायभव
ति। येनेन विधानेन विभजंति अन्य[illegible]था चेत्स्यत्स वायायैव भवतीति विभागस्क्ति परा सैषा
निंदा। तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्देवभागो विदांचकार तामु हाप्रोच्यैवास्माल्लोका

सं०वृ०उ६ उच्चकामत्तामुहुगारिजायवाभ्रव्यायामनुष्यः प्रोवाचततोहैनामेतद्वर्णसुनुष्याअधीयते।
१६५ विद्यास्कातिद्वारेणापिविभागस्यैवप्रश्नस्तताकथितेतिपशुविभागः समाप्तः।६।। सर्वेसमा
165 नगोत्रास्युरितिगाणगारिः। सत्राण्युक्तानितेषांचबहुयजमानत्वमुक्तं। बहुषुचसमाना
र्षेयाः भिन्नार्षेयाश्च संभवंतितत्रभिन्नार्षेयाणांसत्रासननास्तीतिगाणगारिराचार्यो
मन्यते। कुतः। कथंत्वाप्रीसूक्तानिभवेयुः कथंप्रयाजाइति। भिन्नार्षेयत्वेसत्येवमादीनि
कथंभवेयुरित्यर्थः। अतः सर्वेसत्रिणः समानगोत्रास्स्युरित्युक्तं। आर्षेयः प्रवरइतिपर्या
यो। ऋषिरितिवंशनामधेयम्भृतावत्सविदार्ष्टिषेणादयः शब्दाउच्यंते। गोत्रशब्दोपत्यं
त्र पौत्रप्रभृतिगोत्रमित्येवंपारिभाषिकोस्ति। अन्यन्यथाचपारिभाषिकएवास्तियथोक्तंभ १६५
गवताबोधायनेन। विश्वामित्रोजमदग्निर्भरद्वाजोथगोतमः। अत्रिर्वसिष्ठः कश्यपइत्ये

सूत्रे समानप्रवरमात्रोपाधिवचनो गोत्रशब्दः प्रयुक्तः यस्त्वगस्त्याष्टमाणामन्येष्वपि गोत्रे

ते सप्तऋषयोगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्युच्यते। अयमर्थः। एतेषामपत्यमितिये
स्मर्यते ते तद्गोत्रमित्युच्यते। यथाजमदग्नेर्गोत्रं वत्सादयः। तथा गोतमस्यायास्यादयः।
भरद्वाजस्य दक्षिणागर्गादयः। तथात्र्यादीनां स्वस्ववर्ग्याइति। तथार्षेयगोत्रशब्दयोःभि
न्नविषयत्वं शिष्टव्यवहारे दृष्टं। यथाह याज्ञवल्क्यः। अरोगिणीं भ्रातृमतीमसमाना
र्षगोत्रजामिति। तथा पिंड ऋषिबंधारिक्थं भजेरन्निति। एवं व्यवहारा बहवः संतिअ
स्मिन्तु सूत्रे गोत्रशब्द आत्र्यादेरनुक्षेयत्वादमर्थमित्येकत्वादेकोपाधिवचनेनाभिप्रे
तः। यावंतो नंतर्हिताः समानगोत्रास्तावतां सकृदित्यत्रैशब्दो लोके प्रयुज्यमानो दृश्यते।
मित्रयुवगोत्रोहमित्येव मुद्गलगोत्रोहमित्येवमादिचौपचारिकः परामर्शजः प्रयोगः॥
अगस्त्याष्टमानापत्येष्वयास्यगर्गकुंडिनादिषु गोतमभरद्वाजवसिष्ठादिषु गोत्रत्वम

स०दृ०उ६
१६६
166

स्तितत्सामान्यदृष्यामित्रयुवमुद्गलादिषुपरामर्शेनलौकिकाःप्रयुंजते।अस्यायमर्थइतिस्म
रतिअतोभवताबौधायनेनस्मृत्यंतरेउक्तएवगोत्रशब्दस्यार्थइतिनिश्चिनुमः व्याकरण
स्मृतिश्चाप्यस्यानबाधिकासामान्यविशेषरूपत्वात्तयोः।अपिनानागोत्रास्सुरितिशौन
कस्तंत्राणांव्यापित्वात्।[illegible]
[illegible]।गार्ग्यगारिणासमानविधानानामेवसत्रसंबंधउक्तेशौनकआचार्यआ
हसमानगोत्राणामेवेतिननियमः।नानागोत्राअपिसत्रमासीरन्निति।कुतः तंत्राणांव्या
पित्वात्।तंत्रशब्देनात्रसर्वपुरुषसाधारणोंगसमुदायउच्यते।तस्यचव्यापित्वमस्त्ये
व।कथंपुनरसाधारणाइतिपदार्थइतितत्राह।गृहपतिगोत्रान्वयाविशेषाः।अयमर्थः। १६६
येविशेषाअसाधारणाः।तेगृहपतिगोत्रान्वयागृहपतिविधानानुगुणाःकर्तव्याः॥

एतदुक्तं भवति। असमानविधानानामपि सत्रासनं भवति। प्रायेणांगसमुदायस्याविरोधि
त्वात्। ये केचन विरोधिनस्ते गृहपतेरविरोधित्वेन कर्त्तव्या इति। ननु गृहपत्यविरोधेन सत्रे
कृते येषां विरोधिस्तेषां फलसंबंधो न स्यादित्यत आह। तस्य राद्धिमनुराद्धिः सर्वेषां। तस्य
गृहपतेः फलसिद्धिमनु सर्वेषां सत्रिणां फलसिद्धिर्भवत्येव। कुतस्तन्मुखाः सत्राण्यास
त इति वचनात्। अत एव सूत्रकारस्यायमेव पक्ष इति गम्यते। प्रवरास्त्वावर्त्तेरन्नावापधर्मि
त्वात्। ओप्यंत इत्यावापा आहवनीयाः ते च प्रवरेण धर्मेण धर्मिणस्तस्य प्रवरस्याहवनी
यसंस्कारत्वादाहवनीयधर्म इत्युच्यते। अत आहवनीयबहुत्वात्प्रतिप्रधानमावर्त्तेरन्नि
त्युच्यंते। आवापधर्मित्वादित्ययमर्थः। आवापानामाहवनीयानां प्रवरं प्रति धर्मित्वादि
त्ययमर्थः। एवं प्रवरानुक्रमणस्य प्रसंगमापाद्यानंतरं प्रवरानुक्रमणमिति। जामदग्न्यव

स०वृ०३६
१६७

167

त्साइत्येवमादिनात्रंब्वेन। तत्तदनुक्रमणस्येदं प्रयोजनं। श्रुतावेतावन्मात्रमस्ति। कस्यांचिद्दे
वंश्रूयते आर्षेयं वृणीते यथर्षि मंत्रकृतो वृणीते न चतुरो वृणीते न पंचातिवृणीत इत्यर्थः।
आर्षेयवरणस्य मंत्रकृत्त्वविशेषणत्वेनोच्यते। अतः ये सामीधानामृषीणां मंत्रकृत्त्वे
नाम्नायंते। तेषामेकाहाहीनां यथेष्टसंख्याकानां वरणे प्राप्ते न चतुरो वृणीते न पंचाति
वृणीत इति चतुर्णामति पंचानां च प्रतिषेध इति वाक्यत्रयमस्यां श्रुताविति वर्णयंति।
अन्यस्यामन्यस्यामथाश्रूयते आर्षेयं वृणीते एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतु
रो वृणीते न पंचातिवृणीत इत्ययमर्थः। त्रीन्वृणीत इति एष एवात्र विधिः। इतरेषां कश्चि
दयमनुवादः इति वर्णयंति। इमामेव श्रुतिमुपन्यस्य आयनिङ्गिरयमेवार्थो वर्णितो

१६७

आर्षेयस्याहानं स्यादनधिकारादिति। पूर्वोक्तश्रुत्यनुसारेण आर्षेयाणामप्यधिकारो

स्तीतिकल्पकाराणांसूत्रकाराणांचप्रवृत्तिरितिसेवानुसृतास्माभिः।तत्रआत्मीयाऋष
यस्तेषांयेमंत्रकृतस्तेप्रोक्तसंख्याचरितव्याइत्येतावन्मात्रंश्रुतितोवगतं।तत्रैतेआत्मी
याःस्तेषामेतेमंत्रकृतइतिज्ञानेचश्रुतिस्मृतिरेवात्रशरणं।तत्रैतावद्देवलौकिकानांस्मर
णंदृश्यते।वयंवत्साः वयंविदाः वयंवमायाः वयंरथीतराः वयंकण्वाः वयंगविष्ठिराः वयं
कर्षणाः वयंकुंडिनास्माकमेतेश्रूयंतेमंत्रकृतोनएतेऽमंत्रकृतोइतिस्मरंति।अपिच
आर्षेयाः त्र्यार्षेयाःपंचार्षेयाइतिचस्मरंति।अपिचास्माकमंगिरोमुख्यःप्रवरोष्टादंष्ट्रमुखोवेतिव
चनंस्मरंति।अथचैतेषांज्ञानस्यस्मरणादन्यत्प्रमाणंनास्तिआर्षेयवरणविध्यपेक्षितंचै
नएवंचेत्कल्पसूत्राणांवंशनामधेयंभूतमित्रसुवादिविषयाश्रुतिर्लोकउपजीव्या।उद्दे
शोनास्त्येतेएतावंतः।अस्त्येकोद्वावस्यपंचास्यत्रयोवापंचवास्त्येकोवात्रयोवापंचवेति।अ

स०१०३६ १६८ 168

स्यायंमुखवतोपंचेत्येवमादिपदार्थविषयत्वादिकालानांश्रुतिमागच्छंतोयंअपभ्रंशपरिहा
रार्थास्तेस्तेकल्पेसूत्रेणनिबध्नंतिप्रवरणीयसंज्ञायाआपस्तंबवरानुक्रमस्यप्रयोजनमित्य
वगंतव्यंइदानींप्रवराअनुक्रमिष्यंतेजामदग्नावत्सास्तेषांपंचार्षेयोभार्गवच्यावनाप्न
वानौर्वजामदग्नेति।द्विविधावत्साजामदग्न्याअजामदग्न्याश्चतत्रयेजामदग्नावत्सा
वयमितिस्मरंति।तेषांपंचार्षेयःप्रवरोभवति।अथहाजामदग्नानांभार्गवच्यावनाप्न
वानेति।येतुवयं।अजामदग्नावत्साइतितेषांत्र्यार्षेयःप्रवरोभवतिभार्गवच्यावनाप्न
वानेति।एतेषांअजामदग्नत्वात्औरवजामदग्नशब्दोनभवतःअतएवतोशब्दोजाम
दग्न्यत्वप्रयुक्तोद्विप्रकाराणांवत्सानांपरस्परमविवाहःआर्षेयसंनिपातात्।एतदुक्तं
भगवताबौधायनेनआर्षेयाणामविवाहइति।आर्ष्टिषेणानांभार्गवच्यावनाप्नवाना

१६८

र्ष्टिषेणानूपेति । अयमपि पंचार्षेयप्रवरः । बिदानां भार्गवच्यावनाप्नवानौर्वबैदेति । अयम
पि पंचार्षेय एव बिदानामौर्वशब्दसमन्वयात् जामदग्निगोत्रत्वमप्यस्ति । वत्सानां विदाना
मार्ष्टिषेणानां च क्वचिदृषिसंनिपातात्किंचित्सगोत्रत्वाच्च परस्परमविवाहः । सर्वेषु च
समानप्रवरत्वादविवाहः सर्वत्रेषु क्वचिध्यानधर्मेषु । यस्कवाधौलमौनमौकशार्करा
क्षिसार्ष्टिसावर्णिशालंकायनजैमिनिदैवंत्यायनानां भार्गववैतहव्यसावेतसेति । अयं
गणः त्र्यार्षेयः । यस्कादीनां दशानां परस्परमविवाहः । प्रवरेषु क्वचिच्छास्त्रांतरात्यदवि
पर्यासो वर्णविपर्यासो वा पदान्यत्वं वास्ति न तेन प्रवरान्यत्वं भवतीत्यवगंतव्यं । श्येतानां
भार्गववैन्यपार्थेति । त्र्यार्षेयोयं । मित्रयुवां वाध्र्यश्वेति प्रवरं वा भार्गवदैवोदासवाध्र्यश्वे
ति । मित्रयुवामेकार्षेयोयं त्र्यार्षेयो [illegible] वा प्रवरो भवति ॥

स्०ह्०उ६

१६०

169

अयंप्रवरविकल्पः। सर्वेषामित्रयुवांभेदेनस्मरणाभावात् वत्सानांतुस्मरणाभावात्। वत्सानांतु
स्मरणाभावात्। वत्सानांतुस्मरणादेववत्सभावः तद्भेदात्तत्प्रवरस्याव्यवस्थायुक्तानतुतद्विशे
षणभेदेनभेदग्रहणमितितदयुक्तंअगृह्यमाणस्यभेदस्यसत्वेप्रमाणाभावात् प्रवरभेदः
प्रमाणमितिचेन्नैतत्साधकंप्रयोगविकल्पेनापिसंभवात् अतोभेदग्रहणाव्यवस्थायांप्र
माणंनास्तीतिविकल्पएवप्रवरयोरित्यध्यवसितंएवमेकत्र्यार्षेयपंचार्षेयविकल्पेआद्य
पदेविकल्पेवान्यस्मिन्नप्येवंविधेऋषिभेदग्रहणेसतिव्यवस्थानास्तीतिनिश्चीयते। शुन
कानांगृत्समदेतित्रिप्रवरंवाभार्गवशौनहोत्रगार्त्समदेति। एकार्षेयोयं। एवंत्र्यार्षेयोवा
शुनकानांप्रवरः॥१०॥ गोतमानामांगिरसायास्यगोतमेति। उचथ्यानामांगिरसोचथ्य
गोतमेतिरहूगणानामांगिरसराहूगण्यगोतमेति। सोमराजकीनामांगिरससोमराज्य

१६९

गोतमेति। वामदेवानामांगिरस वामदेव्य गोतमेति। बृहदुक्थानामांगिरस बार्हदुक्थ्य गोत
मेति। पृषदश्वानामांगिरस पार्षदश्व वैरूपेति। अष्टादंष्ट्रं हैके ब्रुवते नीत्यांगिरसमष्टादंष्ट्र
पार्षदश्व वैरूपेति। आंगिरसाष्टादंष्ट्रयोर्विकल्पः। अमीत्र्यार्षेया इत्यर्थः। ऋक्षाणामांगिरस
बार्हस्पत्य भारद्वाजवांदनमातव चंसेति। अयं पंचार्षेयः प्रवरः। कक्षीवतामांगिरसौचथ्य
गोतमौशिजकाक्षीवतेति। दीर्घतमसामांगिरसौचथ्य दैर्घतमसेति। अयमपि पंचार्षेयः ए
व। अयास्यौचथ्यराहूगणसोमराजकीतु वामदेव बृहदुक्थ कक्षीवद्दीर्घतमस इत्येते गोतमाः
। उचथ्यशब्दसमन्वयात् दीर्घतमसां गोतमत्वमस्त्येव। गोतमानां सर्वेषां अविवाहः। पृष
दश्वा राथीतराश्चेति च स्मरंति। एकयोनिर्ऋक्षाः पुनर्भरद्वाजः। भरद्वाजाग्निवेश्यानामांग
रस बार्हस्पत्य भारद्वाजेति। भरद्वाजानामाग्निवेश्यानां आर्षेयः प्रवरो भवति। ११। मुद्गलाना

स०१०३६
१७०
170

मांगिरसभार्म्याश्वमौद्गल्येति। तार्क्ष्यं हैके ब्रुवते नीत्यांगिरसं तार्क्ष्यभार्म्यश्वमौद्गल्येति। अयं त्र्या
र्षेयः। आंगिरसतार्क्ष्ययोर्विकल्पः। विष्णुवृद्धानामांगिरसपौरुकुत्स्यत्रासदस्यवेति। गर्गा
णामांगिरसबार्हस्पत्यभारद्वाजगार्ग्यशैन्येति। आंगिरसशैन्यगार्ग्येति वा। गर्गाणां पंचार्षे
यस्त्र्यार्षेयो वा प्रवरो भवति व्यवस्थायां विकल्पो न वर्गभेदानवगमादिस्कन्दः। एते च भारद्वा
जाः। आग्निवेश्यानां गर्ग्याणां च भरद्वाजत्वात्सर्वेषां च परस्परमविवाहः। मुद्गलविष्णुवृद्धा
श्चैकपक्षादिनः। हरितकुत्सपिंगशंखदर्भभैमगवानामांगिरसांबरीषयौवनाश्वेति। हरित
कुत्सपिंगशंखदर्भभैमगवाइत्येतेषां षण्णामयं प्रवरो भवति। मंधातारं हैके ब्रुवते नीत्यांगि
रसं मांधात्रांबरीषयौवनाश्वेति। अयं वा हरितादीनां षण्णां प्रवरो भवति। संकृतिपूतिमा
षतंडिशंबुशैवगवानामांगिरसगौरिवीतसांकृत्येति। संकृत्यादीनां पंचानामयं प्रवरो भ

१७०

वति। शाक्त्यो वा मूलं शाक्त्य गौरिवीत सांकृत्येति। संकृत्यादीनामयं वा प्रवरो भवति। एते संकृ
त्यादयः प्रकरणादंगिरःशब्दसमत्वयाच्चांगिरसा इति प्रतीयंते। शक्तिगौरिवीतसमन्वया
द्वासिष्ठा इत्यपि प्रतीयंते। तथा कस्मिंश्चित्प्रवराम्नायेंगिरसां प्रकरण एव संकृत्यादीनादि
इयांगिरोमुखमेव प्रवरं पठ्यमानं पश्यामस्तथा कस्मिंश्चित्प्रवराम्नाये वासिष्ठानां प्रकरणे
एतानेवोद्दिश्य शाक्त्यामुखं प्रवरं पठ्यमानं पश्यामः। एवं द्वाभ्यामपि संबंधदर्शनादुभयोर
न्यतरसंबंधिन एवेत्यवगंतुं न शक्यते। यद्येषां वंशभेदस्थितिरस्ति तदा इमे आंगिरसाः इमे
वासिष्ठा इत्यवगम्यते। तत्रांगिरसानामयं इति निवेशे विकल्पाभावः। अतो वंशभेदादविक
ल्प एव प्रवरयोः। ततः संकृत्यादीनां वासिष्ठत्वाभावे प्रमाणाभावाद्वासिष्ठैरेषामविवाहः॥
१२। कण्वानामांगिरसाजमीढकाण्वेति। घोरमु हैके ब्रुवते वकृष्याजमीढमांगिरसघोरकाण्व के

हुं

सं०वृ०उ६
१७१

ति।अवक्रध्येतिअपोह्येत्यर्थः।कपीनामांगिरसामहायवोरुक्षयसेति।अथयएतोद्विप्रवाच
नायथैतच्छौंगशैशिरयः।भरद्वाजाः श्रृंगाः शैशिरयः।अथेदानीमिदमुच्यते।येएतेद्विप्र
वाचनाकृषिद्वयव्यपदेश्याः।यथाएतेशौंगशैशिरयोद्व्यामुष्यायणाःशौंगेयस्यक्षेत्रं
शैशिरेयबीजोत्पंनानांवंशाः।अन्येषांवाभिन्नार्षेयक्षेत्रयोजोत्पंनानांवंशाइत्येवोदा
हरणं।शौंगशैशिरग्रहणंप्रदर्शनार्थं।सर्वेहितोभिन्नार्षेयाः।यस्माद्भरद्वाजाः श्रृंगा
स्तेषामयंप्रवरः आंगिरसबार्हस्पत्यभारद्वाजेति।कताः।शैशिरयस्तेषांवैश्वामित्र
कात्यात्कीलेति।एवंस्थितेकथमेषांआर्षेयप्रवरणमिति।प्रसंगमुक्त्वाह।तेषामुभयतः
प्रवृणीतेकमितरतोद्वावितरतः।त्र्यार्षेयप्रवरणपक्षेएवंभवति।द्वौवेतरतःत्रीनित
रतः।पंचार्षेयप्रवरणपक्षोयं।नहिचतुर्णांप्रवरोस्तिनपंचानामतिप्रवरणं।अतउभय

कताः

१७१

तोद्वौ द्वौन ग्रहीतव्यौ निषेधात्। वरणं अतिपंचानां प्रवरनिषेधात्। तद्द्वयोरेकार्षत्वेपि द्व्यार्षे

यवरणमनुज्ञातमितिगम्यते। आंगिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति। प्रदर्शनमात्रमेत

त्। द्व्यामुष्यायणलक्षणमुच्यते। अपुत्रेणपरक्षेत्रेनियोगोत्पादितःसुतः। आवयोरप्य

सोरिक्थी पिंडदाता चधर्मत इतियाज्ञवल्क्यवचनादेवंप्रकारमेवद्व्यामुष्यायणत्वं। नान्येने

तिमंतव्यं। द्व्यामुष्यायणानां सर्वेषां पक्षद्वयेप्यविवाहः। द्व्यामुष्यायणत्वाभावेवाऊर्ध्वंस

प्तमात्पित्रबंधुभ्योबीजिनश्चेत्यस्यवचनस्याविषयः। ३। अत्रीणामात्रेयार्चनानसप्या

वाश्वेति। गविष्ठिराणामात्रेयगाविष्ठिरपौर्वातिथेति अत्रिर्हिद्विविधाअत्रयउक्ताः। अन्यत्रा

न्येचसंति। तेषां सर्वेषामत्रीणां परस्परमविवाहः। एवमुत्तरेक्वचिद्दृष्टव्यं। किंचितकालव

कालबवमनुतंतुकुशिकानां वैश्वामित्रदेवरातौदलेति। चिकितानां गालवानां कालानां

स०प्र०३६
१७२

ववानां मनुतंतूनां कुशिकानामित्येतेषांअयंप्रवरोभवति।श्रीमतकामकायनानां वैश्वामि
त्रदेवश्रवसदेवतरसेति।श्रीमतानां कामकायनानामयंप्रवरः।धनंजयानां वैश्वामित्र
माधुछंदसधानंजय्येति।अजानां वैश्वामित्रमाधुछंदसाज्येति।रोहिणानां वैश्वामित्रमा
धुछंदसरौहिणेति।अष्टकानां वैश्वामित्रमाधुछंदसाष्टकेति।धनंजयाजरोहिणाष्टक
विश्वामित्रास्त्रिप्रवराः।पूरणवारिधापयंतानां वैश्वामित्रदेवरातपौरणेति।पूरणानांवा
रिधापयंतानामयंप्रवरः।कतानां वैश्वामित्रकात्यात्कीलेति।अघमर्षणानां वैश्वामित्राघ
मर्षणकौशिकेति।रेणूनां वैश्वामित्रगाथिनरैणवेति।वेणूनां वैश्वामित्रगाथिनवैणवेति।शा
लंकायनशालाक्षलोहितांजह्नूनां वैश्वामित्रशालंकायनकौशिकेति।पंचानामयंप्रवरोभ
वति।एतेविश्वामित्राः।एतेषांसर्वेषामविवाहः।कश्यपानां काश्यपावत्सारासितेति।निध्रुवा

क्ष लोहित

१७२

णां काश्यपा वत्सार नैध्रुवेति रैभाणां काश्यपा वत्सार रैभ्येति। शांडिलानां शांडिलासित देवले

ति। [illegible]। एते कश्यपाः परस्परमविवाहः। काश्यपासित देवलेति वा। शांडिला[illegible]नां का

श्यप शांडिल्ययोर्विकल्पः।१४।। वासिष्ठेति वसिष्ठानां येन्य उपमन्यु पराशर कुंडिनेभ्यः। उ

पमन्यु पराशर कुंडिनातिरिक्ता वासिष्ठा एकार्षेयाः। उपमन्यूनां वासिष्ठाभरद्वस्विंद्रप्रम

देति पराशराणां वासिष्ठ शाक्त्य पाराशर्येति। कुंडिनानां वासिष्ठ मैत्रावरुण कौंडिन्येति। उ

पमन्यु पराशर कुंडिन वसिष्ठः मैत्रावरुणका। एतेषां सर्वेषामविवाहः। अगस्तीनामा

गस्त्य दार्ढच्युतेध्मवाहेति। सोमवाहो वोत्तम आगस्त्य दार्ढच्युत सोमवाहेति। उत्तमपद वि

कल्पः। पुरोहित प्रवरो राज्ञां। उत्तर विवक्षार्थमेतत्। पौरोहित्यान्राजविशामिति सिद्धत्वात्।

अथयादिसार्ष्टप्रवृणीरन्मानवैलपौरूरवसेति। राजन्यवैश्यानां राज्ञामित्युक्तं। तस्य स्वरूपमे

तेनोच्यते। यदि राज्ञां राजर्षिन्वृणीतत देत्यर्थः। सार्ष्टिशब्दो वदनोच्यते। सृष्टो भवं सार्ष्टिं समु
त्पत्तिरित्यर्थः। तथाहि सर्वेषां राजन्यानां मनुइल्वपुरूरवादयो वंशकारा इति स्मर्यते। तेषां
वरणमित्यर्थः। इति सत्राणि। इत्थं सत्राण्युक्तानीत्यर्थः। उक्तानुकीर्तनमुत्तरविवक्षार्थं। ता
न्यदक्षिणानि। तान्येतानि सत्राण्यदक्षिणानि भवंति। सत्राणीत्यनेनैव सन्निहितत्वात्स
त्राणामेव तानीति योगविभागार्थमुच्यते तेनायमर्थः। सन्निहितान्यसन्निहितानि च या
नि सत्राणि भवंति तेषु सर्वेषु सत्रेषु यजमानऋत्विक्त्वाविशेषात्परिक्रयाभाव इति। अ
नेन सर्वेषां सत्राणां दक्षिणाभावो वधार्यते। यत्र कृष्णाजिनानि धन्वंत इत्यनेन दक्षिणान
यनमात्रापवादः। तेषामंते ज्योतिष्टोमः पृष्ठ्यशमनीयः। तेषां सत्राणामंते ज्योतिष्टोमः।
पृष्ठ्यः शमनीयसंज्ञकः सदक्षिणः कर्तव्यः। अन्वर्थसंज्ञको। सत्रेषु युज्यमानानां पृष्ठ्यानां

दक्षिणाभावाद्दीप्यमानानांनिर्वपणंशमनंक्रियतइतिपृष्ठ्यशमनप्रयोजनोयंक्रतुरित्यर्थः।
सत्राउदवसायैषामन्यतमेनापिक्रतुनासर्वेसत्रिणःपृथक्यजेरन्।स्वकीयैरेवर्त्विग्भि
र्वायंक्रतुः।सहस्रदक्षिणः।सत्रोदवसाननिमित्ताधिकारोयमेकाहोज्योतिष्टोमोद्वादश
शतदक्षिणइत्यस्यदक्षिणामात्रविधानं।सकोयज्ञः स्वरूपतोज्योतिष्टोमएवपृष्ठ्यशम
नीयःकर्तव्यइत्यर्थःइतिसिद्धं।अन्योवाप्रज्ञातदक्षिणः।अन्योवाज्योतिष्टोमात्पृष्ठ्यशम
नीयःकर्तव्यः।प्रज्ञातदक्षिणआम्नातदक्षिणइत्यर्थः।दक्षिणावतापृष्ठ्यानिशमयेरन्नि
तिविज्ञायते।सत्राउदवसायदक्षिणावतापृष्ठ्यशमनीयेनयजेरन्सात्रिणः।इत्येवमेवश्रु
तिःसर्वेषांसत्रिणांज्योतिष्टोमोवान्योवेत्ययमुभयोर्दृष्टव्यः।तन्नास्यांश्रुतावेतावानेवा
र्थः।सहस्रदक्षिणःपृष्ठ्यशमनीयःकर्तव्यइति।नात्रक्रतुविशेषनिर्देशोस्ति।एवंस्थिते

स्मृ० वृ० ३६ १७४

१७४

भगवानाचार्यैर्विकृतेषु सर्वेषु विधिषु बुद्धिस्थितत्वात्तस्यामेवं प्रकृष्टदक्षिणात्वं नाम गुणो

विधातुं युक्त इत्यर्थः। तथा हि। तेषामं तज्ज्योतिष्टोमः षष्ठ्यश्यामनीयः सहस्रदक्षिणशताद्दश

शतानि तत्सहस्रं तत्सर्वमित्यादिषु श्रुतिवाक्येषु सहस्रसंख्यायः प्रकृष्टत्वदर्शनात्सहस्र

दक्षिणात्वमेवोक्तवानाचार्यः। अन्ये पुनराचार्या दक्षिणावतेत्यनेन प्रकृष्टदक्षिणाप्रकृते

रेवात्र प्रतीयत इति महत्वमाहुः। अन्यो वा प्रत्तात दक्षिण इति। एवमात्मीयं परकीयं च पक्षा

नुक्त्वा तयोर्मूलमियं श्रुतिरिति दर्शयितुं तां च श्रुतिं पठितवानाचार्यः। दक्षिणावताष्ट

ष्वानि श्यमयेरन्निति विज्ञायत इति एवमनयोः पक्षयोरित्येव श्रुतिर्मूलमित्युक्त्वा स्वप

क्षमेव दृढयितुमाह। प्रकृष्टत्वं महत्वं षष्ठ्यश्यामनीये हेतुरुक्तः। दक्षिणावताष्टष्वानि श्याम

येरन्निति विज्ञायत इति स प्रकृतिर्ज्योतिष्टोमः षष्ठ्यश्यामनीयभावश्चैव दोषः प्रकृष्टदक्षि

णत्वेनोपाधिना क्रतुविशेषोऽन्वेषणीयः। तत्रानवस्थादेः प्रसंग इति। स एव हेतुः प्रकृतिभावे

प्रकृतिभावे। नमो ब्रह्मणे नमो ब्रह्मणे। कृप्रकृतज्योतिष्टोमस्य दृष्टप्रशमनीयभावश्चदो

षः प्रकृष्टदक्षिणत्वोपाधिना क्रतुविशेषोऽन्वेषणीयः स एव हेतुः प्रकृतिभाव इत्यक्तवा

नाचार्यः। नमो ब्रह्मण इति नमस्कृतवानाचार्यः। ब्रह्मनाम तदाविर्भावोपायश्च तत्रैवोक्तः।

श्रवणमनननिजध्यासित वैराग्यलक्षणलक्ष्यत इति श्रौतस्मार्तक्रियाप्रसिद्धाः। आत्म

श्रवणादीन्येवंरूपाणि। तत्रा[illegible]हंरूपोयः सर्वेषां शंसभमभिन्नेदं भावोऽहभेदोरूपोऽद्वेदः

सद्बोधः। सर्वदा स्वरूप एवावतिष्ठते। यदा वा पुनर्बोध्यसंनिधिस्तं तदायं प्रातःकाष्ठयो

रिवाविवेकोऽवगंतुमशक्य एव स एष शब्द आत्मशब्देनोच्यते। अयमेवापहतपाप्मा विर

जो विशोको विमन्युर्विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पो नित्यानंदो नित्यत्व म

ते

सू०१०३६
१७५
175

उच्यते। तादृशस्य अन्यस्यानुपलंभादन्यस्य चापहतपाप्मादिभिर्गुणैः किंचित्तादर्थ्यंनि
रूपयित्वाऽहमेव संसारिण आत्मानमभिमुखीकृत्य तल्लक्ष्यपदेशात्। अतोयमेवात्मा
परंब्रह्मेत्युच्यते। अनेन रूपेणास्यात्मनः सर्वत्र रागद्वेषादिभ्यो वैराग्यमित्युच्यते। एव
मात्मा श्रवणमनननिजध्यासनवैराग्ययुक्तस्यैव श्रौतस्मार्तकर्माणि नित्यनैमित्तिका
न्यान्यनुविष्ठितः। आदर्शशोधनवत्संसारिताहेतुपुण्यपापपूर्वध्यामलाद्यपस्सम
हता कालेन अयमेवात्मा सोऽहं ब्रह्मेत्यवगच्छति। अहमयमित्येवं ब्रह्मणे नमस्कृत्यस्वा
र्थे संसारिणो ब्रह्मोपायो नान्यः। अयमेवास्य पदस्यार्थो नान्य इत्येवाभिप्राययाअस्मा
भिः पुरस्तादुक्तः। अत एव भगवान्सूत्रकारः श्रौतानि कर्माण्युक्त्वा अंते ब्रह्मणे नमस्का
रं कृतवान्। तेन भगवतोप्ययमेवाभिप्राय इति लक्ष्यते। नम आचार्येभ्यो नम आचार्ये

१७५

भ्यः। एवं ब्रह्मणे नमस्कृत्वा आचार्येभ्यो नमस्कारं कृतवान् यो यमस्य शास्त्रस्य अर्थसंप्रदाया त्त
विच्छेदां अस्माभिरधिगतेन स्वमनीषिकेव यति भगवता दर्शितः। तेन स्मरणेन। नमः शौ
नकाय नमः शौनकाय। भगवानाचार्यः स्वाभिमतज्येष्ठं श्री शौनकाचार्यं नमस्करोति।
चतुः कृत्वो द्विरुक्तिः शास्त्रसमाप्तिसूचनार्था॥१५॥ ॥इत्याश्वलायनश्रौतसूत्रवृत्तौ
नारायणीयायां द्वादशोऽध्यायः समाप्तेयं वृत्तिः॥ ॥संवत् १८ ६९ विक्रमनामसं
वत्सरे आश्विनशुक्ल १२ स्थिरवासरे काश्यां लिखितं॥ इदं पुस्तकं संपूर्णं॥ श्रीरस्तु॥

॥ ॥ ग्रंथसंख्या॥ १२००० ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥

आश्वलायनसूत्रवृत्तिः